श्रीगणेशाय नमः सर्वादीनि सर्वनामानि एतानि सर्वनामसंज्ञानि स्युः। तद्गुणसंविज्ञानोऽयं बहुव्री
हिः। तस्यान्यपदार्थस्य गुणानां वृत्तिपदार्थरूपाणां विशेषणानां कार्यान्वयितया संविज्ञानं यत्र स तद्
गुणसंविज्ञानः। तत्र सर्वशब्द आदिर्येषां तानीति विग्रहः। तच्छब्दप्रयोगेणान्यपदार्थप्राधान्यं लभ्यते। ए
वं चित्रगावोऽयस्य समहिन्यादावपि॥ अन्यथा हि यस्य गावश्चित्रा इति गोशब्दप्राधान्यं स्यात्। न चैवंविधे
ऽर्थे बहुव्रीहिरिष्यते। यत्तु हन्तिवाक्ययोर्विशेषैक्यसंपत्तये चित्राणां गवामयमित्यादिविग्रहवर्ण
नं मीमांसावार्त्तिके कृतं। तत्तु न मुनिवचसामनुकूलं। अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति वार्त्ति
ककृता वक्ष्यमाणत्वात्। भाष्यकृता च शेषो बहुव्रीहिरिति सूत्रे त्रिकत्तः शेषमाश्रित्य सूत्रादेरैरवो
क्तस्यार्थस्य साधितत्वात्। द्वितीयाश्रितादिभिः। तृतीया तत्कृतार्थेनेत्यादिक्रमेणाहिष्यमाणत्रिकाणां १

गवामित्यस्यापि हरापास्तं बहुव्रीहित्वं। किंच। मत्वर्थे बहुव्रीहिरिति कात्यायनवचनात्कथं चित्रा
णां गवामित्यत्र तत्प्रसक्तिः। ननु दंडीत्यादावपि दंडस्यायमिति विग्रहाभ्युपगमादस्मदीत्याः ऽयमेव मत
र्थ इति चेत्। नहि सुतरां मुनिवचनविरोधप्रसंगात् तदस्यास्त्यस्मिन्निति सूत्रेण प्रथमांतादस्त्युपाधिकात्संब
धिनि मतुब्विधानात्। समर्थानां प्रथमाद्वेति सूत्रेण प्रथमानिर्दिष्टस्यैव प्रकृतित्वावधारणाच्च॥
नन्वेतान्यपि सूत्रवार्त्तिकभाष्यवचांसि कथंचित् सङ्गमनेष्याम इति चेत्। समर्थः पदविधिरित्यादीनि
व्रीहिभिर्यजेतेत्यादिषु पदविधिभिन्नेष्वपि योजयितासामर्थ्यं च भाष्यादिसंमताद्विपरीतमेव वर्णयन्नस्म
वादृशो निरंकुशः किं किं न कुर्यात्। किंतु व्याकरणाधिकरणे सिद्धांतितं। व्याकरणप्रामाण्यं कथयन्स्वे
च्छया व्याकुलयतीति परं पर्यनुयोगे समाधानं विभावय। तस्माच्चित्रा गावो यस्येत्येव विग्रहः सकलानि

शा॰ कौ॰ २ ष्टसंप्रदायसिद्धो मुनित्रयवचसामनुकूलश्चेति दिक्। आदिशब्दस्यावयववाचित्वादुद्भूतावयवभेदः समुदायः
समासार्थः। तस्य च समुदायस्य गुणपक्षे दोषप्रयोगाभावादानर्थक्यात्तदङ्गं बोधयतीति न्यायेन तदवयवेषु प्रवर्तमाना
सर्वनामसंज्ञा विशेषाणां सर्वशब्देऽपि प्रवर्तत इत्युक्तं तद्गुणसंविज्ञानत्वाद्धलि सर्वेषामित्यादिनिर्देशाच्चेह
लिङ्गं। जसित्यादयः षडिति सूत्रे तु जस्त्वश्च तियोगं विभज्य जस्तेः संज्ञाविधानसामर्थ्यादेवेत्यादयस्तत
द्गुणसंविज्ञानो बहुव्रीहिः। एतेन कतेतेभ्यः कपावादिभ्यश्च समभयज्ञापि सकलशब्दसंग्रहार्थं पठ्यात तद्गु
णबहुव्रीहेरेकशेष इति वक्ष्यते। नन्वेवमपि तद्गुणसकमनद्गुणकेनेति वाच्यं अभिज्ञानाय स्योत्तरः स्व
रविधिः स्यादिति चेन्न इतिवा तद्गुणबहुव्रीह्योः सहविवक्षायां बहुव्रीहेः शेष इति पक्षे। तद्गुणसंविज्ञानबहु २
व्रीहिरेव सर्वशब्दस्यापि संग्रहे सिद्धे एकशेषाश्रयणस्य गौरवपराहतत्वात्। महासंज्ञाकरणमन्वर्थसंज्ञा

विज्ञातार्थं सर्वेषां नामानीति तत्सामर्थ्याच्च सर्वाभिधानसामर्थ्यविशिष्टानामेव संज्ञित्वमनुमीयते। तथा
च तथाभूतानां गणोपाठस्यावश्यकत्तया प्रकारांतरत्वेषां च पाठे प्रमाणाभावादेव विशेषे वास्थितानां
संज्ञानामुपसर्जनानां च सर्वादित्वमेव नास्ति। तेन तेषां गणकार्यं संज्ञाप्रयुक्तं कार्यं चेत्युभयमपि न भ
वति। गणकार्यं यथा त्यदादीनामस्तत्नामकश्चित्. अतिक्रांतस्तमतितत्। तथाऽकुत्सितादिभ्यः। अत्यम
तिक्रांतमत्यन्तं। अतिकतरं। संज्ञाप्रयुक्तं यथा। सर्वनाम्नः स्मै। अतिसर्वाय। तदेतदभिप्रेत्योक्तं वार्तिककृ
ता। संज्ञोपसर्जनप्रतिषेधः पाठात्पर्युदासः पठितानां संज्ञाकरणमिति। तस्मात्प्रसिद्धेन प्रवृत्तिनि
मित्तेन प्रयुक्तं रतरं प्रत्ययमुपसर्जनीभूतमपि वेह संज्ञीति स्थितं। यत्तु स्वरूपमात्राश्रयं कार्यं तत्तु ग
णपाठे संज्ञं वाऽपेक्षते यथा प्रथमचरमस्यांऽऽ सोऽप्यत्यादि तदुपसर्जनत्वेऽपि भवत्येवेत्यवधेयं।

श॰कौ॰
२
3

नचैवं युष्मद्युपपदे इत्यादावपि त्वमादिप्रसंगः। लोकप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः। अभिव्यक्तप
दार्थाय इति न्यायात्। तदेतद्ग्रहणमत्र बोद्धव्यं। द्वंद्वे चेति ज्ञापकात्। तच्च तत्रैव वक्ष्यते। प्रयोजनं
सर्वनामाव्ययसंज्ञायामिति वार्त्तिकवचनाच्च तेन परमसर्वतः। परमसर्वत्र। परमसर्वके इत्यत्र समा
सात्तसिलत्रलकच्च सिध्यति। नच तसिलादिविधौ प्रातिपदिकादित्यनुवृत्तेः सर्वनाम्ना च तद्विशेषणात्तदंत
विधिर्भविष्यतीति वाच्यं। समासप्रत्ययविधौ न तदंतविधिरिति निषेधात्। नचैवमतिसर्वायेत्यादावतिप्रसंगः।
उपसर्जनपर्युदासस्यैकत्वात्। अत एव परमसर्वस्मादित्यादौ स्मायादयो भवंत्येव। स्यादेतत्। असः अतस्मिन्नते
षे इत्यादावप्यत्वसमत्वास्मिन्नादीति न स्युः। अतिसर्व इत्यत्रेवोपसर्जनत्वात्। तथा चाब्राह्मण इत्यादेर्ब्राह्मणा
णभिन्न इत्यादिक्रमेणापूर्वपदार्थप्राधान्येन विवरणं कुर्वंति। सत्यं। वैयाकरणमतेन नञ्समासा २

स्योत्तरपदार्थप्राधान्यमेव। नञ्सूत्रे भाष्यकारेण तथैव सिद्धांतितत्वात्। तथाहि आरोपितत्वं न
ञर्थः। तथा च मायामनुष्यमायामृगव्याजनिशाकरवकपटब्राह्मणादिशब्देष्वेवारोपितो मिथ्या
भूतो यो ब्राह्मण इत्येवं शाब्दबोधपर्यवसानेऽब्राह्मणाभिन्न इत्यादिकमार्थिकार्थविवरणं मनु
ष्याद्योपमर्थः। अत एव एतत्तदोरिति सूत्रे नञ्समास इति सार्थकं॥ अत एव चौत्सर्गिकी
नञ्सूत्रस्योत्तरपदार्थप्रधानतापि निर्वहतीति दिक्। ननु यदीह तदंतविधिरिष्टस्तर्हि भाष्य
विरोधः॥ तत्र हि संज्ञोपसर्जनप्रतिषेध इति वार्त्तिकस्य प्रत्याख्यानमुपक्रम्यार्थद्वारकं विभक्तिविशे
षणमाश्रित्यातिप्रसंग उद्धृतः। सर्वनामार्थसमवेतसंख्याकारकाद्यभिधायिनो ङेः स्मै स्मादित्यादिनाऽङ्करी
त्यात् तदंतविधौ सति त्वति सर्वायेत्यादौ समुदायस्य सर्वनामतयाऽर्थद्वारकविभक्तियोगाश्रयणेऽपि स्मा।

शु॰ कौ॰ ५

यादिप्रसंगस्तद्वत्स्यएवस्यादितिचेत्सत्यं ॥ अतएवापरितोषाद्वाध्येऽथवामहतीयंसंज्ञाक्रियत
इतिपक्षांतरमुपन्यस्तमितिगृहाण। ननुयदीयमन्वर्थसंज्ञातर्हिपूर्वपदात्संज्ञायामगइतिण
त्वंस्यादितिचेत्सत्यं। अतएवनिपातनात्सत्वाभावः। सणत्वंतद्रूपमसाध्वेवनिपातनेनणत्वशास्त्र
स्यबाधितत्वात्॥ अतएवशाश्वत्कइत्याद्यप्यसाध्वेव। येषांचविरोधःशाश्वतिकइतिनिपातनेन
इत्सस्कोतादित्यस्यबाधितत्वात्। नन्वेवमपरस्य णः क्रियासातत्येइतिनिपातनेनसंततनश
ह्रीबाध्येतेतिचेन्न। तन्नसातत्यइत्यनेनैवएकदेशानुमतिद्वारासंलोपदर्शनपमः कृत्यइतिपूर्वाचार्य ५
पठितस्यश्लोकस्यैवज्ञापनात्। नन्वेवमपिपुराणप्रोक्तेषुब्राह्मणकल्पेष्वितिपुराणशब्देनपुरात
नशाहस्यबाधःप्राप्नोति। सत्यं। पृषोदरादिषुपुरातनशब्दस्यपाठोबोद्धव्यः। आगमशास्त्रस्या

व्यपदिलोपस्य चानित्यत्वमात्रं पुराणोक्तिनिर्देशो न गण्यत इति तत्त्वं। न देवे वाधकान्येव निपातनानी
ति भाष्ये स्थितं। यदा। नेदं संज्ञासूत्रे किंतु गणसुद्धिमात्रफलकं। प्राप्ति सर्वनामानि तान्येव सर्वादीनि
न तु तत्गणपठितानि व्याख्यानात्। यथा तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोरिति सूत्रे कुत्सनाभीक्ष्ण्ययोरि
ति योगं विभज्य गोत्रादीनीत्यनुवर्त्य तत्र योगे यावन्ति वर्त्तन्ते तान्येव गोत्रादीनीति गणसुद्धिपरतया व्याख्या
स्यते। तेन च न चिद्दिव गोत्रादितद्धितान्ते डिते घगते: कुत्सने च सुप्य गोत्रादाविति सूत्रयो व्यपि विशिष्ठ
र्थानामेव गोत्रादीनां ग्रहणं तथेहापि। ननूक्तरीत्या त्यदादीनाम अस्वाय सर्वगणकार्यं सिध्यतु। सर्वना
म्नः स्मै इत्यादिकं तु कृत्स्नसकलादिशब्देषु ति व्याप्तं स्यादिति चेन्न। गणपाठसामर्थ्यात्तत्र पठितानां
मेव ग्रहणात्। एतावानेव हि भेदो यत्सर्वोक्तेपक्षे संज्ञाविधौ गणसुद्धिस्त्वार्थिकी। अस्मिंस्तु पक्षे गण

शुद्धिस्तथा ह्रीकृत्स्नादिव्यावृत्तिस्तदर्थादिति प्रत्यवोऽभयमनेनाक्षिप्यते· पाठशुद्धिः संज्ञा च। तत्राद्यस्यैकशे
षाणामन्यतमाश्रयणात्। तत्र सहविवक्षां विनापि वाच्यतिरैकशेषः· आकृतिपक्षे हि प्रत्याख्यानेन सरूपसूत्रमि
कोऽपुणद्वौ इत्यादि वक्ष्यमाणप्रक्रियायां तिस्रः हे विवक्षां विना पञ्चैकशेषं विधत्ते। तदित्थं पञ्चापि पक्षाः स्थि
ताः। संज्ञाभूतानां व्यावृत्तिस्तु गौणमुख्यन्यायेनापि सिध्यति। तच्चासौ पटकार्ये घटवेति वाच्य
विशिष्टरूपोपादानेन सर्वत्र तत्प्रवृत्तेरित्युपपादितमोक्तसूत्रे। वार्त्तिकरीत्यानेकसंज्ञाधिकारे स
र्वनामसंज्ञामन्तरमेकव्यानिवेशिनी संज्ञेति संज्ञा से त्वया सर्वनामसंज्ञा बाध्यत इत्यपि समाधानां
तरं बोध्यं। यत्त पूर्वपरावरेति गणसूत्रे संज्ञायामिति योगविभागात्पूर्वोक्तन्त्वयो· शेषा व्याख्ये
यः। उक्ताः सर्वादयः वक्ष्यमाणाः त्यादयश्चासंज्ञायामिति। तस्मादुपसर्जनव्यावृत्तिरेवान्वर्थसं ५

ह्राग्रहणस्य सार्थक्यं फलं। नन्वनुपसर्जनादिति योगं अकारान्तरेण व्याख्यायतद्धलेनैवान्तर्गण
कार्यं वारितं भाष्ये। तद्यथा। अनुपसर्जनेति लुप्तषष्ठीकं पदं। अआदिति च छेदः। अश्च अश्च तयोः
समाहारः आत्। अकारान्तयोरअअदित्यादेशौ यत्र क्रियेते न त्वनुपसर्जनस्य ग्रहणमिति परि-
भाषार्थः। तेन तस्य दायत्तं अजन्तत्वादिभ्य इत्यदमावस्य गौणतायां न भवति। अकारान्तत्वेन विशेष-
णे किं। पञ्चम्या अत्। पुष्पान्निक्रान्तेभ्योऽतिपुष्पत्। एकवचनस्य च। पुष्पान्निक्रान्तात् अतिपुष्प-
त्। न त्वयमकारान्तयोर्विधीयत इति। तथा चोपसर्जनव्यावृत्तेरप्यन्यथासिद्धौ किं महासंज्ञयेति
चेन्न अतिसर्वायेत्यादिवारणस्य तदेकसाध्यत्वात्। नहीदमनुपसर्जनादित्यनेन साधयितुं शक्य-
ते। एतद्देहरितोषादेव हि भाष्ये पदान्तरग्रहणमिति दिक्। एवं चानुपसर्जनादिति सूत्रं परिभाषात्वेना

पिनोपपद्यत इत्यर्थात्प्रत्याख्यानमेवभवतीत्यवधेयं। स्यादेतत् कौंभकारेयसिद्धये सूत्रमारंभणी
यं। तत्रहि कुंभकारेभ्यःशाह्लादेवढगुत्पादयितव्यः। अन्यथा कुंभेत्तुकारस्य वृद्धिर्न स्यात्। तथाचवि
शिष्टस्यैवप्रत्ययांततापेक्ष्या। साचतदैवनिर्वहति। यदिदिक्षाणाजिति सूत्रेप्रत्ययग्रहणपरि
भाषयाऽणीत्यनेनाणंतग्रहणंतेनचप्रातिपदिकविशेषणादणंतांतप्रकृतिः स्यात्। तत्रचसमास
प्रत्ययविधौप्रतिषेध इतिग्रहणवताप्रातिपदिकेनचतदंतविधेर्निषेधाद्दुर्लभः। अनुपसर्जना
दिति उपसर्जननिषेधसामर्थ्याच्चप्रधानेनतदंतविधौज्ञापिते कौंभकारेयः सिध्यतीतिस्पष्ट
मेव। नचकृद्ग्रहणेगतिकारकपूर्वस्यापीतिपरिभाषयाकुंभकारशब्दादेवस्त्रीप्रत्ययोत्पत्तिनिवार्य ६
अत्राणीतिनिहितत्वनिहितोपिगृह्यते औपगवीतियथा कृद्ग्रहण इतिपरिभाषा नकृन्मात्रग्रहणेप्रवर्ततेनतत्कृद

कृद्ग्रहणेऽपि। एवमर्थमेवेदं सूत्रमिति भाष्यकृतैव चतुर्थे स्थापयिष्यते। तत्कथमिहोक्तमनुप
सर्जनादित्ययं योगः प्रत्याख्यायत इति। अत्रोच्यते। चतुर्थे सूत्रकाराभिप्रायवर्णनमात्रं करिष्यते
ति षष्ठे तु क्रियमाणे सूत्रं वैयर्थ्यमेवायातीत्याशयेनेह भगवतोक्तं प्रत्याख्यायत इति। तथा
हि कारशब्दान्ङीकुर्वन्नावपि कौमकारेयः सिध्यत्येव। ष्यङः संप्रसारणमित्यत्र भाष्यकृतापदि
ष्यमाणया वाचनिक्या स्त्रीप्रत्यये चानुपसर्जने नेति परिभाषयाऽनुपसर्जने स्त्रीप्रत्यये तदादिनि
यमनिषेधेनक्तं भकारो ग्राह्यो न ष्फगुत्पत्तेः। अत एव हि परमकारीषगन्धीपुत्र इत्यत्र ष्यङः तस्याव्य
मानेत संप्रसारणं परमकारीषगंध्याशब्दस्यापि भवत्येव। न चैवमतिकारीषगंध्यापुत्र इत्यादावति
प्रसंगः। अनुपसर्जन इत्युक्तत्वेनोपसर्जने तदादिनियमसत्त्वात्। न चैवमर्द्धपिप्पलीत्यादौ हल्ङ्यारि

श· कौ·
७
7

लोपोनस्यादितिवाच्यं। हल्ङ्यादिसूत्रेदीर्घग्रहणसामर्थ्येनतत्रोपसर्जनेनापितदादितियत्नोना
स्तीतिज्ञापितत्वात्। वस्तुतस्तुनिष्कौशाम्ब्यादेःसमुदायस्याङ्यन्तत्वेपिवयवस्याङ्यन्ततयात
तःपरस्यसोर्लोपप्राप्तेर्नेनज्ञापकं। अर्द्धपिप्पल्यादावयवस्याङ्यन्ततयैवनिर्वाहः। नचविहितवि
शेषणंतावन्नशक्यं। यासेत्यादावव्याप्तेः। नचतत्रहल्लेनादिहितत्वेननिर्वाहः। कर्त्रीहर्नेत्यादावलो
पापत्तेः। यःसख्यादौलोपापत्तेश्च। यद्वा। स्तिसीतिप्रत्ययैःप्रकृतिराक्षिप्यते। हलन्त्यसूत्रेकैयटग्रंथनि
र्वाहायविवरणेतथैववर्णनात्। एवंचज्ञापकंसुस्थं। एकदेशस्याप्रकृतित्वात्। अतएवपंचमसमा
सेगोस्त्रियोरुपसर्जनस्येतिसूत्रेचकैयटेनज्ञापकत्वपक्षएवोक्तः। तन्नुभयथापिदृष्टामालेत्यादौ
समुदायावाबन्तत्वप्रयुक्तःसुःस्यात्तन्मध्येकपद्येकस्त्वयंयोरापत्तिः। एकवाक्यतयाविधिरितिपक्षेपि

पचतिकल्पमित्यादिसिद्धयेएकवचनमुत्सर्गः इत्यस्यावश्याश्रयणीयत्वादितिचेन्न। ग्राह्यग्रहण
स्यात्यार्थत्वाप्याययथाकथंचित्प्रातिपदिकग्रहणेलिंगविशिष्टग्रहणेनङ्याबंतत्वात्तत्स्वरूपेणैव
दपमाणत्वात्। इहचसमुदायस्यप्रातिपदिकत्वात्। अर्थवत्समुदायानांसमासग्रहणंनियमार्थ
मितिहिस्यास्पत्ति। नन्वेवमपिकदाचित्कारीशब्दात्तूफकस्मादेवेतिवाच्यं। एकाज्द्विर्वचनन्याये
नसमुदायादेवोत्पत्तेः कुंभेनैकार्थीभूतस्यतिष्ठस्यापत्येनयोगइतिवक्तुमशक्यत्वाच्च। किंच सूत्रमारंभ
माणस्यापिपैवगतिः। श्रोपगवीत्यादाविवकेवलात्कारशब्दादपिकदाचिन्ङीप्प्रसंगेनकौंभकारेय
पादिकरोधस्यतत्स्वरूपत्वेपितत्स्यत्वात्। स्यादेतत्। अक्रियमाणेऽस्मिन्सूत्रेकुंभकारीत्यत्रङीवेवनस्यात्।
कुंभेनैकार्थीभूतस्याणंतस्यङीविनायोगात्। यस्यचङीतेनयोगोविष्टस्यनतदणंतं। तस्मादमहत्स्वी

दितिनिषेधेनत्ताप्यमानस्तदंतविधिरुत्तरत्राप्यभ्युपगंतव्यः। सचयथासर्वत्रोपसर्जनेनापिभवति
नषट्स्वस्रादिभ्यः। प्रियपंचाद्रौपदी। वनोरच। अतिधीवरीति तथाटिड्ढादावपिस्यात्। ततश्चवक्र
कुरुचरेत्यादावपिप्रसंगः। अतोनिषेधसूत्रमिदंसार्थकं॥ ननुसर्वत्रोपात्तंतदंतंचास्त्रियामित्यने
नविशेष्यतेटिड्ढाणञित्यादौतूपात्तंटिदादिकमेव। तेनवक्रकुरुचरेत्यादौटिदादेरस्त्रीत्वान्नङीप्।
कुंभकारीत्यादौत्वणोनस्यास्त्रियांहतेनस्तदंतादपिङीप्भवतीतिचेत्। एतद्विषयविभागस्यदुरूहत
यातद्भावनार्थमेवसूत्रारंभस्योचितत्वादिति। नैतदेवं आरब्धेप्यस्मिन्सूत्रेव्याख्यानस्यैवशरणी
करणीयत्वात्। अन्यथापंचाजीत्यत्राजानामस्त्रीत्वेपितदंतस्यास्त्रियांवृत्त्याप्रसंगात्। अतो ८
विशेषणविशेष्यभावंप्रतिकामचारादजाद्यतष्टाबित्यत्रटिड्ढाणञित्यादौचोपात्तस्त्रीत्वे

न विशेष्यते। वर्नोरवेत्यादौ तु प्राप्तं तदंतं चेति सकलेष्टसिद्धौ सूत्रं व्यर्थमेव। स्यादेतत्। तदंतवि
धिज्ञापनार्थमेवेदं सूत्रमारंभणीयं। न चामहत्पूर्वेत्यनेनैव तत्सिद्धिरिति वाच्यं। तस्य ज्ञापकता
योगात्। पंचाजीत्यादिसिद्ध्यर्थमजादिभिः स्त्रीत्वं विशेष्यते इति हि वक्ष्यते। तथा च महाशूद्री
त्यत्र समुदायस्य स्त्रियां वृत्तावप्यवयवस्यातथात्वेन सत्यपि तदंतविधौ टाप् न प्राप्नोतीति कथं
तदंतविधिं ज्ञापयित्वा निषेधः पर्यवस्येत्। मैवं। इतरैरजादिभिः स्त्रीत्वविशेषणेऽपि शूद्रश
ब्देनाविशेषणात्। एवं च स्पष्टमेव ज्ञापकपर्यवसानं। न चैवं पंचशूद्रीत्यत्रापि प्रसंगः जाति
रित्यनेन शूद्रस्याविशेषणात्। स्यादेतत्। पूर्वसूत्रनिर्देशो वापिशलमधीमह इतीति कात्यायनो
करीत्यासूत्रे सार्थकं। तथाहि। अप्रधानमुपसर्जनं। तथैव पूर्वाचार्यासूत्रे लोके च व्यवहारा

श्र·कौ·
९
9

तू। न तस्यापिशलिना प्रोक्तमित्यत्रेत्यण्। ततोऽध्येत्रर्थे तदधीत इत्यण्। तस्य प्रोक्ताल्लुगिति

लुक्। आपिशला ब्राह्मणी॥ अत्र प्रोक्तार्थस्याणोऽप्रधानत्वात्तदन्तात् ङीप्। अणो योऽप्रा-

धानमिति विशेषणात्। नचैवमप्यध्येत्र्यामत्यत्र स्याणोऽनुपसर्जनत्वात्तदाश्रयो ङीप्

स्यादेवेति वाच्यं। तस्य लुप्तत्वात्। नच प्रत्ययलक्षणेनाशंक्यं। वर्णाश्रये तन्निषेधात्। टिड्ढा-

णञित्यत्र ह्यणित्यनुवर्त्तते। अणा च अकारो विशेष्यते। अणो योऽकार इति। ननु विपरीतो विशे-

षणविशेष्यभावः। वर्णस्याप्राधान्ये प्रत्ययलक्षणापत्तेः। अत एवोऽत्यचत्तण हरस्रूवत्।

ननु स्त्रियामित्यनेनाणो विशेषणान्नोक्तदोष इति चेन्न। काशकृत्स्निना प्रोक्ता मीमां-

सा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी। अत्र द्वितीयाणि प्रोक्ताल्लुगिति लुके प्रथमो ९

मोघ्यणस्त्रियामेवोत्पन्नः इति तदन्ताल्लक्षणं प्रवर्त्तमानान्ङीप्रसंगात्। तस्मात्प्रधानाद्यथास्या
दप्रधानान्माभूदित्येतदर्थमारंभणीयं सूत्रमिति। अत्रोच्यते। अध्येत्र्यामभिधेयायाम
ण ईकारेण भवितव्यं। पश्चेहाध्येत्र्यामण उत्पन्नः सलमेव। पश्चश्रूयते तस्मादीकार उत्प
न्नो लभ्यस्येति पुनर्न भवति। सकृत्प्रवृत्याल्लक्षणस्य चरितार्थत्वात्। तस्मादनुप
सर्जनादित्ययं योगः प्रत्याख्यायत इति भगवङ्कीर्त्तिर्वोधेवेति दिक्॥ सर्वादयः पञ्चपं
चविंशति। सर्वा। विश्व। उभा। उभय। डतर। डतम। अन्य। अन्यतर। इतर। त्वत्। त्वनेम। सम।
सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्या
यां। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मत्। अस्म

प्र·कौ· त । भवत्व । किमु । इति ॥ तत्र सर्वविश्वशब्दौ कृत्वपर्यायौ सर्वशब्दस्य सांकाशिनामित्याद्युदात्त
९ त्वे प्राप्ते नेदात्तत्वं गणे निपात्यते तेन सर्वशब्दो विकार इत्यत्रानुदात्तादेरञ् इति सिद्धं सर्वमनुदात्तादि
10 प्रकृतिकादिष्वधीयते इति ज्ञापकं भाष्ये स्थितं । प्रयोगे तु सर्वस्यापि त्याद्युदात्त एव । उभ
शब्दो द्वित्वविशिष्टस्य वाचकः ॥ अत एव नित्यं द्विवचनांतः । यद्येवं तर्हि किमर्थमसौ सर्वादि
षु पठ्यते । न ह्यत्रस्यापादयः संभवंति । काकचोल्लु नास्ति द्रुपेस्त्वरे वा विशेषः ॥ अवग्रहस्त्व
कप्रत्ययेपि पदकारैर्नाक्रियते । विश्वसृड्राजाराजकादित्यके इत्यादौ तथैव निर्णीतत्वात् । न चोभा
भ्यां हेतुभ्यामुभयोर्हेत्वोरित्यत्र सर्वनाम्नस्तृतीया चेति पाक्षिकतृतीयासिद्ध्यर्थमिह पाठ
इति वाच्यं । निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्त्तिकेन गतार्थत्वात् । नचवृत्ति ९

कृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्त्तिकमपि सर्वनामसंज्ञासापेक्षमेवेति वाच्यं
भाष्ये हेताविति सूत्रे तस्य पठितत्वात्। अत एवान्नेन कारणेन वसत्यन्नस्य कारणस्येत्युदाहृ
तं हरदत्तेन॥ उच्यते। उभशब्दस्तावद्द्विवचनमात्रविषयः। हेतौ तद्द्विवचनलोपान्नासौ प्रयु
ज्यते। उभाभ्यां पक्षाभ्यां विनीतानि द्वाः इति विग्रहे उभयपक्षेत्यादिप्रयोगादर्शनात्। क
थं तर्हि उभशब्दस्थाने उभयशब्दात्सिद्धिरिति चेत्। शृणु। उभादुदात्तो नित्यमित्यत्रोभा
दिति योगो विभज्यते। अवयववृत्तेः संख्यावाचिन उभशब्दादवयवे तयपर्थेऽयच् स्यात्।
उभयो मणिः। ततो नित्यम्। उभशब्दाद्वृत्तिविषये नित्यमयच् स्यात्॥ अतिदिष्टार्थ
त्वात्स्वार्थे। तदेतदुक्तं वार्त्तिककृता उभयोऽन्यत्रेति। एवं स्थिते उभयपुत्रेत्यादाविव क

प्रत्ययेष्वुभयपदप्राप्तः। अकचित्त्वमकाविद्यादिमिज्ञाति। नचेहाप्युभयपदतिस्मादेवेतिवा
च्यः। अकजन्तर्भूसर्वादिषुपाठेनापचोबाधात्। अन्यथापाठवैयर्थ्यापत्तेरितिदिक्। स्त्रांगाश्रि
यमदंतानामित्यापुदात्तार्थपाठइतित्वनयुक्तं। गणपठितोदात्तस्वतिपात्त्वमानत्वात्। अ
न्यथोभेमदेज्योघपेतेउभाउन्नतेउभाभ्यांदेवसवितः सत्यंत्वभयोर्नमगामयोरित्यादावाप्युदा
त्तप्रसंगात्। उभयशब्दस्तवयवदयारथ्येःवयपविनिवर्तते। उभयोमणिरितियथा। यथामलो
हितास्याम्वयवाभ्यामारब्धइत्यर्थः। तिरोहितावयवभेदत्वादेकवचनं। उभयमेववदंति
मनीषिणइत्यादौतसमुदायिद्वयघटितःसमुदायोर्थः। तिरोहितावयवभेदत्वंततत्समेवाप
दाबद्वर्णादयोऽवश्योमहासमुदायमेवर्ततेतेनदावर्णाभिन्नेनवर्णाद्येनसहाभेदविवक्षयाउन्नतावपा।

वमेदत्वाद्द्वकवचनं। तत एव। उभये देवमनुष्याः। तस्मामित्राय मध्यासिञ्जाक्ते ये च ये चोभयेन्न पार
तियथा। यदा तु प्रागुक्तरीत्या उभयो मणिरिति कुत्याय तानाहत्वामेव मणिं द्वयं सहाविवक्ष्यते। त
दापकर्षोपेणाद्विवचनं प्राप्नोति। अनभिधानात्तु न भवति। तथा च तद्धितश्चासर्वविभक्तिरि
ति सूत्रे कृत्तद्धितानां ग्रहणं च पाठे इति भाष्यमवतारयन्कैयट आह। उभयशब्दस्य द्विर्वचनात्तत्वादा
दसर्वविभक्तित्वमिति। हरदत्तस्तु तस्मिन्नेव सूत्रे उभयशब्दाद्द्विवचनमंगीकृत्य पाठाश्रयणं त्वप
चति कल्पपचति रूपमित्यादावतिप्रसंगं वारयितुमित्याह। इहायजादेशस्य स्थानिवद्भावेन
तपप्रत्ययान्ततया प्रथमचरमेति सूत्रे जसि विभाषा प्राप्नोति। व्यवस्थितविभाषया पूर्वविप्रति
षेधेन वा नित्यमेव जसि सर्वनामतेति केचित्। विभक्तिनिरपेक्षत्वेनांतरंगतया नित्यसंज्ञयाव

प्र॰ कौ॰ १२

द्विग्रहणं वैकल्पिकी वाधेति सिद्धान्तः। नवेति विभाषेति सूत्रे भाष्यकारवचनात्। अथ अत्पर्यान्तरमेवन
त्वसौ नस्यादेशः। उञ्छादात्त इति सूत्रे तमपोऽनुवृत्तेः। अयचष्प्रवानुवृत्तेः। नचैवमभयी
इत्यत्र टिड्ढाणञिति सूत्रेण तयपं न तत्र प्रयुक्तोऽपि नस्यादिति वाच्यं। तत्र मात्रजिति मात्रच शब्दा
त्स्मतिरिति अयचष्प्रकारेण प्रत्याहारग्रहणात्। एवं च तयपग्रहणमपि तत्र न कार्यं। यद्वा। द्वय
सज्जिति प्रत्याहारः। तथा च दघ्नच् मात्रचोरपि ग्रहणं न कर्त्तव्यमिति महदेव लाघवं। वस्तुत
स्तु प्रमाणे मात्रच् द्वयसच् दघ्नच् इति पाठ्यमिति भाष्याशयः। तथा तनोपि लाघवं। नचैवं कतित्यय
इत्यत्राति प्रसंगः। अत इत्यनुवृत्तेः। न षट्स्वस्रादिभ्य इति निषेधाद्वा। नचैवं तैलमात्रेत्यादाव
तिप्रसंगः। मतुपप्राप्यस प्रत्याहारे संनिविष्टत्वादिति। अत्र कश्चित्। उभयेत्यर्थपरो निर्देशः। न १२

नव्यर्थाद्द्वयेषामपि मे दिमीम्नतामिति माच प्रयोगः समर्थितो भवतीत्याह । तत्र । अर्थपरता
यां ह्यत्तिकारायाभिप्रुक्तवचनानुपलंभात् । महाकविप्रयोगबलादेवं कल्प्यत इति चेन्न । महाक
विभिरेव तद्विपरीतस्य बहुशः प्रयोगात् । तथा च माघः । गुरुद्वयाय गुरुणोरिति । कालिदा
सोपि । अस्मिन्द्वये रूपविधानयत्न इति । श्रीहर्षश्च । अये ममोदासितमेव जिह्वया द्वयेपि तस्मिन्ननति
प्रयोजन इति । तस्माद्द्वयं द्वैयं द्वयेति गकेतीति द्वयेषु केषां द्वयेषामिति । हेवः किं वंतस्य रूपं बो
ध्यं यत्तत्काश्चिदाह । चारुवर्मणा व्याकरणे द्वयशब्दस्यापि सर्वनामताभ्युपगमात्तदीत्यायं प्रयो
ग इति । तदपि न । मुनित्रयमतेनेदानीमीदृक्साधुविभागः । तस्यैवेदानीतनमार्गैर्द्वैदागतत्वाप
रिग्रहीतत्वात् । दर्पणेनोहितियतकालाः स्मृतयः । यथाकलौपाराशरस्मृतिरित्यादीति शास्त्राच्च द्वय

प्र·कौ·
१२
13

नाघप्रत्ययोरिति सूत्रे सर्वैकवाक्यतयाभिसिद्धांतितत्वात् । डतरडतमौ प्रत्ययौ । यद्यपि संज्ञाविधौ
प्रत्ययग्रहणे तदंतग्रहणं नास्तीति तथापीह प्रयोजनं सर्वनाम्नामव्ययसंज्ञायामिति वाचनिकस्तदंत
विधिः । केवलयोः संज्ञायां प्रयोजनाभावात् । अन्योभिन्नः । अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद्वि
बहुविषये निर्धारणे वर्त्तेते इति यस्य भाष्ये कैयटः । तत्रान्यतमशब्दस्य गणे पाठाभावान्न सर्व
नामकार्यम् । नाप्यड्डतरादिभ्य इत्याद्यंतर्गणकार्यम् । तथा च प्रयुज्यते । न तावत्सामान्यादिवदन्यतमं त
मइति । शाकटायनस्त्वन्यतरोऽन्यतमौ डतरडतमांतौ व्युत्पादितवान् । तन्मतेऽप्यन्यतरग्रहणाद
स्य नियमार्थत्वात् । अन्यतमशब्दो न गणे कार्यं सर्वं नामकार्यं च न लभत इति सिद्धं व्याख्यातारः । इतरस्त्व १२
न्यनीचयोरित्यमरः । त्वत्वशब्दावप्यंतावन्यपर्यायौ । तत्रैकउदात्तः ४ । अपरोऽनुदात्त इत्येके । एवं

त्वं मन्ये दमूणं त्वमनुत्तानामित्युदात्तस्य प्रयोगात् । तत्वः पशुपतिरित्यादिरनुदात्तस्येति विवेकः । केचि
त्त्वदिति तांतमेकं पठंति । तथा च मयदेवः । त्वदपरमधुरमपत्रनिपिवंतामिति । त्वतःश्रुत्वस्याः
श्च परइति षष्ठीतत्पुरुषः । न तु त्वतः अपरस्त्वदपरइति । पशुपतिर्दिशांशिदिशिरहसि सर्वंतमिति
सर्ववाक्येन सहानन्वयापत्तेः । अनुदात्तत्वापं । त्वत् त्वमसि मे त्वमनुच्छामीति फिट्सूत्रात् । तथा च श
श्रूयते । त्वरीहत्वज्ञ्वतिसृत उत्वदिति । त्वदिति सर्वनामसु पठितोऽनुदात्तोऽयमन्यपर्यायइति तद्व्या
ख्यायां वेदभाष्यकाराः । इह प्रागुक्तरीत्या उदात्तानुदात्तयोरकारांतयोरनुदात्तस्य नकारांतस्य
च प्रामाणिकत्वे निर्विवादमेव । गणेऽपरं विप्रतिपत्तिः । तत्राप्यनुदात्तस्याकारांतस्य गणपाठेन
संशयः । उतोत्वस्मैतत्वमित्यादिप्रयोगात् । अवशिष्टयोर्मध्ये कतरस्य गणे पाठ इति तु संशयः । उदा

प्रा॰ कौ॰
१४
14

एतत्प्रयोगाणां तत्रैवोदाहरिष्यमाणत्वात्। तस्मात्तेषां तस्याकजादिकमुदानस्य वा स्मायादिकं क्वचित्कार्यं
प्रयुज्यते न वेति विभाव्यतां नैर्णीयं बहुभिरिति दिक्। यस्तु तत्त्वा यस्य तां तद्धेद एव पुरुक्तः अन्यापेक्षा
कशब्दस्य स्वस्य सर्वनाम्नः एकस्मिन्नुभयसंग्रहसंभवात् त्वशब्दमेकमेवापठिष्यदिति ध्येयं। स्वेव सन्ति। तेषु
श्यादय स्त्रेषो प्रत्ययांतस्य पुष्टदः प्रयोगाः। न तु त्वशब्दस्य। पदकारैः प्रगृह्यत्वप्रयुक्तस्य इति शब्दस्य प्रयो
गादिति स्थितं वेदभाष्ये। नेम इत्यर्द्धे। प्रयोगश्च। प्रनेमस्मिन्दृष्टे सोमस्य इति। समः सर्वपर्यायः। नमंता
मन्यके समे। मानो हृकापदृको समस्मै। उरुष्याणो अघायतः समस्मात्। उतो समस्मिन्। तुल्यपर्याय
स्य तु समशब्दस्य न सर्वनामता। यथासंख्यमनुदेशः समानामिति ज्ञापकात्। कृत्स्ने जंतर इति सूत्रे एते
दोषाः समा भूयांसो वेति भाष्यकारप्रयोगाच्च। एतेन समे यजेते ते इति प्रयोगो व्याख्यातः। सिमः कृत्स्नेत्व वश १४

क्तेच स्यान्न सर्वादावद्वयोरिति निषेधः। आढ्याढ्यीवासत्त्वन्ते सिमस्मै। उक्तक्रमत्कमजन्ते सिमस्मात्
पद्यपीह त्वत्त्वसमसिमेत्यनुच्चानीति प्राप्ते तथापि सिमस्यापूर्वणोन्ते उदात्तः स्वरितदात्तता। अथर्वण
वेदप्रविष्टे मंत्रे ऋग्वेदादित्वानेपीति अभिमुक्तेर्वपाव्यातत्वादित्यवधेयं। पूर्वपरावरोत्तरापराः पंच
दिक्कालयोस्तदवच्छिन्ने च। पूर्वस्यां दिशि पूर्वस्मिन्काले पूर्वस्यां वा पूर्वस्मिन्नपरावित्यादि। दक्षि
णापरस्मै दिशि तदवच्छिन्ने च। अर्थनियमश्चायं व्यवस्थायामित्युक्तेर्गम्यते। स्वाभिधेयेनापेक्ष्य
माणावध्यवधेर्नियमो हि व्यवस्था। एषां दिशां नाम्नामुक्तोर्थो हि नियमेन कंचिदवधिमपेक्षते। स्था
गापापचोभावे इति क्तिनि प्राप्ते नपुवन्निपातनाट्टः। व्यवस्थायां किं। दक्षिणा गाथकाः। प्रवीणा इत्य
र्थः। अधरे तांबूलरागाः। उत्तरप्रत्युत्तरे वा शक्तः। कथं तर्हि तथापरेषां प्रचिचेति कालिदासः। अघरेप्र

शा.कौ. त्वतिष्ठते इत्यादि च। अत्राहुः। देशवाचितया व्यवस्थाविषययोरेव परापरशब्दयोरुपचाराच्छ
१५ त्रौ प्रतिवादिनि च प्रयोगः। न चैवमुपसर्जनता। न हि लाक्षणिकत्वमुपसर्जनत्वं किं तु स्वार्थविशि
15 ष्टार्थान्तरसंक्रमः स तु न वृत्तिप्रविष्टस्यापि प्रधानस्य नवालाक्षणिकस्यापि वृत्तिमप्रविष्टस्य। अत ए
व तस्माद्दक्षिमानित्यादौ त्वानलक्षणपक्षेऽपि सर्वनामकार्यं। तथोहं सो सौ यो सौ सोहमित्यत्र
भागत्यागलक्षणायामपि सर्वनामकार्यप्रवृत्तिरिति। भ्वादिसूत्रे एतान्यपीति एतत्प्रतिपाद्य।
तिवस्तूनीत्यर्थ इति कैयटग्रंथः। वस्तुतस्त्वत्र शत्रुत्वादिप्रकारको बोधोऽनया दिशाह्येभ्योऽभिन्नत्वादे
दिवार्थिकः। एवं हस्तेऽपि देशान्तरं तिष्ठत्वादिप्रकारकमेवेति तत्त्वं। असंज्ञायां किं। उत्तराः कुरवः। स्वमेरु
मवधिमपेक्ष्य कुरुरुत्तरशब्दो वर्तत इत्यस्तीह व्यवस्था। प्रसिद्धत्वात्तु नावधेः प्रयोगः। मेघो वर्षतीत्य १५

त्रजलस्य पथ्या। एवं दिशः सपत्नी भवदाचिणस्य हित्वा दावपि वस्तुतो व्यवस्थाऽस्तीति सर्वनामका
र्यं संभवत्येव। न च संज्ञात्वान्निषेधः। आधुनिकसंकेतो हि संज्ञा। न च दिक्त्वमस्तीति पंचमेऽस्तीति
प्रकरणे कैयटहरदत्तादयः। अत्र दिक्त्वं चिरंतनः प्रसिद्धत्वाधुनिकसंकेत इत्यत्र व्याख्यानत्ववचनमेव प्र
माणं। स्वशब्दस्य चत्वारोऽर्थाः आत्मा आत्मीयो ज्ञातिर्धनं चेति। तत्राद्ययोरात्मनि स्वं त्रिधात्मीये स्वोऽस्त्रि
यां धने इत्यमरः। यथाऽसि स्वामिनेत्यर्थ इति सूत्रे ईश्वरत्ववाच्यपि स्वशब्दः। स्वीकृतं स्वं यथाप्यसौ भक्त
र्थी याति निवृत्तप्रत्ययमात्रविषयेन तु केवलः प्रयोगार्हः। तत्र ज्ञातिधनयोर्निषेधादात्मात्मीय
योरेव संज्ञा। आख्याग्रहणं किं। आत्मीयत्वं पुरस्कृत्य ज्ञातिधनयोरपि प्रवृत्तौ सर्वनामता यथा
स्यात्। आत्मात्मीययोरित्येव तु वक्तुमिहोचितं। स्वस्मै इत्यादि। जसि विभाषा विधायकेन तु टाप्यपि

पा॰को॰
९
16

स्येमसूत्रेप्येवं। यत्तुस्वमात्मीयइत्येववक्तुमुचितं। आत्मवाचिनोनपुंसकतयाजसिविभाषायामनुपयो
गाभावाच्चितिकेचित्। तच्चिंत्यं। सूत्रसामर्थ्यादेवात्मन्यपिपुंस्त्वलाभात्। अतएवामरकोशेपिआत्म
नीतिपूर्वोत्तस्मिन्स्वमितिज्ञत्यात्मनि। तथाचहेमचंद्रः। गौः स्वर्गेनभसोः स्वोज्ञात्यात्मनोः स्वतिजेध
नेइति। मेदिनीकारोपि। स्वः स्यात्पुंस्यात्मनिज्ञातौत्रिष्वात्मीयेस्त्रियांधनेइति। वस्तुतस्तुपूर्वपरेत्या
दित्रिसूत्र्यामर्थनिर्देशः पाठविशेषणं। तेनैपितरेषांपाठादेवपर्युदासः। तथाचविभाषाज
सीतिप्रकरणेपूर्वादीतिनवेत्येवलाघवात्कर्त्तव्यं। त्रिसूत्रीतुनपठनीयैवेतिनिष्कर्षः। अथवा
गणपाठएवपूर्वादिनवकपाठानंतरंविभाषाजसीतिकर्त्तव्यं। पूर्वादीनिचार्थविशिष्टान्यत्र
र्वत्तनीयानि। नचसर्वादीनामप्यनुवृत्तिःशंक्या। नेमस्यजसिविभाषारंभात्। यद्वा। जस्ङसिङ्योनाशि

स्मात्स्मिनः पूर्वादिभ्यो नवभ्यो वा। औङ आपः शी॥ नपुंसकाच्चेति समसमेस्यासः कर्त्तव्यः।परमा
र्थे नसूत्रसमसमेयथान्यासमेवास्तु॥ पूर्वादिभ्यो नवभ्यो वेत्येतत्तु जसः शी इत्यत्रानुवर्त्त्यवाक्यभे
देन संभत्स्यते। वाच्छेदसीत्येतदपि पूर्वं इत्यत्र यथा। तथा चेयं पिसिसृक्षी अष्टाध्याय्यां न पाठ्ये।
ति स्थितं। असंज्ञायामिति तु न कार्यं। अन्वर्थसंज्ञया ऽभिव्यक्तपदार्था य इति न्यायेन वा सं
ज्ञायाः खुदस्तत्वात्। अंतरशब्दस्तु नानार्थः। तथा चामरः। अंतरमवकाशावधिपरिधानां
तर्द्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि चेति। तत्र बहिर्योगोपसंव्या
नयोरेवार्थयोः संज्ञा। बहिरित्यनावृत्तो देशो बाह्यं चोच्यते। तत्राद्ये ऽन्तरे। अंतरा वा गृहाः नगरबा
ह्यचण्डालादिगृहा इत्यर्थः। द्वितीये नगराभ्यंतरगृहा इत्यर्थः। उपसंव्यानशब्दो ऽपि करणव्युत्पत्त्या

प्र॰ कौ॰
८
17

उत्तरीयपरः। कर्मव्युत्पत्त्या तूत्तरीयपरः। उभयथापि बहिर्योगेण गतार्थत्वात्। उपसंव्यानग्रहणं
नकर्त्तव्यमिति भाष्ये स्थितं। केचित्तु शाटकानां त्रये शरीरसंयुक्तस्योत्तरीयस्य चतुष्टये तु चतुर्थस्य
तत्संयुक्तस्य चोत्तरीयस्य बहिर्योगाभावादुपसंव्यानग्रहणं कर्त्तव्यं। शाटकयुगाद्यर्थमिति वदन्तो
वार्त्तिककारस्याप्ययमेवाशय इत्यादिशाहबलादवगम्यते। भाष्यमते तु बहिर्योगग्रहणं स्वयं ने
तेनश्रीनितोषाम्भांकारिणीत्यादाविव गौणग्रहणात्त्वंरपरस्यावाच्यसंबंधस्यापि भविष्यतीत्या
हुः। सत्यपि बहिर्योगे पुरीविषयतायां न सर्वनामता। अपुरीति वक्तव्यमिति वार्त्तिकात्। स
ह्निगणसूत्रस्य शेषो न तु जसि विभाषाविधायकस्यात्। त्यपि कृत्वा जसः शीविधानात्वावेतत्या ८
प्यभावात्। अन्तरायां पुरि प्राकारादावन्यायां न दन्तवर्त्तिन्यां वेत्यर्थः। लिंगविशिष्टपरिभाषया पकादेशस्य पूर्वा

तग्रहणोनग्रहाद्वाभामिर्वीप्सा। त्यदा। तदुपतौ एवौक्तपरामर्शकौ। तत्रायस्थूदसः। एवस्याभा
न्तुरितिगणएवतत्कारस्तत्र। तथा सति सस्थूदसि बऊलमितिसूत्रे छंदोग्रहणवैयर्थ्यापत्तेः। पञ्च
हेश्चपसमर्पकः। एतदिदमो प्रत्यक्षोपस्थिते॥ अदसूव्यवहिते। एकोऽन्यार्थे प्रधाने च प्रथमे केव
ले तथा। साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते॥ द्विशब्दो द्वित्वविशिष्टः। अलिंगसंबोधनेक
विषयश्च युष्मदर्थः। अस्मच्छब्दस्तूच्चारयितृअर्थः। सलिंगः संबोधनव्यभिचारी च भवतूर्थः। भा
तेर्डवतुरितिक्षुत्यादिनोयं। यद्यप्यस्मात्साधादयोन भान्ती। सर्वनाम्नस्तृती याचेति तन्निमि
त्तकारस्महेतञ्च सर्वासां प्राधान्यं नामितपनेनैवगतार्थः। तथापि। किमङ्किमयदः पूर्वनिपातस्तष्टक
च्छेसौतथा। आत्वशेषषष्ठ्यन्त्वविरहाग्रकञ्चभवतः फलं। फिज्ञा। भावतायनिः। त्यदादित्वेन हदृत्वादूरी

चोहृद्धादितिफिञ्। भवंतमंचतीतिभवद्र्यङ्। विश्वग्देवयोश्चेतिचकारेणसर्वनाम्नोऽनुकर्षणा
द्द्यादेशः। भवन्मयः। नित्यंवृद्धशरादिभ्यइतिमयट्। भवत्मित्रः। सर्वनामसंख्ययोरितिप्राङ्निपातः
भावत्कः। भवदीयः। भवतष्ठक्छसावित्यत्रहिशत्रंतलिङ्गव्यपेहृद्धादित्यनुवर्त्तते। आत्वं। भवादृक्।
आसर्वनाम्नइत्यात्वं। देवदत्तश्चभवांश्चभवंतौ। त्यदादीनिसर्वैर्नित्यमित्येकशेषः। भवतोभावोभवत्ते
त्वत्रसर्वनामसंज्ञायागुणवचनसंज्ञाबाधनात्स्यात्वविरहोपिफलं। अत्यथाहिभावत्यमितिस्या
त्। भवकान्। सर्वनाम्नोवृत्तिमात्रेपुंवद्भावोपिफलं। भवत्याःपुत्रोभवत्पुत्रः। किंशब्दःप्रश्ने
आक्षेपेचेतिदिक् ॥ हृत॥ सर्वादिगणेवृत्तःसमाप्तइत्यर्थः ॥ ॥यदिन्द्राग्नीअवमस्यांपृथि
व्यामध्यमस्यांपरमस्यामुतस्थइत्यत्रत्ववममध्यमपरमशब्देषुछंदसिसकलविधिव्यत्ययात्स्याडागा १८

मः। नत्वेतदनुरोधेन सर्वादेराकृतिगणत्वमिति मंतव्यं। अत एव त्वत्कं दस्यापि सर्वनामकार्यमेषांत
नियतं। येमध्यमाः पितरः। विभाः पदे परमे इत्यादौ तदभावात्। वस्तुतस्तूभौतावितरेतरस्मात्।
अन्योन्येषां पुष्करैरामरणांतर इत्यादिनाद्विः प्रयोगो द्विर्वचनमिति पदेतनंदत विधिनासिद्धं। स्थाने
द्विर्वचनपक्षे तस्यानिवद्भावेनैत्यवधेयं। ननु वस्त्वसाधारणविप्रकृतिप्रत्ययविभागस्यसंमोहस्या
निवद्भावेनापिपदत्वमात्रस्यात्र तु सर्वनामतासुविशिष्टस्यानितिनताद्विरहादिति चेन्न। सन्नियोग
शिष्टत्वेनांतरंगमपिद्वित्वं बाधित्वा समासवच्चवक्तलमिति समासवद्भावप्रवृत्तस्यलकः प्रथमप्रह
तेः। अंतरंगानपिविधीन्बहिरंगोलुग्बाधत इति वक्ष्यमाणत्वात्। ततः प्रत्ययलक्षणेन पदत्वमाश्रित्य
द्वित्वप्रवृत्तेः। एतेनननत्तामसम्सृजभीनय इत्यादि व्याख्यातं। ननु स्तुत्करीत्यादिः नरेतरस्मादित्यस्यासिद्धिः। अ

सि
३१.९१।

प्र॰ को॰ १९ 19

न्योन्येषामितितत्कथं। नह्यत्रसमासवद्भावोऽस्तीतिचेत्। नत्रप्रथमैकवचनांतत्वंपूर्वपदे। द्वितीया
द्यन्तत्वंपरपदेइतिवचनबलेनैवप्रकृतिप्रत्ययविभागस्यासिद्धेरितिदिक्। वस्तुतस्तुज्ञानपदोपप
भिरितितद्वत्प्राइतरेयेभ्यइतिबहुव्रीहिणासमाधेयं। नसर्वइतिज्ञापकात्सर्वनाम्नःपूर्वनिपातोऽतिसः
पुत्रादेकान्यराजपइतिप्राधान्यादिनाप्राख्यातादित्यर्थश्चाख्यातर्णिजंताल्लुज्जर्थेकप्रत्ययेलाघ
णिकस्यसर्वनामताविरहात्समाधेयं॥ विभाषादिकसमासेबहुव्रीहौ॥ अत्रसर्वनाम
संज्ञावास्यात्। उत्तरपूर्वस्यै। उत्तरपूर्वायै। दिङ्नामान्यन्तरालइतिप्रतिपदोक्तोदिक्समासोगृह्यते।
तेनेहन। यापूर्वासेवोत्तरायस्यैगांतस्यैतस्मैपूर्वोत्तराय। एवंचबहुव्रीहिग्रहणंनकर्तव्यंवादक्षिणो १९
त्तरपूर्वाणामितिद्वंद्वस्यलक्षणाप्रतिपदोक्तपरिभाषयैववारणात्। नन्वत्तरार्थंततः। तथाहि। एकंबहुव्री

ह्विवत्। आबाधे चेति द्विर्भावे एकैकस्मै देहि। दक्षिणदक्षिणस्मै इत्यादीष्यते। नत्रोत्तरसूत्रेण
निषेधो मा भूत्। बहुव्रीहिरेव यो बहुव्रीहिर्न तत्र निर्दिष्टबहुव्रीहिस्तत्रैव यथा स्यादिति। एवं समा
सग्रहणानुवृत्त्या गुणकार्यस्याभावात्। उत्तरसूत्रस्य प्रत्याख्यानाच्च॥ ॥ न बहुव्रीहौ ॥ बहुव्रीहौ क
र्त्तव्ये सति सर्वनामसंज्ञा न स्यात्। त्वकं पिता यस्य स त्वत्कपितृकः। अहकं पिता यस्य मत्कपितृकः। ठकोपु
त्रैयस्याधिकपुत्रः। इह हि समासवृत्तेः प्रागन्तरंगत्वादकच् प्रवर्त्तेत। स च समासे सत्यपि श्रूयेत। अतिक्रां
तो मत्त्वकं तमतिमत्त्वकानिति वत्। न हि वृत्तेः प्रागस्त्युपसर्जनताऽस्ति। ननु यदि प्रागेव प्राप्नुवन्नकच
निवर्त्तितस्तर्हि त्वकंपितेत्यादिकथं विशृष्यते। त्वत्कः पितेत्यादिकप्रत्ययप्रदर्शनोचित्यादिति चेन्न।
अंतोऽसि। न हि यास्मिन्याक्रिया वाक्ये उत्सृष्टा मात्रयोगो वरे बहुव्रीहिसंज्ञाप्रवृत्ता सर्वनामसंख्या चातिषि।

ह्यानत्वमुच्यतेऽपरिनिष्ठितत्वात्। किंतु तत्सदृशं बहुव्रीहिसंज्ञाशून्यं वाक्यांतरमेव। यदाह
कैयटः। अत्र योगसमवायिपदार्थक्रियावाक्यं तत्रायं निषेधो न तु लौकिके तस्य पृथगेव प्रयोगात्ता
दर्थ्याभावादिति। अत एव दृष्टाः सर्वे येनेव विग्रहः न तु सर्वा इति। राज्ञः पुरुष इत्यादि विग्रहेपि
ऽप्येवं गतिः। अलौकिके वाक्ये ऽलोपो न इत्यादेरप्रवृत्तेः॥ अंतरंगानपि विधीनिति सिद्धांतात्। अत ए
व गोमत्प्रिय इत्यादौ सोर्लुगेव न तु हल्ङ्यादिलोपः। तेन नुम्दीर्घादयो न प्रवर्तंते। भाष्येतु त्वकत्पि
त्क इत्यादौ चैवं रूपं स्वीकृत्येदं सूत्रं प्रत्याख्यातं। यदाह अकच्चैवं वैरेतत् कर्तव्यो प्रत्यंगं मुक्तसंशया वि
ति। अंगप्रतीतिप्रत्ययेन। अनकारांतेभ्यस्त्वकत्पित्क कट किं प्र इत्यादि षकच्। विश्वप्रिय इत्या
दिषष्ठंतेषु तत्संज्ञागाश्रिय मदंतानामित्याद्युदात्तते ति विषयविवेको बोध्य इत्यर्थः। यथोत्तरं

मुनीनांप्रामाण्यात्। भाष्योक्तैवव्यवस्थेत्यवधेयं॥ ॥ तृतीयासमासे॥ ॥ अत्रसर्वनामसंज्ञानस्मा-
त्। मासपूर्वाय ॥ लक्षणप्रतिपदोक्तपरिभाषयापूर्वस्तटशोतितृतीयासमासोगृह्यते
नतुकर्तृकरणेकृत्तेत्यादिरपि। तेनत्वयकाकृतंत्वकृत्कनामित्यादौनिषेधोन। समासश-
ब्दवर्त्तमानेपुनः समासग्रहणंगौणार्थस्यापिसंग्रहार्थं। तेनसमासार्थवाक्येपिनिषेधः।
मासेनपूर्वाय। अयंचलौकिकेवाक्येनिषेधोनतुनवक्रन्नीह्याविति वद्लौकिके। अका-
रांतेकाकचोरविशेषेणनकारांतानांप्रतिपदोक्ततृतीयासमासविरहेणचालौकिकेनिषे-
धस्यवैयर्थ्यापत्तेः॥ द्वंद्वेच ॥ इहोक्तासंज्ञानस्मात्॥ पूर्वापराधराणां। समुदायस्यायं
निषेधोनत्ववयवानां। तथाहि। त्यदादीनांतावद्द्वंद्वएवनास्ति। त्यदादीनिसर्वैर्नित्यमित्येकशे-

श·कौ· षेणाबाधितत्वात्। नच द्वंद्वे कृते एकशेषः इति भ्रमितव्यं। एकवद्भावस्वरसमासांतप्रसंगेन द्वंद्वाप ᐩ
वादएकशेषस्यैव बाध्यापयिष्यमाणत्वात्। अन्यथा तेषामित्यादावपि द्वंद्वे चेति निषेधापत्तेश्च। त्य
२१ दादिभ्यः प्राचीनात्त्वदंतादेव तत्र काकचोरविशेषः। सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावस्त्विष्यत
21 एव। दक्षिणोत्तरपूर्वाणामिति। किंच। सर्वनामसंज्ञानिषेधेनाप्यसौ दुर्वारः। तत्र हि मात्रग्रह
णं क्वचित्सर्वनामत्वेन दृष्टानां संप्रत्यसर्वनामत्वेपि पुंवद्भावार्थम्॥ अत एव दक्षिणपूर्वायै इत्यत्र सं
ज्ञाभावेपि पुंवद्भावः। नन्वेवमपि संज्ञा चेन्न निषिद्धा तर्हि अंगाधिकारे तस्य तदुत्तरपदस्य चेति वच
नात् दक्षिणोत्तरपूर्वाणामित्यादौ सुडागमादिप्रसंगः। नच निषेधसामर्थ्यं। अंताधिकारस्य त्वतलादेर्व्याह
स्याचरितार्थत्वादिति चेन्न। अंगकार्येषु सर्वनाम्नो विहितस्यामो ङे ङसि ङ्योरित्यादिकमेणाव्याख्या २१

नात्। विहितविशेषणत्वाश्रयणेऽप्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव। तस्मात्त
द्वदायस्मार्थं निषेधो नावयवानामिति स्थितम्। अत एव सर्वनामसंज्ञायां नतदेतावधिसञ्ज्ञा
वेद्वंद्वे चेति ज्ञापकमित्युक्तं॥ ॥ विभाषा जसि॥ ॥ जसीति कार्यापेक्षयाऽधिकरणसप्तमी॥
जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे। वर्णाश्रमेतराः। शी
भावं प्रत्येवेयं विभाषेति व्याख्याने। तेनाकज्न भवति तस्मिन्कर्तव्ये द्वंद्वे चेति निषेधात्। अत
स्त्वकप्रत्यय एव भवति। वर्णाश्रमेतरकाः। केनव्यवधानान्नेह शीभावः। अकच्चिकृते तु तन्मध्य
पतितन्यायेन शीभावः स्यादेव॥ ॥ प्रथमचरमतयाल्पार्धकतिपयनेमाश्च॥ ॥ एते जसः
कार्यं प्रति सर्वनामसंज्ञा वा स्युः। प्रथमे। प्रथमाः इत्यादि। शेषं रामवत्। नेमे। नेमाः। शेषं सर्ववत्

इहापि प्राग्वच्छीभावं प्रत्येव संज्ञाविकल्पः। तेन प्रथमका इत्यादावकज्न। अन्यथा प्रथमके इति।
स्यात्। उभयशब्दस्य स्तने यो विभाषा किं तु नित्या संज्ञेति गणव्याख्यानप्रसंगेनोपपादितं। पूर्व
परावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्॥ स्वमज्ञातिधनाख्यायां। अन्तरं बहिर्यो
गोपसंव्यानयोः। एषां त्रिसूत्री गणमध्येपि पठ्यते सा च व्याख्याता। तथा यास्मिन्नेव पाठो नि
त्याप्राप्तानत्रैव जसि विभाषा तया विधीयते। पूर्वे। पूर्वा इत्यादि। स्वे। स्वाः। ज्ञातीया इत्यर्थः।
ज्ञातान इति वा। इह त्रिसूत्र्यां पदकृत्यं [illegible]वे गणव्याख्यावसर एवोक्तं॥ विभाषाप्रकरणे ती
यस्य ङित्सूपसंख्यानं॥ द्वितीयस्मै। द्वितीयायेत्यादि। एकादेशस्य गृहीतग्रहणेन ग्रहणम्।
लिंगविशिष्टपरिभाषया वा द्वितीयस्यै। द्वितीयायै इत्याद्यधिकं। एवं च विभाषा द्वितीयातृती २२

याभ्यामितिसूत्रंनकर्तव्यंभवति। अर्थवत्वात्प्रतिपदोक्तत्वाच्चहेस्तीपक्षे:क्षप्रसारणंचेत्ययमेवश
ल्यते। तेनेहन। प्रकारवचनेजातीयर। पटुजातीयाय। जात्यंतात्छबंधुनि। ब्राह्मणजातीया
य। मत्वर्थपार्श्वशाखाभ्यांनसंताभ्यांमहदादिभ्यश्चेतिछः। मत्वर्तीयाय। पार्श्वतीयाय। तथाद्वितीया
यभागायेत्यत्रापिनभवति। पूरणाद्भागेतीयादन्निस्यात्तिकृतेयस्यानिचेत्यकारलोपेवसतितीय
स्यलाक्षणिकत्वादितिदिक्॥ ॥ इतिसर्वनामसंज्ञाप्रकरणं॥ स्वरादिनिपातमव्ययं॥
स्वरादयोनिपाताश्चाव्ययसंज्ञाःस्युः। प्राग्रीश्वरान्निपाताइत्यारभ्याधिरीश्वरइत्येतन्तत्र्यैतंयेव
ट्यंतेतेनिपाताः। नन्वेवंचादिष्वेवस्वरादयोपिपठ्यंतां। प्रकृतसूत्रंचत्यज्यतां। अव्ययप्रदेशेषुनि
पातपदेनैवव्यवहारियतामितिचेन्न। चादीनामसत्ववाचिनामेवनिपातसंज्ञा। यथालोधंनयंति

श॰ कौ॰
२३
23

पशुमन्यमाना इत्यत्र सम्यगर्थस्य पशुग्राह्यस्य। ननु सत्त्ववाचिनां। यथा पशूञ्जंग्रहङ्केवाय ख्यातिया
श्चस्वरादीनां तु सत्त्ववाचिनामप्यव्ययसंज्ञेष्यते। स्वस्तिवाच्य यति। स्वः पश्येति यथा। अथ प्राग्री
श्वरान्निपाताः स्वरादीति चादयोऽसत्त्वे इति कृते न सूत्रद्वितयमिति चेन्न। एवं हि सति निपात एकाजनाङ्-
ति प्रगृह्यसंज्ञा स्वरादीनामप्येकाचां प्रसज्येत। स्नाहि स्वरादिषु किमोत्। दन्तिणाद्वाच्। इत्येकाचो तद्धि
तौ। के न्यभ्रतपस्तकृत एकाचः। यदि तु चादिरेकाजनाङ्ङिति क्रियेत तदा चादीनामसत्त्ववचनत्वविशेषणान्न ल
भ्येत्। ततश्चास्याप्यभिमन्दनस्तस्य संबोधने मेधावेत्यत्र प्रगृह्यत्वं स्यात्। ननु चादयोऽसत्त्वे इत्यत्रासत्त्व इति
पाठविशेषणं। तथाहि। चादय इति योगो विभज्यते। चादयो निपातसंज्ञाः स्युः ततोऽसत्त्वे। इह शाखेवा
दयोऽसत्त्वे चेन्मा:। ततश्च चादीनां सत्त्ववाचिनां पाठात्पर्युदासः। एतेन पश्चवेत्यादौ न दोषः। एवं चा।

मेसंज्ञेन कर्त्तव्या। अव्ययानिपाता इति। किं तु प्राग्रीश्वरान्निपाता इति वा अव्ययानीति वा सूत्र्यताम्।
न तु स्वरादीनि। तद्धितश्चासर्वविभक्तिरित्यादि अव्ययीभावश्चेत्यनेन सूत्र्यतां। ननु चादयोऽसत्वे इत्या
रभ्य यावदधिरीश्वरे विभाषा कृञीति। तत्र यस्मिन्प्रदेशे निपातग्रहणं तत्र चादिग्रहणमस्तु॥ अ
व्ययप्रदेशेऽव्ययग्रहणं निपातग्रहणं वेति। उच्यते। अव्ययसंज्ञाविरहेऽन्वर्थसंज्ञाबलल्लभ्यं व
त्वकाणप्रयोजनं नेन न सिध्येत्। निपातसंज्ञाविरहे तु यां तन न वाचार्यप्रणीतस्य निपाता आद्युदात्ता
इति फिट्सूत्रस्य विषयविभागो न लभ्येत। अपि फिट्सूत्रे न चादिसंज्ञानामिव निपातशब्दस्यान्य
तरवार्थाध्यवसायस्तथाऽव्ययसंज्ञामात्रेण निर्वाहः स्वकरणवेत्यवधेयं। महासंज्ञाकरणमन्वर्थ
संज्ञाविज्ञानार्थं। न व्येति विविधं विकारं न गच्छति सत्वधर्मान्लिंगसंख्याकारकादीन्न गच्छा

तीतियावत् । तेनोपसर्जनप्रतिषेधः सिद्धः । अत्युच्चैसौ । अत्युच्चैसः इति । अतिक्रान्तप्रधानत्वेना-
सत्वधर्मपरिग्रहात्तेहाव्ययसंज्ञा । नन्वस्वरादिषु चैः शब्दः पठ्यते । तत्र कथं तदन्तस्य प्रसंगः इ-
ति चेन्न । अन्वर्थसंज्ञयैव तदन्तविधेरपि ज्ञापनात् । अन्यथोपसर्जनेऽप्रसंगाभावेन तत्रिष्वत्या-
द्यायास्तस्या वैयर्थ्यापत्तेः । तेन परमस्वः । परमोच्चैरित्यादौ स्वरादिप्राधान्येऽव्ययत्वं सिद्धम् ॥
अव्ययसंज्ञाया अन्वर्थत्वमाथर्वणे प्रणवविद्यायां श्रुतिरपि दर्शयति । सदृशं त्रिषु लिंगेषु स-
र्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति । यत्तेषु यन्न व्येति किं तु सदृशमेकप्रकारं त-
दव्ययमिति योजना । यद्वा । यस्मान्न व्येति तस्मात्तदव्ययमिति । त्रिषु लिंगेषु सदृशं लिंगाविशेषप्रति-
पादने सामर्थ्याभावादिति भावः । विभक्तिषु कारकेषु । वचनेषु एकत्वादिसंख्यासु । अव्ययीभावस्य २५

यपि लिंगकारकसंख्यायोगोऽस्ति तथाप्यविवचनादव्ययत्वं॥ अथ स्वरादयः॥ स्वरिति स्वर्गपरलोकयोः
स्वर्गे। छायेव या स्वर्जलधेर्जलेषु। परलोके। स्वर्यातस्य ह्यपुत्रस्येति। अंतरिति मध्ये। अंतर्वाष्प
श्चिरमवचरः। प्रातरिति प्रत्यूषे। प्रातः संध्यामुपासीत। एतेत्र्ययोऽन्तोदात्ता इति काशिका। तद्वि
त्वात् स्वः शब्दस्य स्वरितत्वात्। तथा च फिट्सूत्रं। न्यङ्स्वरौ स्वरितौ इति। प्रयोगास्तु। अंतरीक्षमप्यो
स्वः पत्तु प्रातः शब्दस्याद्युदात्त इति कश्चित्। तन्न। प्रातरग्निं प्रातरिंद्रं हवामहे इत्यादावंतोदात्तस्ये
व प्रसिद्धत्वात्। पुनरित्याद्युदात्तः। अप्रथमे विशेषे च। अप्रथमे पुनरुक्तं। विशेषे। किं पुनर्ब्रा
ह्मणाः पुण्याः। सनुतरिति अंतर्धाने। सनुतश्चौरो गच्छति। उच्चैरिति महति। नीचैरित्यल्पे। शनैरि
ति क्रियामांद्ये। ऋधगिति सत्ये। वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये। ऋतेइति वर्जने। युगपदित्ये

ककाले। आराद्दूरसमीपयोः। इष्टापीतिति भिन्ने। एते समन्ततः प्रभृतयो नवं। तोदात्ता इति काशिका। श्र
नैर्विघ्नतो द्विवः। अथ गित्यास समर्थ्य इत्यत्र तु शानैर्ऋपक शब्दा वायुदात्तौ प्रयुज्येते। ह्यस्तिति अती
तेऽह्नि। श्वोनागतेऽह्नि। दिवेति दिवसे। प्रज्ञावितिनिशि। सायमिति निशामुखे। चिरमिति वक्रकाले
मनागिति ईषदर्थे ईषदित्यल्पे। जोषमिति सुखमौनयोः। तूष्णीमिति मौने। बहिरिति प्रवसरत्येतौ बाह्ये।
समयेति समीपे मध्ये च। ग्रामे समया। निकषेत्यन्तिके। विलंब्यसंकाति कषा हतिध्यानि। स्वयमित्यात्मनेत्यर्थे। स्व
यं हृतं। वृथेति व्यर्थे। नक्तमिति रात्रौ। नञ् इति निषेधे। हेतावितिति मित्तार्थे। इहेति प्राकाश्ये। अद्धेति स्फु
टावधारणयोः। तत्वातिशययोरित्येके। सामीत्यर्धजुगुप्सितयोः। एते स्वस्ति प्रभृतयः सामन्ता द्वाविंशति
रंतोदात्ता इति काशिका। दिवाचिन्नमः कुर्वति। हृष्या रजस्त्वतिथिभिः। नक्तं ददृशे कुह चिरिव शुरि त्वा २५

दौवाद्युदात्ताः प्रयुज्यंते। वत्। वत्प्रत्ययांतमव्ययसंज्ञं स्यात्। ब्राह्मणवत्। तेन तद्धितस्त्यादिभिर्विहि
तो वतिरिह गृह्यते। न तूपसर्गाद्धातवर्थे इति विहितः सत्यार्थवाचकत्वात्। यद्वृत्तो निवृत्तो प्राप्ति
वसंत। सनेतिनित्ये। सनात्तदृः। सनातनः सनत्। इदमपि नित्ये। सनत्कुमारः। तिरसीति अंतर्द्धौ ति
र्यगर्थे च तिरोहितः। तिरःकाष्ठं कुरु। परिभूतेत्युलक्षणा तिरस्कृतो रिपुरिति यथा। सनेत्यादि तिर्येतान्यप्यु
यत्ना इति काशिका। सनाच्छ्रोतानव्यक्षमास्ते। तिरःपुरूचिदक्षिनाह इत्यादौ वंतो दात्ताः प्रयुज्यंते। अंतरे
त्यंतोदात्तः मध्ये विनार्थे च। त्वां मा वा अंतरा कमंडलुः। त्वां मंतरा तामरसायताक्षि। अंतरेणेति वर्जने। अंतरे
ण हरिं न सुखं। ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रार्थे संप्रत्यर्थे च। कमिति वारि मूर्द्धनि दासु सुखेषु। वारिणि
कं जं पयः। मस्तके। कंजाः कचाः। निंदायां। कंदर्पः सुखे। कंपुः। प्रशस्तिसुखे। शंकरः। सहसेत्याकस्मिकाविम

पा·कौ· र्थयोः। दिवः प्रसूनं सहसा पपात। सहसा विदधीत न क्रियां। स्वधेति पितृदाने। अलमिति भूषणाप
र्याप्तिशक्तिवारणनिषेधेषु। भूषणे। अलंकारः। पर्याप्तौ। अलमस्य धनं। वक्तीत्यर्थः। शक्तौ। अलं म
२९ ल्लो मल्लाय। शक्त इत्यर्थः। वारणे। अलमतिप्रसंगेन। निषेधे। आलप्यालमिदं बभ्रोर्यत्स दारानपा
26 हरत्। न वक्तव्यमित्यर्थः। वषडिति हविर्दाने। विनेति वर्जने। नानेत्यनेकविनार्थयोः। नानाविधं
देहभृतां समाजे। नानानारीं निष्फला लोकयात्रा। स्वस्तीति मङ्गले। अन्यदित्यन्यार्थे। देवदत्तश्चायातोऽ
न्वश्च यज्ञदत्त इति। अस्तीति सत्तायां। अस्ति परलोक इति मतिरस्यास्तिकः। उपांश्विति अप्रकाशोच्चार
णरहस्ययोः। हमेति हंतौ। हमा कथे तु भवान्। विहायसेति वियदर्थे। विहायसा रम्यमितो विमाति २९
दोषेति रात्रौ। मृषा मिथ्येति वितथे। मुधेति व्यर्थे। त्वया नो हन्त कस्ततः। हन्तकारं स्मयन्त रातष्ठा॥ आ

व्ययीभावश्च। इदं गणसूत्रत्रयमष्टाध्यायीस्थं त्रिसूत्र्या समानार्थं। वैयर्थ्यं तत्तद्वक्ष्यते। पुरेति अ
विरते चिरातीते भविष्यदासन्ने च। पुराधीते। अविरतमपाठीदित्यर्थः। पुरि लङ् चेति लट्। चिरा
तीते। पुरापि नवं पुराणं। पुरेदमूर्ध्वं भवतीति वेधसः। समनंतरं भविष्यतीत्यर्थः। स्यात्प्रबंधे चिरातीते
निकटागामिके पुरेत्यमरः। मिथो इति रहः सहार्थयोः। मंत्रयते मिथो। मिथसित्यपि पूर्ववत्। प्रायसिति वा
ऽल्पे। मुहुरिति पुनरर्थे। प्रवाहुकमिति समकाले ऊर्ध्वार्थे च। केचित्तु प्रवाह्लिकेति पठंति। आर्यहल
मिति बलात्कारे। शाकटायनस्त्वाह। आर्यहलेति प्रतिषेधे। हलमिति प्रतिषेधविवादयोरिति। अभीक्ष्ण
मिति पौनःपुन्ये। साकं सार्द्धं मित्यनेन सहार्थे। नमस्तिति नतौ। हिरुगिति वर्जने। धिगिति निंदाभर्त्स
नयोः। तसिलादिस्तद्धितएधाच्पर्यंतः। प्राग्गतसी। कृत्वसुच्। सुच्। आस्थालौ। अर्थाश्चेति। तसि

शा॰कौ॰
२२
27

लादेरित्यादेश्चायमर्थः। पंचम्यास्तसिलित्यारभ्य दाधाच्चेत्येतदंतैः सूत्रैर्हत्कोपसत्वदितस्तदंताः स्व
रादिषु बोद्धव्याः। तथा च वक्ष्यमाणार्थाच्छस्। प्रतियोगे पंचम्यास्तसिः। क्रियाभ्यावृत्तिगणने कृत्व
सुच्। द्वित्रिचतुर्भ्यः सुच्। इणश्रामिति तिसृणादिसूत्रेणास्तिप्रत्ययो विहितः। अथायमुदाहरणं प्रा-
लम्बं विश्रमास्याल्लङ्कृदसि। संपद्यकर्तरि च्विः। विभाषासातिकार्त्स्न्ये। देये त्रा च। एतदंताश्च
पिग्राह्याः। अमिति अम् च छंदसीति विहितः। आम् इत्यंगीकारे। आमु कुर्मः। किमेत्तिङव्यया
दाम्। कास्प्रत्ययादाममंत्रे लिटीत्यपि केचित्। प्रतामू इति स्नानौ। प्रताविति समानार्थे। प्रतान्
देवदत्तोपसदनेन। प्रतानिति विस्तारे। मा इति निषेधे। मा भवतु मा भविष्यति। माङिति निषेधाशं
कयोः। मा कार्षीत्। अस्यपापं माभूदिति। आकृतिगणश्चायं। तेनान्येपि ग्राह्याः। तद्यथा। आमितिशे २२

ध्रेल्पे च। काममिति स्वाछंद्ये। प्रकाममित्यतिशये। भूयमिति पुनरर्थे। सांप्रतमिति न्याय्ये। पर
मिति किंतर्थे। गुणवानस्ति परमहंकारी। साक्षात्प्रत्यक्षे। साचीति तिर्यगर्थे। सत्यमित्यङ्गीकारे। संद्वि
ति पैक्ये श्राघिति च। संवदिति वैर्थे। अवश्यमिति निश्चये। सपदि शीघ्रे। बलवदित्यतिशये। बलव
दपि सुशिक्षितानां। प्रादुराविरिति प्रकाशे। अनिशमिति नित्यं। नित्यदा। सदा। अजस्रं। संततं। एते समान
र्थे। उषेति रात्रौ। उषा नक्तो वायुः। रोदसी द्यावापृथिव्यर्थे। ओमिति ब्रह्मवाची। भूर्भुवदिति पृथ्वि
व्यंतरिक्षलोकयोः। भूर्लोको भुवर्लोकः। ध्रुटिति भृशमिति तरसा इति शीघ्रे। स्वाकुडुतं पौछ्रे। द्वि
प्रमिति च। अतिवेलमिति शये। सुष्ठु इति प्रशंसायां। कु इति कुत्सितेषदर्थयोः। कापथ्ये। कवोम
ष्णे इति तत्पुरुषोत्तरार्थयोः। अहृतिवहिरर्थे। मिथुरिति द्वावित्यर्थे। मिथुनं मंत्रयते। विषुरिति

समंततोभावे।भाजगितिशीघ्रे।भाजकूपचाति।अनवगित्यानुकूल्ये।चिरायचिररात्रायचिरस्या
द्याश्चिरार्थकाः।आयशव्हाछ्विंरचिरेणचिरादितिशब्दयने।अस्तमितिविनाशे।अनुषगित्यानु
पूर्व्ये।अनुषक्प्रविशतीहबंधुता।अनुमानेअनुषमितिपाकटायनः।आनुषगितिदांतकेचि
तअस्त्रमितिशीघ्रसांप्रतिकयोः।अम्नरेवेतिरेफोवा।स्थानेइतियुक्तार्थे।वषमितीषदल्पार्थे।दुष्ठ
तिकुत्सार्थे।बलादितिहठार्थे।पुरइतिपूजायां।शुनासीरः।ह्रमेतिदांतौ।अर्वागितिप्राचीने।सु
दीतिशुल्कपदे।वदिहस्तपदे॥ इतिस्वरादिः॥ तद्धितश्चासर्वविभक्तिः॥तद्धितांतःश
ब्दोव्ययंस्यात्।यस्मात्सर्वावचनत्रयात्मिकाविभक्तिर्नोत्पद्यते किंत्वेकवचनमेव।ततः तत्रतद्धि २८
नइतिकिं।एकः।द्वौ।बहवः।असर्वविभक्तिरितिकिं।औपगवः।नतमोदेववराणाइत्यादाववतिव्याप्तिः

नचलक्ष्योगाप्रख्यानाद्योगाप्रमाणे च तदभावे दर्शनं स्यादिति पठतः सूत्रकृतो मते नैते नाद्वितीया
इति वाच्यं। एवमपि पचति कल्पं पचतिरूपमित्यादावतिव्याप्तेः ईर्वीरत्वादिति चेत् अत्राह वार्त्तिक
कारः। सिद्धं तु पाठात्। तसिलादयः प्राक्पाशपः॥ शस्प्रभृतयः प्राक्समासान्तेभ्यः। मान्तः। कृत्वो
र्थात् तसिवती। नानाञाविति। न चैवं प्रतिकृतावित्यधिकारे प्रलपति विग्रहे मा स्याल्लिङ्गं दर्शीतिवि
धानामदं तस्मात् संग्रह इति वाच्यं। प्रकारवचने थाल् इति प्रकरणे एव प्रत्ययादिष्वर इवे थाल् छन्दसि
स्वकारवचने इदमस्थमुरिति पठितं शक्यत्वात्। स्वरादिगणे अस्तु थालाविति पाठेन सिद्धत्वाच्च
मन्तत इति। अश्च चेन्नर्थः। तसिः। प्रतियोगे पञ्चम्यास्तसिः। तेनैकादिक्त्वात् सिद्धेति तद्धावपि गृह्यते। स्यादेत
तत्। सूत्रमते कथमुक्तिसंभवः। यावता कर्मणि द्वितीयाद्वयोः द्विवचनैकवचन इत्यादीनां स्यादिवाक्ये

प्रा॰कौ॰ २९ 29

नैकवाक्यतापत्तेऽव्ययेभ्यः स्वादीनां प्राप्तिरेव नास्ति। अव्ययादाप्सुप इति ज्ञापकात्तु सर्वा विभक्तयः
उच्यन्ते। अव्ययेभ्यः समानामपि विभक्तीनां त्रीण्यपि वचनानि। तथा समानामप्येकवचनान्येव। अथवा
प्रथमाया एकत्ववचनत्रयं। यद्वा। प्रथमाया एकवचनमेवेति पक्षचतुष्टयं यद्यपि ग्रंथेषु लभ्य
ते। तथापि प्रथमैकवचनमात्रमेवेति चतुर्थपक्ष एव क्षोदक्षमः। तमेव गृहीत्वा सूत्रस्याप्युक्ति
संभवः स्पष्टः। इतरस्तु पक्षत्रिकमभ्युच्चयवादमात्रेणोपन्यस्यते। तत्तु नास्त्विकं। तथा हि। यदि कर्म
णि द्वितीयैव। अभिहिते प्रथमैव एकत्वे एकवचनमेवेत्यादिरर्थनियमः स्याद् दिवा द्वितीया कर्मण्ये
वेत्यादिप्रकृतार्थापेक्षो विभक्तिनियमः। यदि वा एकवाक्यत्वे सामान्यापेक्षवचनविभक्तिनियमे २९
ऽपि वा। अव्ययादाप्सुप इति सामान्यापेक्षज्ञापकाद्विभक्तिसिद्धिः। तदा विशेषात्समानामपि वि-

भक्तीनां त्रीण्यपि वचनानीति यद्वोलभ्यते। यदा तु पदद्वित्वे द्विवचनमिति सूत्रयित्वा एकवचनमित्ये
व एवं कृतं सूत्र्यते। तदन्यथानुपपत्त्या च कर्मण्यपि बहुषु तीयान्तकरणादौ। द्वित्वबहुत्वयोरेवाद्विवच
नबहुवचनेन तत्र एकत्वे इत्यादिक्रमेण संज्ञानीयापेक्षोऽयं नियमः। न तत्स्थाव्ययेभ्यः सकलविभक्ति
प्राप्तावेकवचनमित्यनेन नियमः क्रियते। यत्रैकवचनं चान्यच्च प्राप्नोति तत्रैकवचनमेवेति। य
द्विवासामान्यापेक्षो नियमाश्रयणादव्ययादप्राप्तावेकवचनमिति संज्ञा क्रियते। तस्य च स्वाद्युत्प
त्तिप्रादिकादित्यनेनैकवाक्यता। तथा च स्वराद्यादिभ्यः कर्मादिष्वेकवचनं सिद्धमेवेति। एतत्सूत्र
बलादव्ययेभ्य एव भवति। तिङन्तात्तु न भवति। एकवचनमित्यस्याप्राप्तप्रापणार्थत्वेपि स्वाद्युत्पत्तिसू
त्रेणैकवाक्यत्वात्। प्रदेशान्तरे पाठसामर्थ्याद्वा तत्रैणपि स्वाद्युत्पत्तिद्वियापकमिति त्वि च वेद्वि

वचनमित्यादेर्नियामकत्वं संगच्छते। तदाऽव्ययेभ्यः सर्वाण्येकवचनानीति द्वितीयः पक्षो
लभ्यते। यदा तु द्वितीया कर्मण्येवेत्यादि सामान्यापेक्षः प्रत्ययानियमः। अव्ययेभ्यस्तु प्रथमैवा
प्रथमा प्रातिपदिकार्थ एवेति नियमेन हि कर्माद्याधिक्यस्थल एव सा निवार्यते। द्व्येकयोरि
ति तु यथान्यासमेव। तत्र चैकत्व एकवचनं न संख्यान्तर इति सजातीयापेक्षप्रत्ययनियमपक्षः
तदा तिःसंख्येभ्योऽव्ययेभ्यः प्रथमायाः वचनत्रयमपि भवतीति तृतीयः पक्षो लभ्यते। त्रिष्वप्य
मीषु पक्षेषु पचतिकल्पं पचतिरूपमित्यादौ दोषः। तत्र हि प्रथमैकवचनमात्रमिष्यते उक्त
पक्षत्रयेऽप्यधिकं प्राप्नोति। तस्माद्द्वितीयपक्षरीत्या सकलैकवचनानि प्राप्य एकवचनमित्येक
त्वस्य विवक्षितत्वात् प्रथमातिक्रमे कारणाभावात् प्रथमैकवचनमेव कर्त्तव्यमिति सिद्धान्तः। एवं

चसत्यपि सूत्रस्योक्तिसंभवे पचन्तिन्नूपमित्यादावतिव्याप्तिमपास्यन्निगणानमेवकर्त्तव्यं सूत्रेतु न कर्त्त
व्यमितिस्थितम्॥ कृन्मेजन्तः॥ कृद्योमान्तस्तदन्तमव्ययं स्यात्। स्वादुंकारं भुंक्ते। वक्ते एयः
त्वमर्थे से इति विचेः सेप्रत्यये रूपं। ननु एवंकारः पाचकोरित्यामन्तस्य न प्राप्नोति। अत्रातिङ्भावितया लिटः
कृत्वेपि मान्तत्वाभावात्। सत्यं। स्वरादिष्वामितिपाठात्सिद्धं। यदि तु तत्र तद्धितस्यैव ग्रहणं तर्हि हर
हकंदतव्वाकृत्यत्रानामपिस्यापामाम इति नअभविष्यति। तत्राहि लेरिति नाबवर्त्तते। नचैवं नरवादेर
पिल्वमापत्तिः। अपरिसमाप्तुर्यन्तयान्तरवाग्रुसते रेवाभावात्। अपरिसमाप्तत्वं संख्याकर्त्रादि
विषयकोत्थिताकांक्षत्वम्। अतएवातप्रयोगः प्रार्थ्यते। आमन्तार्थगतप्रकर्षा। वित्रतो नित्व
त्वप्रयोगाङ्गत्यत्रेनतररवादिनाभविष्यति। अतएव सज्जितं तज्वाल्मयपुज्यतरइति। अत्र शद्ो

हिव्यवहितस्य विपरीतस्य च प्रयोगानिवृत्तये इति वक्ष्यते। यद्वा। पूर्वसूत्रोक्तविकर्षरीत्या आमंतात्को
रेवोनयतो हल्ड्यादिलोपो भविष्यति। अस्तु वा कृदंतयत्नेजंतमिति वाक्यार्थः। आमंते हि प्रत्ययलक्ष
णेन कृदंतं। श्रूयते मांते। नचैवं प्रत्यामो प्रत्यामः लवमावद्भाणो लौरित्यादावतिव्याप्तिरिति वाच्यं
स्वरादिषु प्रशान् पाठस्य पाठेन धातोः प्रत्ययलक्ष[णेन] कृदंतत्वमुपजीव्याव्ययसंज्ञा न भवतीति
ज्ञापितत्वात्। न च मो नो धातोरिति नत्वे कृते नैतन्मांतमिति कथं ज्ञापकतेति वाच्यं। नत्वस्यासिद्धत्वा
त्। न च प्रशान्तेजने इत्यस्यार्थो नष्टवान्तिद्वेशान्पतीत्यादिप्रयोगासिद्ध्यर्थं स्वरादित्वस्वीकारे
ण नित्यसंतेन नत्वाभावात्तस्यैवापि स्वरादिषु पाठ इति वाच्यं। अनभिधानात्तस्मात्क्विपोऽनुत्प
त्तेः। अत्र च ज्ञापकत्ववर्णनपरं भाष्यमेव प्रमाणम्। अव्ययमित्यन्वर्थसंज्ञाबलादसत्त्वार्थ

स्यसाम्यवाचिन एव प्रशाम ध्यातुस्य तत्र ग्रहणं न तु शांतिमहाचकस्य। तेन प्रशामो प्रणाम इत्युदा
हरणं न विरुध्यते। स्वमन्यादीनां तु समत्ववाचिनामपि पाठसामर्थ्याद् व्ययत्वमिति विशेषः। अत्र
ग्रहणसामर्थ्यान्नित्ययोगे बहुव्रीहिराश्रीयते। तेनौपदेशिकपञ्चगृह्यते। नेह। आधये। चिकीर्ष
वे। कुंभकारेभ्यः। वस्तुतस्तु तग्रहणं व्यर्थम्। लक्षणप्रतिपदोक्तपरिभाषयैवातिप्रसंगभंगात्
न तु वर्णग्रहणे इयं परिभाषा न प्रवर्तते। अन्यथाप्येचोपवायाव इत्यादावतिप्रसंगादिति चेन्न
एवमपि बहिरंगपरिभाषया संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषयैव
इष्टसिद्धेः। अत्रायमर्थः। सन्निपातः संश्लेषस्तन्निमित्तो यो विधिः स तद्विघातस्यानिमित्तं। तं सन्निपा
तं यो विहंति स तद्विघातस्तस्येत्यर्थः। एवं च स्त्र सन्निपातलक्षणस्य चेर्ङि-नीति गुणस्य बक्ष्व चा।

नेमूल्येदित्येतस्य चाव्ययसंज्ञाप्रतिनिमित्तत्वं नेत्यवधेयम्। तथा परिभाषायाः प्रयोजनं तरा-
रूपाणि संति। दिङ्नागं तत्र च्यते। श्रीपंकुलं। तस्मै श्रीपायेत्यत्रातो लोपो न भवति। तथा। अगवी
त्। अजावीत्। यस्य हलः इति लोपो न। तथा। अतिजरं कुलं। अतिजरेण। अतिजरैः। अतिजरात्
इत्यत्राम् इनपेस्त्र आदित्येतेषु कारप्रपञ्जीयकृतेषु सत्सु जरसादेशो न भवतीत्यादि। अतित्याचे
यं परिभाषा कष्टाय क्रमेण न यास्यो रित्यादिज्ञापकात्। तेनाग्निमानित्यत्र ङस्य नड् भ्यो मतु वि
स्यते दात्ताद्रुस्खांतात्परस्य मतुप उदात्तत्वे कृत्ते शेष निघातेन प्रकृतेरनुदात्तत्वं भवत्येवेति दिक्
गोस्त्रियोरित्यत्र नेदं सूत्रं प्रवर्त्तते। उणादीनामव्युत्पन्नत्वात्। व्युत्पत्तिपक्षेपि विश्वव्यं यमिङ्गणादि
सूत्रेण शेषे प्रत्ययांताव्युत्पाव्ययमिति नियमस्यकृतत्वात्॥ क्त्वातोसुन्कसुनः॥ एतदंत ३२

मव्ययं स्यात्॥ कृत्वाप्रत्ययः स्यो देतोः। प्रत्यवत्सानामपाकर्त्तोः। भावलक्षणे स्थेण्कृञ्वदि
चरिहुतमिजनिभ्यस्तोसुन्। उदगाः कूरस्य विसृपो विरप्शिन्। पुरा जत्रुभ्य आतृदः। सृपितृदोः
कसुन्निति कसुन्॥ अव्ययीभावश्च॥ अयमव्ययसंज्ञः स्यात्। विघ्यपरिगणनं कर्त्तव्यं।
लुङ्मुखस्वरोपचारयोर्निवृत्त्यै चेति। उपाग्नि। प्रत्यग्नि। अव्ययादाप्सुप इति सुपो लुक्। उपाग्निमुखः
प्रत्यग्निमुखः। मुखं स्वाङ्गमित्युत्तरपदान्तोदात्तत्वं प्राप्तं नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथु
वत्सेभ्य इति प्रतिषेधः। तथा च बहुव्रीहौ प्रकृत्या पूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदं च समा
सस्वरेणान्तोदात्तं। विसर्गस्यानिकस्य सकारस्योपचार इति प्राचां संज्ञा। तन्निवृत्तौ यथा। उपपयःकारः उ
पपयःकामः। इहान्तःकृकमीति प्राप्तं सत्वमनव्ययस्येति पर्युदस्यते। इह मुखस्वरनिवृत्तिरेव म

त्वंप्रयोजने। लुक्त्वनाव्ययीभावादत इति निषेधप्रतिषेधात्सिद्धः। उपचारनिवृत्तिरपि न प्रयोज
नं। अतः कृकमीत्यत्रानुत्तरपदस्थस्येत्युक्तत्वादेव तत्सिद्धेः। परिगणनं किं। उपाग्न्यधीयान। परंगाव
ह्वावेन घाष्टमामंत्रितस्य चेत्याद्युदात्तत्वं पर्यायस्यात्। तत्र लुगव्ययानां प्रतिषेधः उपसंख्यातः। उच्चैर
धीयानेत्यादौ मा भूदिति। तथा उपाग्निकमित्यादौ चाव्ययसर्वनाम्नामित्यकच्। उपकुंभमन्यः
स्मिन्नव्ययस्येत्यनुवर्त्तमाने हर्षिषेति षत्वप्रतिषेधो न। उपकुंभीभूतः अस्मद्भावित्यस्योपसं
ख्यातिकः प्रतिषेधो न भवति। वस्तुतस्त्विदं सर्वं न कर्त्तव्यं। लुगुपचारनिवृत्तेश्चान्यथोपपत्तेरुक्त
त्वात्। स्वरविचारनिवृत्तिः परमवशिष्यते। तत्र केचिदाहुः। स्वरविचारो ऽवेष्यत एव। यद्येतावत्प्रयोज
नं स्यात्तदैवायं कुर्यात्। अव्ययादव्ययीभावश्चेति भाष्यस्वरसादिति। अन्ये त्वनव्ययमव्ययं भवती ३३

तिश्चान्वर्थसंज्ञाविज्ञानादेवमव्ययत्वस्वरमिहात्तिर्भविष्यतीति। स्यादेतत्। स्वरादित्वेनैवासिद्धत्वात्तद्धित
श्चेत्यादि चतुःसूत्री व्यर्था। तद्धि हि तसिलादिस्तद्धितः यथा चूपर्यंतः इत्यादिनाव्ययत्वं तेन श्रासिमो
रणादिकं च वर्जयित्वा तद्धितश्चासर्वविभक्तिरिति। स्यादेतत्। स्वरादित्वेनैवासिद्धत्वात्तद्धितश्चे
त्यादि चतुःसूत्री व्यर्था। तद्धि हि तसिलादिस्तद्धितः यथा चूपर्यंतः इत्यादिना) क्रिरि त्यस्यार्थः संगृह्य
ते। कृन्मकारसंध्यक्षरांत इत्यनेन कृन्मेजंत इत्यस्यार्थः संगृह्यते। क्त्वातोसुन्कसुनः अव्ययीभावश्चेति सूत्रद्व
यं तु स्वरूपेणैव पठ्यत इति अश्राकुः॥ पुनर्वचनमनित्यत्वज्ञापनार्थम्। तेन परमशाक्तं लघ्वादिस्वरोपचार इति परि
गणनं लभ्यते। वलोकाव्यये त्यज्ञावयप्रतिषेधे नो सुन्कसुनोरप्रतिषेध इति वक्ष्यमाणं च लभ्यत इति। वस्तु
तस्तु मास्तु चतुःसूत्री। अव्ययीभावश्चेति गणेपि मास्तु। उक्तरीत्याऽन्वर्थसंज्ञयैवेष्टसिद्धेः क्त्वातोसुन्कसुनोरप्रतिषे

पा.कौ. पञ्चत्येवलाघवात्पञ्चानामितिप्रुक्तः पंथ्याः ।। शिसर्वनामस्थानं ।। शीत्येतत्सर्वनामस्थानसंज्ञं स्या-
३४ त् ।। वा शि णि ।। सर्वनामस्थाने चासंबुद्धाविति दीर्घः । यदि तत्प्रदेशेष्वेव शी चेत्पाठ्यच्येत तर्हि सुटिन
34 स्यात् । अथ शिसुटोरित्युच्येत तर्हि नपुंसकस्य सुटोपि ग्रहणं स्यात् । शिग्रहणं तु शसर्थं स्यात् । तस्मा
त्संज्ञानावश्यकीया । महासंज्ञाकरणं तु पूर्वाचार्यानुरोधात् ।। सुडनपुंसकस्य ।। सुडिति प्रत्या
हारः । नपुंसकभिन्नस्य स्वादि पंचवचनानि उक्तसंज्ञानि स्युः । राजा राजानौ राजानः इत्यादि । प्रा
ग्वद्दीर्घः । अनपुंसकस्येति किं । सामनी । विभाषा ङि श्योरित्यल्लोपाभावे दीर्घो न भवति । अनपुंस
कस्येति पर्युदासः । तेनास्य सूत्रस्य स्त्रीपुंसयोरेव प्रवृत्तिरिति नपुंसके न विधिर्नापि प्रतिषेधः । ते ३४
न वनानि संतीत्यत्र पूर्वेणैव सर्वनामसंज्ञा भवत्येव । प्रसज्यप्रतिषेधे तु समाधि निषिध्येत । यद्यप्यनंततरस्य

विधिर्वा भवति निषेधो वेति समाधानं उच्यते। तथाप्यसमर्थसमासो वाक्यभेदश्चेति गौरवं
स्यादेव यद्वा। स्वहस्त्रीपुंसयोरिति वक्तव्ये ऽनपुंसकस्येति सूत्रयतः प्रसज्यप्रतिषेध एव संमतः।
गौरवं च प्रामाणिकं। एतेन हि केचिन्नञ्समासा असामर्थ्येपि साधव इति ज्ञाप्यते। तेनाश्राद्धभो
जी ब्राह्मण इत्यादि सिद्धं भवति॥ न वेति विभाषा॥ इति प्राप्तः काकाक्षिन्यायेनोभयाभ्यां संब
ध्यते। स च पदार्थविपर्यासकृत्। तेनार्थ एव संज्ञी संज्ञा च। निषेधविकल्पयोर्विकल्पः संज्ञा स्या
त्। तेन च तयोरपदार्थतयान्वयप्रसंगः। एतत्सूत्रारंभसामर्थ्यादेव विधिवाक्येषु विकल्पवाचि
पदस्य लाक्षणिकत्वात्। उभयत्र विभाषार्थं चेदं सूत्रं। प्राप्तविभाषायामप्राप्तविभाषायां च
नास्योपयोगः। तथा हि विभाषोपपदेन प्रतीयमान इति प्राप्तविभाषा। तत्रस्वदितजित इत्यादि

प्रा॰कौ॰
३५
35

नानित्यमात्मनेपदे प्राप्ते विभाषाकृता पद्ये तन्निवृत्तिमात्रं क्रियते। पद्ये भवतीति त्वनुवादः। त
थाविभाषोर्णोरित्यप्राप्तविभाषा प्रोर्णुवीत्यत्र परत्वात्सार्वधातुकमपिदिति ङित्त्वं ङित्वाभ्युप
गमात्। तत्र उर्णोवितेत्यादावभावो बाधस्यास्थितत्वाद्भावे वा सामान्यपरता चपरता। विभाषास्वेरि
त्युभयत्रविभाषा यंतु यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्त्वे वा विकल्पः स्यात्। कित्त्वं तु
यत्नादित्वान्नित्यमेव स्यात्। अथ प्रतिषेधमुखेन प्रवृत्तिस्तर्हि कित्त्वे वा विकल्पः स्यान्ङित्त्वेपि
त्यः। न च पित्त्वविधिमुखेन कित्त्वनिषेधमुखेनेत्युभयथापि प्रवृत्तिरस्त्विति वाच्यं वैरूप्यल
क्षणवाक्यभेदापत्तेः। संज्ञाकरणे तु सति कृतक्रमानुरोधेन नेति निषेधः प्रथमं कित्त्वप्रवर्त्त
ते। ततः किद्वकिद्रूपे सर्वास्मिल्लिटि एकरूप्यं प्राप्तिते सति पद्ये भवतीत्येकरूप्येण विधिमुखे ३५

नैव विकल्पः प्रवर्त्तते। आकृतौ पदार्थे समुदाये सकललक्षणं प्रवर्त्तत इति दर्शनेदं सूत्रमारभ्यते। ५२
यदा तु प्रतिलक्ष्यं विभाषाश्वेरित्येतन्नियमे तदा क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन प्रवृत्तेः संभ
वान्नेदं सूत्रमारम्भणीयं ॥ तथा च वार्त्तिकं ॥ शशिखेभ्यो वाविधित्वादनित्यं तस्त्वाकृतिपदेऽपि प्र
वेशो विकल्पेरित्यादि पठित्वेदं सूत्रं प्रत्याख्यातं शक्यं। युक्तं चैतत्। अन्यथा न्याय्यमारब्धसंज्ञावि
भाषयोरित्यत्र प्रवर्त्तेत। प्रतिषेधाश्च बलीयांसो भवन्तीति निषेधोऽत्र वीत्यत्रापि सार्वधातुकमपिदित्य
स्य प्रतिषेधस्ततो विकल्पश्च स्यात्। तत्रारभ्यमाणे सूत्रे नवेत्यत्र इति धातुस्थो निषेध एव संज्ञा
किं न स्यादिति चेन्न। तथा सति नबहुव्रीहाविति नैव निषेधो विभाषादिक्समासे इत्यस्यैव पर्य्यापतेः र
तीति किं। युष्मत्सर्वनामत्वं तु पमिति वचनाच्छन्दस्यसंज्ञामाभूत्। तथा सति विभाषाश्वेरित्यस्य नवा।

श· कौ·
३९
36

पाब्दः श्रूयते रादेशः स्त्वर्थः स्यात् । इति शब्दे तु सत्यर्थे संज्ञेति लभ्यते । तथा हि । लोके ह्यर्थप्रधानः
शब्दः । गौरित्युपमाहेत्यत्र तथा शब्दस्वरूपपरः संपद्यते । व्याकरणे तु स्वं रूपमिति परिभाषणा
त्स्वरूपपरत्वमौत्सर्गिकं । इति शब्दसमभिव्याहारे त्वर्थपरतेति विशेषः । अर्थस्यैव सं
ज्ञात्वमपि । ननु विभाषाशब्दस्येत्युक्तं । तेन हृक्रोरन्यतरस्यामित्यादावपि वैरूप्याद्दोषो वा
च्यः । एतत्प्रसंगेन त्रिविधा अपि त्रिसंज्ञाया विभाषाः प्रायेण भाष्ये विवेचिताः । तत्राप्राप्तविभा
षामध्ये ग्रो यङि· अचि विभाषेति पठिते । अत्र वदंति । अप्राप्तविभाषेयमिति । सत्यं । किं तु वि
संज्ञायास्तूपक्रमप्राप्तेः प्राप्ते उभयत्र वेत्येवंरूपकोटिद्वयप्रकारसंज्ञायाविषयीभूतानामेवग्रुत्वाय ३९
मानत्वादत्रापि कोटिद्वयस्योक्तिसंभवो वक्तव्यः स च दुर्वचः । तथा हि । निजेगिल्यते इत्यत्र ग्रो यङि·

तितित्यं लत्वं। विभाषायास्तु न तत्र प्राप्तिरेव नास्ति। गिरति। गिलतीत्यादौ तु विभाषा। ग्रो यङीत्य
स्य तु प्राप्तिरेव नास्ति। न कथं प्राप्त विभाषा प्रवृत्तः। अप्योच्येत। अचि विभाषेत्यत्र यङीत्यनुवर्त्यं यङ्कि
मित्तस्य रेफस्याचनन्तरे वा लत्वमिति व्याख्यानादस्त्येवोक्तिसम्भव इति। तत्र। निजेगिरयत्र इह
तिस्थिते हि ग्रो यङीति प्राप्नोति। न चास्यामवस्थायां विभाषायाः प्राप्तिः। अच्परत्वाभावात्। अथ
ब्रूयाः। विभाषारंभसामर्थ्याच्चङ्लुकः पूर्वं ग्रो यङीति न भवतीति। एवमप्युभयत्र विभाषात्वं
तु सममेव। गिरति गिलतीत्यादौ विभाषायाश्चरितार्थत्वेन यङ्लुकः प्रागेव ग्रो यङीत्यस्य प्रवृत्ते
रुभयोरसमानकालिकत्वात्। न च लत्वस्यासिद्धत्वात्ततः प्रागेव लुगिति वाच्यं। अंतर्भूतयङपेक्ष
त्वेनांतरंगं लत्वं प्रति बहिर्भूतत्वाच्चुत्वयापेक्षत्वेन बहिरंगस्य लुकोऽसिद्धत्वात्। पूर्वाभावे।

शा.कौ. मपूर्वत्रासिद्धमित्यस्याप्रवृत्तेरिति। अत्रोच्यते। प्राप्तविभाषात्वे तावत्समर्थनं तत्र रोक्तरीत्यै
२२ वोक्तिसंभवः। उभयत्रविभाषात्वं तु। अंतरंगानपीति न्यायेन लत्वात्पूर्वं लुक्। न च लड्वि
37 तमजेवर्त्तुलेभः तस्यार्थापेक्षत्वेन बहिरंगतयासिद्धत्वात्। एवंभावे एवं त्रासिद्धमित्यस्याप्रवृत्तेः। तथा वा
चः पूर्वमेव लत्वं स्यादिति वाच्यं। कृतिपदविधिग्रहणेन बहिरंगपरिभाषायाः अनित्यत्वज्ञापनात्। धर्मेग्रास्कप्र
माणे न लगिवतज्जपजीव्यानां समासादीनामपि प्राबल्यसिद्धेश्च। ननु कृते विनत्रिमिते लाकिचसतितिजेगिर
श्चवरतिस्थिते ग्रो यङीति न प्राप्नोति। यङः परत्वाभावात्। प्रत्ययलक्षणेन तु न लुमतेति निषिद्धं। तत्रसंज्ञायासैत्यने
नंगाधिकारो न निर्दिश्यते इति वाच्यं। न च स्यादिति वड्डाकालकालमनस्यातिवदिति निषेधात्। अजन्मलादे
शानांत्वात्। तथाच कथमुभयत्रविभाषेति चेन्न। यथा तलोपसूत्रप्रत्याख्यानपक्षे प्रथ्यालोपाश्रयणेनस्या २२

शा-कौ तिवद्भावसंभवात्। न च पूर्वत्रासिद्धे नस्यानिवदिति निषेधः तस्य दोषः संयोगादिलोपलत्वणत्वे
१८ ष्विति सापवादत्वात्। यद्यप्यचि विभाषेत्यस्य पूर्वत्रासिद्धमिति ग्रो यङीति प्रत्यासिद्धत्वाद्विप्रतिषेधासंभवः
३८ न तत्र सत्यामपि यङीत्यस्य निवृत्तावुभयत्र विभाषात्वं न संभवति। तथापि ग्रुभुनेत्यादिवल्लाघवा
र्थमसन्नेत्येव वक्तव्ये न सन्नत्रस्तु केयोगविभागार्थं तयानयोर्योगो योगो सिद्धः। किं तु प्रकरणे प्रकर
णमिति वाऽसिद्धत्वं न भविष्यतीत्याशयेनोभयत्र विभाषात्वेऽपि किं सेवा बोध्यः। सिद्धांते तु विभाषा
याश्रसिद्धत्वादेव नित्यलत्वं सम्बुदायलोपवादिनां मते त्वजपेक्षत्वपांऽशरंगत्वान्नित्यलत्वमिति व्यवस्थि
तविभाषेति वा समर्थयितव्यं ॥ ॥ इति श्रीशाब्दकौस्तुभे प्रथमे पादे षष्ठमाह्निके ॥
श्रीशुभमस्तु सर्वजगतो

[illegible]

शा. कौ.
१

श्रीगणेशाय नमः। अदर्शनं लोपः॥ स्थाने इत्यनुवर्तते। तदर्थस्य प्रसंग इति। प्रसक्तस्यानुच्चार
णं लोपसंज्ञं स्यात्। संज्ञाप्रदेशा लोपो व्योर्वलीत्यादयः। अर्थस्यैषा संज्ञा न तु शब्दस्य महासंज्ञाकर
णसामर्थ्यात्॥ नन्वेवं प्रदेशेष्वेव लोपं न लोप इति लौकिकोर्थो ग्रहीष्यते। पशोऽपत्यं देवतेतिव
त्। तत्किं संज्ञयेति चेन्न प्रसक्तस्येत्येवंरूपविशेषलाभाय सूत्रारंभात्। अन्यथा दधिमधित्यादौ
नुगागमप्रसंगात्। आल्लिदितश्चक्रियोर्दर्शनं। तच्च लोप इति प्रत्ययलक्षणापत्तेः। ननु स्वे
वं वार्त्तिकमते॥ भाष्यमते तु प्रत्ययलक्षणसूत्रं नियमार्थं। न तु कथं दध्यादौ तुक्प्रसंगः॥
स्यादिति वत्सूत्रं तत्र न तुकं प्रवर्तयति। षष्ठीग्रहणस्य तत्रानुवर्त्तितत्वात्। अत एव ग्रामणीरि
त्यादौ अणकार्यं न भवति। तथा च भाष्यरीत्या संहितावसानयोर्लौकिकसिद्धत्वादिति वक्ष्यमाण

न्यायेनेदमपिहतीत्यादौ ल्यब्लोप इति पंचम्याः पत्तेः। आनिमीलदित्यादौ चादिलोप इति निघातप्रतिषे
धापत्तेश्च। आरब्धेनस्त्रेनत्रशास्त्रतो लोकतो वाल्यबादीनां चाप्रसक्तत्वान्नोक्तदोषः। ननु वार्ति
कमते प्रसक्तस्येत्युक्तेपि ग्रामणीरित्यत्र वृद्धिः स्यात्। कर्मण्यणः प्रसंगसत्त्वादिति चेन्न। वासरूप
न्यायेन पक्षे णसंभवेपि क्विपूपवादेनेनाणः प्रसंगस्य वाधितत्वात्। वैकल्पिकयोरिकान्तुष्टा
नेनास्मिन् प्रयोगे इतरानुष्टापकयाप्याप्राप्ताण्यपस्य शास्त्रसिद्धत्वात्। प्रत्ययस्य लुक्श्लुलुपः।
अनेकसंज्ञाकरणसामर्थ्यात्तेनाद्वृत्यायाश्रित्य तन्ज्ञावितसंज्ञा इह विज्ञायंते॥ लुक्श्लुलुपश
हैः कृतं प्रत्ययादर्शनं क्रमादेतत्संज्ञं स्यात्। संज्ञाप्रदेशाः लुक्तद्धितलुकि। जुहोत्यादिभ्यः
श्लुः। जनपदे लुबिति विधिप्रदेशेषु भाविसंज्ञानां नान्योन्याश्रयः। विशेषविहितानामप्येताः वि^

श॰कौ॰ संज्ञालोपसंज्ञां न बाधते। एकसंज्ञाधिकारादन्यत्र संज्ञानां बाध्यबाधकभावो नास्तीति कडारसू
२ त्रे वक्ष्यमाणत्वात्। प्रत्ययस्येति शक्यमकर्तुं। नचैवं लुकश्चितल्लुकीति विधीयमानमदर्श
नं गोस्त्रियोरित्यनुवृत्तेर्गौणह्रस्वस्यापि स्यादिति वाच्यं। गोरुपसर्जनस्येति योगं विभज्यास्त्रियाः
लुक्तद्धितलुकीति सूत्रे स्त्रीग्रहणस्यैवानुवर्तनसंभवात्। अन्यथाप्रत्ययग्रहणे कृतेपि
गार्मेडी लुक् स्यात् कसीपपरशव्ययोर्यञञौ लुक् चेति लुगपि प्रकृते न भविष्यति ङ्याप्प्रा
तिपदिकादित्यधिकारात् प्रातिपदिकात्स्वरसत्वाविधानात्। कृतेपि हि प्रत्ययग्रहणे क
मेः सः कंसः परशून्शृणातीति परशुः रिति उकारसकारयोर्लक्ष्या म एवमेव परिहार्यः नचै
वं यञञोरेव लुगस्तु विधानसामर्थ्यात्तद्वयञञ्लुकां विकल्पः वेत्यनुवृत्तिरस्तु यञञ्भ्या २

मुक्ते श्रौत्सर्गिकस्य श्रवणं माभूदित्येवमर्थमिति वाच्यं। यज्ञज्वलकामेककालप्रतीतानां बहुदेशप
विधेयभावासंभवात्। बुबुलोनहेत्यत्र त च कालतनेचितिश्च न चतनेलङ्। तिवस्थापकाद्वाक्य
भेदमाश्रित्य बुबुलो स्त्वाहियीपते। तस्मादप्रत्ययनिहत्तयेतावत्प्रत्ययग्रहणं न कर्त्तव्यं। स्याति
विशेषसमर्पणार्थमपि न। तथा हि अत्रिभृगुकुत्सेत्यत्र तावद्यस्कादिभ्यो गोत्र इत्यतो गोत्र इत्यनु
वर्त्तते जनपदाख्यादिभ्यो गोत्रे यो विहितस्तस्य लुक् सिद्धः। जनपदे लुवित्यत्र तज्ञाप्राप्तियदिकास्य
त्ययस्यैव ग्रहणं। जनपदे विहितस्य चातुरर्थिकः प्रत्ययस्य तद्वञ्लवणाल्लुगित्यत्र कृतत्वाद्धक
एव। सर्वत्रापीह प्रत्ययस्यैव षष्ठीकल्पयिष्यते। तस्मादित्तुत्तरस्येति। स्यादेतत्। सर्वादेश
र्थं प्रत्ययग्रहणं तेन यजजोऽत्र। सुपो धातुप्रातिपदिकयोरित्यादिषु यत्रानेकालप्रत्ययस्त्वा।

श० कौ० २ 3 ञालोंऽन्त्यस्येति न भवति। तथा लदण्लृगित्यादावादेः परस्येति न भवतीति। सैवं। ज्ञापकादि
वर्णादेशत्वसिद्धेः। चोर्लोपो लेदिवेति हि लोपे प्रकृते लुग्वा ग्रहे इति लुग्ग्रहणं ज्ञापयति। लुगा
दयः सर्वादेशा इति। अलोऽन्त्यस्य इदर्णं न प्रकृतेन लोपेनापि सिद्धं। न च वैपरीत्यापत्तिः। असंज्ञा
न विशेषितत्वेन लोपे लोऽन्त्यपरिभाषाप्रवृत्तेः। सामान्येन लुग्महिविषयं ज्ञापकेन तल्लुङः त्यात्रविष
य इति सर्वं सिद्धं। स्यादेतत्। आगस्य कौंडिन्यपोऽविरुण्ञल्गाणिञोरित्यतो लुग्ग्रहणमनुवर्तनेन
वा। आपेस्यादिति तो द्वौ आदेशास्तु लुकास ह त्रय इति वैषम्यायप्यासंख्याभावे एकैकस्य त्रय आ
देशाः पर्यायेण स्युः। ततश्चागस्त्ययोऽपि कौंडिनाः स्युः। कौंडिनाश्चागस्त्ययः स्युः। लुक्ष्कक्रियमाणे २
ज्ञापकात्सर्वादेशा इति ऽभयत्रापि विभक्तिमात्ररूपेण। अथ निर्दिष्टेनेन तेऽगस्तयः कौंडिनाः इङ्म

त्र न कश्चिद्दोषः। किंत्वागस्तीनां छात्रा आगस्तीया इत्यत्र प्राग्दीव्यतीये अञादौ प्रत्यये विवक्षिते
ऽप्यागस्त्यादेशस्य तद्विधाभावादनिवृत्तावृद्धत्वाच्छेन स्यात्। प्रत्ययग्रहणे सति तु लग्रहणात्तु
द्वृत्त्या आगस्त्यकौण्डिन्ययोः प्रत्ययांशस्य लुग्भवति। अवशिष्टभागयोर्यथासंख्यं अगस्तिकुण्डिन
चौ। तेनागस्तयः कुण्डिना इति सिद्धं। प्राग्दीव्यतीये विवक्षिते तु गोत्रे लुगचीति लुकि प्रतिषिद्धे
ततस्तन्नियोगशिष्टत्वादगस्त्यादेशोऽपि निवृत्ते आगस्त्यशब्दाद्वृद्धाच्छे कृते सूर्यतिष्येति यलोपे चाग
स्तीया इति सिध्यति। कौण्डिन्ये तु नास्ति विशेषः। निवृत्तेऽपि कुण्डिनजादेशे कौण्डिन्यशब्दादपि कु
ण्वादिभ्यो गोत्रे इत्यणि कृते आपत्यस्येति यलोपे कौण्डिना इत्येव भवितव्यं। तस्मादागस्त्यकौ
ण्डिन्ययोरित्यत्रावश्यमनयोर्लुग्ग्रहणं ततश्च इह प्रत्ययग्रहणमपि कर्त्तव्यमेवेति। मैवं। आ

शु·को·
५

गास्य कैङ्ङित्ययोरित्यत्र यस्कादिभ्यो गोत्र इति गोत्रग्रहणमनुवर्त्य गोत्रे यो विहितस्तस्य लुगिति व्याख्या
नेनापि इष्टसिद्धेः तस्मात्तत्र यग्रहणमिह मास्त्विति स्थितं। स्यादेतत्। एवं सति लोपसंज्ञया सह लुगा
दिसंज्ञानां तुल्यव्यापिकत्वं स्यात्। तद्भावितस्य संज्ञेति चेत्। अविशेषाल्लोपेपि तथा स्यात्। उच्यते।
असंजातविरोधित्वाल्लोपसंज्ञाभावदर्शनमात्रं सम्भवति। लुगादिसंज्ञासु परं अनेकसंज्ञाप्रापण
सामर्थ्यात्तद्भावितग्रहः तेन संज्ञासंकरोनेष्टः क्व। सति तु संकरे हंतीति धाह्वाकिप्साविति द्वित्वं स्या
त्। जुहोतीत्यत्र श्लौ प्राप्ति उतो वृद्धिर्लुकि हलीति वृद्धिः स्यात्। न च तत्राभ्यस्तस्य नेत्यनुवृत्तेर्योयो
तिनोनोतीत्यादाविव वृद्धिर्न भविष्यतीति वाच्यं। संज्ञासंकरपक्षे तत्र हतस्य संभवात्। अध्यणा
हत्वस्याति विषयतापत्तेः। न च पोतिचोतीत्यादिरवकाशः संज्ञासंकरे तत्रापि द्वित्वस्योवार ५

त्वात्। लोपसंज्ञातलुगादिसंज्ञानां व्यापिकेत्युक्तं। तेनयं चेत्यादौ प्रत्ययलक्षणं सिध्यतीति दिक्॥
भाष्यमते तु यद्यपि स्थानिवत्सूत्रेण यं चेत्यादि सिद्धं तथापि सुट्षट्ब्राह्मण हत्यत्र वक्ष्यमाणरीत्या उ
त्तरपदाद्युदात्तत्वस्य तुप्यादेर्धस्य च वारणाय लोपे सति प्रत्ययलक्षणाय वेति नियमो वश्यं प्रवर्त्त
नीयः तथा च तत्रत्यल्लुकः प्रत्ययसंज्ञाप्यादर्शनेत्यत्र वधेयं। प्रत्ययलोपे प्रत्ययलक्षणं। प्रत्ययेलु
प्तेपि तदाश्रयं कार्यं स्यात्। अल्विध्यर्थमिदमिति वार्त्तिकमसं। तथाहि। अत्रणो ङित्त्व त्रानिपोह
लङ्यादिलोपे कृते त्रणहृ इति तिसूत्रेण विधीयमानो हलादिपित्त्वादिधातुकत्वनिमित्त इ माग
मो स्माङ्च नाङ्भवति। स्थानिवत्सूत्रेण तु न सिध्यति। अल्विधित्वात्। नन्वेवं प्रत्ययलक्षणमपि न
स्यात्। वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधादिति चेन्न। न ह्येवं रूपं वचनमस्ति। किंतु प्रक

श॰ कौ॰
५
5

सूत्रे प्रत्ययलोपे तल्लक्षणं इत्येवास्तु। यद्वा। तल्लक्षणमित्यपि मास्तु। स्थानिवदित्यनुवृत्त्यैवेष्टसिद्धेः।
एवं सति प्रत्ययलक्षणमित्युक्तेः फलं तत्त्वदर्शयते। पुनः प्रत्ययग्रहणसामर्थ्याद्धि यत्कार्यं प्रति प्रत्यया
स्याऽसाधारणं रूपं निमित्ततयाश्रीयते सत्वतिङ्त्वादितदेव भवतीति लभ्यते तेन गवे हितं गोहितमि
त्यत्र वादेशो न भवति तद्धि धातुवद्भसंज्ञाद्याश्रयणात्। न स्य च प्रत्ययाऽप्रत्ययसाधारणात्। अथात्र न
लुमतेति निषेधः तर्हि लुपयशाः इत्यत्र विसर्जनीयस्य सः स्यात्। सहूढि इत्यादौ खरि चेति चर्त्वं स्यादिति
दिक्। इमामग्मेन्नु हलादौ सार्वधातुक इति प्रत्ययस्यैव प्राधान्येनाश्रीतेः इति वैषम्यं। तस्माद्वर्णप्राधान्ये
प्रत्ययलक्षणं नास्ति प्रत्ययप्राधान्येनाश्रीयते इते वैषम्यं। तस्माद्वर्णप्राधान्ये प्रत्ययलक्षणं नास्ति ५
प्रत्ययप्राधान्ये त्वस्तीति विवेकः। अनेनैव न्यायेन न धातुलोप इत्यत्र धातुलोप इति वक्तुं व्रीहिणे

वर्त्तिष्टे आर्द्धधातुकग्रहणसामर्थ्यात्तत्वेननिमित्ततालभ्यते। तेनयिपित्विक्लृएओर्विचिलोपोव्यो
रितिवलोपस्यवलिनिमित्तत्वानत्वार्द्धधातुकत्वपादिवो निमित्तत्वाभावाद्गुणोभवत्येवतेनस्रधे
नौस्रधेनः। स्रकः। स्रकौ। स्रकाः इत्यादिभवति। पठंतिच। स्रधेस्रधेवारिवधात्स्रराणास्रका
वर्णानात्वायवतश्वरामः। विशेषणोद्देयरहादिकर्तृवंहेदधीतीसहिकैपदीयश्लि। नवनोनोर्तो
त्वादित्याहत्वाआर्धधातुकग्रहणस्यसार्थक्यात्कथंसामर्थ्यमितिवाच्यं। यङ्लुकश्छांदसत्वा
तू भाषाविषयत्वपक्षेआर्धधातुकग्रहणमावश्यसामर्थ्यमुपपादनीयं। नन्वेतल्लिकिविवेत्येत
त्सूत्रस्यभाष्येणसहविरुद्धंपूर्वास्मिनयोगेयदार्धधातुकग्रहणंतदनवकाशमितितत्रोक्त
त्वादितिचेन्न। अनास्यपातयोक्तत्वादित्याहुः। तदुपष्टंभेनात्रविजेवानभिमतइत्येवकिंना।

प्र॰कौ॰ स्यादिति चिंत्यं। किंचित्तु ऊह। तेन धिनुधिन्वो धिन्वः कृणुः। कृण्वो कृण्व इति भवति। सुधी सुधि
८ नो सुधिनः सकीः सकृणौ सकृण इत्यादि तन्न भवत्येवेत्याहुः। यङ्लुको भाषाविषयत्वेऽप्यथा
b तु कथं हसतो तोतीत्यत्र चारितार्थ्यादाह तोचमानाभावाद्गुणनिषेधप्रवृत्त्या सुधीसुधिनावि
त्येवं सकृणो ते सुदीर्घे सकीर्णौ सकीर्ण इत्यादि भवतीत्यपि चिंत्यं न चैवं परिवीरित्यत्र तद
दीर्घपर्यायेण स्यातां। अनेनैवोभयविधाने पौर्वापर्याभावे न विप्रतिषेधे परमित्यस्याप्रवृत्तेः। स
त्वे। एकादेशातिदेशस्य व्यपदेशातिदेशासंवाश्रयणाददोषः। यद्वा। क्विप्प्रत्यये यत्कार्यं भवति त
मर्हतीति तदेवातिदिश्यत इति परिवीयेत्यादाविव परिवीरित्यत्रापि दीर्घ एव भवति न तु ल
गितिकार्यातिदेशेऽप्यदोषः। भाष्यकारास्त्वाहुः। तृणह इमण्यंतावन्नेदं सूत्रं। स्यात्तिवस्तु ते ८

णैवगतार्थत्वात्। न चाल्विधिरयं। हलीत्यस्य निवर्तनात्। न चैवं त्वणाहानीत्यत्रापीमुस्यादिति वा

च्यं। नाभ्यस्तस्याचीत्यतोऽचेनेत्यनुवर्तनात्। नाप्याघीरित्यत्र घासरदडः हलो विनीत्वार्थमिदं।

अभ्यासः काबुपसंख्यानेनैव सिद्धेः। तद्धि त्वपापिवाव्यां घासरद्डः हलोरित्यत्र शासिमात्रग्रहण

मिति पक्षे नियमार्थं अभ्यासे ङ्काबेव यथा स्यात्। अशात्स्वरत्यादौ मा भूदिति॥ यस्माद्धासेरड्डिः हि

तस्यैवाङः साहचर्यादित्वविधौ ग्रहणमिति पक्षे तु यथा अशात्स्वरत्यादौ न भवति तथा ह्विष्यपि

न स्यादिति विध्यर्थं। तस्मात्त्वत्ययलोपे सति प्रत्ययलक्षणमेवेति नियमार्थमिदं सूत्रं। प्रत्ययाप्रत्य

यसाधारणं रूपमाश्रित्य यत्कार्यं विधीयते तन्निवृत्तिः फलं। तेन शोभनाटषदोऽप्यप्रसादस्य सः

स्टषत्। अत्र सोर्मनसी अलोमोषसीरति सूत्रेण शोभनात्परस्य मत्वतस्य असंतस्य चोत्तरपदस्य

श॰कौ॰

वक्रव्रीह्यो विधीयमानस्याद्युदात्तत्वं न भवति। अत्राहिताग्निष्वपि जातिस्य्याविबह्वावेनअसंतमन्तरपद
मस्त्येव किंतु अस्त इति तूर्यंप्रत्ययाप्रत्ययसाश्वत्थं। अनितस्मन् अहणान्तर्षवता चान्तर्षकेन च दंत
विधिं प्रयोजयंतीति वक्ष्यमाणत्वात्। अतो नियमेनाद्युदात्तत्वाहृत्तिः सिद्धा। तथा वनजूखम्णाक्षित
तो दात्तं पदं भवति॥ इदं त्ववधेयं। न केवलं स्वरार्थमेवेदं सूत्रं। किंतु उक्तोदाहरणाएवशास्त्रवत्र
त्वं संतस्येत्युपधादीर्घोपि उक्तनियमेनैव व्यावर्त्यः। वार्तिकमते तु उक्तस्वरस्य दीर्घव्याहृते श्च
सिद्धये उपायांतरमन्वेषणीयमिति। नवपदिति यमार्षसूत्रं तर्हि पित्र्येत्यत्र प्रत्ययलक्षणेन प
दत्वमितिवृत्तिः कथं योज्या। एवं समासत्वान्मानिपदिकत्वं। स्व क्रमोरितीस्नभयज्ञाहोकर्मणी
तिकर्मणि षष्ठी। इत्यादयोपि तत्र तत्राभियुक्तग्रंथाः कथं योज्या इति। अत्रोच्यते। योस्माकंति

तीत्यनेनत्तनमव

यमविधिः समीमांसकरीत्या परिसंख्याविधिरिति भावत्स्पष्टविवरणादौ । तत्र दोषत्रयं स्वार्थहानिः
परार्थपरिकल्पना प्राप्तबाधश्चेति । नन्वपयमत्यासत्यतन इति पदात्तदा नियमविधेर्निषेध एवार्थः ।
प्रत्ययलक्षणया ह्येनन तद्धि चेल्लक्ष्यते । भवतीति । तथा च स्यानेनेतरतमस्तद्वे भाष्यं । नानेनान्तरतमा नि
वर्त्यन्ते । अपि तत्रानन्तरतमा निवर्त्यन्त इति । अत एव च वार्त्तिककारोऽपि वक्ष्यति । उभयप्राप्तौ कर्म
णीति प्रतिनिषेधेऽकादिप्रयोगोऽप्रतिषेध इति । अस्मिन्पक्षे उभयप्राप्ताविति परिशेषिता षष्ठ्या
दिक्रमेण व्याख्येयं न तु विहितेति । यदि तु दोषत्रयगौरवपरिहारार्थं प्रत्ययलक्षणसूत्रं चेयमप्याश्र
न्व्याख्या पञ्चान्तपदवृत्तापकास्त्यानिवर्त्तत्रं चस्य प्रत्ययलोपे तत्र विषयकता कल्प्यते । सामान्य
पुरस्कारप्रवृत्तस्य शास्त्रस्य विशेषतात्पर्यं हि लघ्वपि कल्प्यमेव । अन्यथाकविल्पपत्तः भाट

शा॰कौ॰
८
8

मतेन तौ शैणं करोतीत्यत्र पश्वावेव ज्ञ होतीत्यादिविधिभिराहवनीयविधेरिव विशेषविधिना सामा
न्यविधेः संकोचसंभवाच्च। न चैवं सामान्यस्य विशेषेऽउपसंहारापत्तिः सामान्यशास्त्रप्रणयनवैय
र्थ्यापत्तेः। वेदेन न काश्चित्प्रणेतारो येनैवं पर्यनुयुज्येतेति वन्तर्थकरणस्याग्नेये उपसंहारो मीमांसा
याम् अस्थपेतः कल्पसूत्रकारास्तु तत्प्राप्तिव्यवस्थाप एव। तथा च भगवता कात्यायनेन सूत्रितं। अवि
शेषाद् भौवेति। एवं च सामान्यशास्त्रस्य विशेषे लक्षणया उभयवाच्यत्वात्तपेवोपपत्तौ दोषत्रयं
न स्तोकव्याप्तिमिति पक्षः। तदा उदाहृतग्रंथाः समयोगे वा नैयायिकमतेनन्तात्पर्यसंकोचस्य लेलक्ष
णानास्त्येवेति निर्विवाद विशेषधर्मप्रकारकबोधस्याहेतुतायामेव तदभ्युपगमात्। सा
मान्यप्रकारकस्य विशेषविशेष्यकस्यापि लक्षणां विनानिर्वाहादिति सुधीभिराकलनीयं। ८

प्रसक्ताः। तमप्रग्रहणात्तु चतुर्थाभवंति। ते हि सोष्माणो नादवंतश्च। ऊष्मा ऊष्मत्वं वर्णधर्मस्तत्सहि
तास्सोष्माणः। तथा च वक्ष्यमाणानां प्रातिशाख्ये वर्गे वर्गे च प्रथमावर्जा घोषाशुष्मा सोष्माणो वर्णनास्ति
कैतयइति। शादय ऊष्माणः। सस्थानेन द्वितीया हकारेण चतुर्था इति शिक्षा। इह त्रीणि वाक्या
नि। ऊष्मशब्दश्च धर्मिवचनः शषसहा ऊष्माण इति प्रथमवाक्यार्थः सस्थानेनेति। इत्थंभूतल
क्षणे तृतीया। हशषसाः क्रमेण वक्ष्यमाणानां द्वितीयानां सस्थानाः। यथा शादय ऊष्माणस्तथैव
खादयोपीत्यर्थः। फकारस्य तु यद्यपि सस्थान ऊष्मा नास्ति तथापि तस्य विशिष्टे वा स्थानं बोध्यं।
हकारेण चतुर्था इति। यथा हकार ऊष्मा एवं तेपीत्यर्थः। नन्वेवमिष्टउक्त इत्यादावानर्थ्याद्दर्द्धमा
त्रस्य यण्स्थानेऽर्द्धमात्रइकस्यात्। दध्यत्र तु अपास्य इत्यादौ तु क्रमात्त्रिकाचितात्त्रिकयोस्तथा

सि. कौ.
५
१

विधेयत्वप्राप्तस्यादिति चेन्न। अर्धमात्रस्यैकोमात्रिकद्विमात्रिकव्यंजनस्य लोकवेदयोरप्रसिद्धत्वात्।
योऽस्ति स एव भविष्यति। इह भाष्येऽन्तरतम इति सप्तम्यन्तपाठोऽप्युपन्यस्य दूषितः। तथाहि। अन्तर
तम उरण्रपर इति संहितया तावत्सूत्रकृदपाठीत्। पदकारास्तु व्याख्यातारः। तत्र सप्तम्यन्तमपि
शक्यं छेत्तुं। षष्ठीति चानुवर्तते। अन्तरतमे स्थानिनि षष्ठी उपसंहर्तव्येति सूत्रार्थः। एवं चाकः स
वर्णे दीर्घ इत्यत्र विधेयस्य दीर्घस्यान्तरतमे स्थानिनि निष्कृक इति विषष्ठ्या उपसंहरणात्। सिद्धमिष्टं।
तथा वान्तो यि प्रत्यय इत्यत्रापि च इत्यनुवृत्तायाः षष्ठ्या वान्तादेशस्थान्यन्तरतमयोरोदौतोरुपसं
हारात्सिद्धं। अन्यथा एज्मात्रस्य वान्तादेशः स्यात्। अत्रेदं हृदयं। इको यणचीति यण इस्वा
नामेव स्यान्नतु दीर्घाणां। अर्धमात्रस्य हि मात्रिकः संनिकृष्ट इति तत्रैवेक इति षष्ठ्या उपसं ५

हारात्। तथैकोगुणवृद्धीश्चोभयोरितीति षष्ठ्योर्गुणवृद्धोरंतरतमे षे वेत्यस्य चोपसंहारा एवैतालवि
तानायकोलावक इत्यादावेवस्यात्। चेता स्तोता चायकः स्तावक इत्यादौ तु न स्यादिति दिक्। त
देवं सप्तम्यंतपदास्पष्टत्वात् स्थमांतपदएव युक्त इति स्थितं। स्यादेतत्। एवं सत्येज्मात्रस्य वांता
देशः स्यादिति चेत्। अत्राहुः। पूर्वसूत्रे तावद्व्यवस्थासंबंधे प्रवृत्ते। अंतरतमपरिभाषा वा अर्थाधि
कारस्येहाश्रीयते। यावृत्तोवांतादेशाः पूर्वदृष्टश्रोकारस्यान्तिकोऽपि औकारस्यान्तिकस्यावृत्ता
दृष्टोपि प्रत्यये भवतीति सूत्रार्थः। यद्वा। वांत इति न करिष्यते। नचैवं चेयंनेयमित्यादावतिप्रसंगः।
तत्प्रजयावितियोगं विभज्य कं टतालव्यस्य चेद्भवति द्विजोरेवेतीति नियमपरतया व्याख्यानात्।
त्। द्विज्योः प्रकृत्यार्थे एवेति द्वितीयसूत्रार्थः। तेनाहीयार्थे तयोरपि नेति बोध्यं। नन्वेवमपि

पा॰कौ॰ ९ 10

शार्ङ्गरवादिगणपठिते नञ्नरयोर्वृद्धिश्चेति सूत्रेण नरशब्दस्य नारीति रूपं न सिद्ध्येत् तथाहि। नरश
ब्दस्य ङीन्संनियोगेन विधीयमाना वृद्धिरलोऽन्त्यस्येत्यस्य स्यात्। तथा च यस्येति चेति लोपेन तस्या निवृ
त्तौ वृद्धिवचनं व्यर्थं स्यात्। न च नृशब्दार्थं तदिति वाच्यं। एवं हि सति नृ वृद्धिश्चेत्येव ब्रूयात्। न च नरश
ब्देऽपि परत्वाद्यस्येति लोपे कृते वृद्धिर्भवतीति नानर्थिकेति वाच्यं। प्रत्ययसंनियोगशिष्टत्वेन वृद्धेरं
तरङ्गत्वात्। ननु वचनसामर्थ्याद्बहिरङ्गो लोपो बाध्यतां। आहोस्विदन्तरङ्गपरिभाषां बाधित्वा परत्वा
द्यस्येति लोपे कृते वृद्धिर्भवतीति संशये परिभाषाबाध एव न्याय्यः। तदुक्तं अंगगुणविरोधे च
तादर्थ्यादिति किंच। वाह ऊठ् इत्यत्र ज्ञापितत्वेनानुमेयायाः परिभाषाया एव बाधेनोपपत्तेः।
साक्षाच्छ्रुतस्य यस्येति लोपस्य बाधो नोचितः। तथा च लोपे कृते वृद्धिरिति सिद्धं नारीति रूपमिति ९

चेत्। सत्यं। किं तु समग्रमंत्यच्छेदपक्षापवृत्तत्वं हि शङ्कितेऽ नरत्तमतिर्हृत्तिरिति हृद्धं नरत्नमेस्यानि निष
ष्ठाउपसंहारादकारस्य वृद्धिर्भवति। प्रथमांतच्छेदपक्षे त्वादेशत्वेऽ नरत्नमतिर्धृत्तिरित्यलेंात्यस्येति
वचनाद्रेफस्य स्यात्। तस्मात्सिद्धान्ते नारीति रूपं नृशब्दस्य ङः साधमिति पूर्वपक्षः। अत्राहुः। नृश
ब्दपाठस्य प्रत्याख्यानमेव भाष्यकृतोभिप्रेतं। समग्रमंतपक्षनिराकरणपरभाष्येण तथैवानुमाना
त्। न चैवं नृशब्दाङ्ङ्या निलक्षणो ङीषि सति नारीति रूपं स्यादिति वाच्यं इष्टापत्तेः। तथा च प्रयुज्यते। किं
नृणां नॄणामिति। यद्वा। नृशब्दस्य नित्यनपुंलिंगत्वमेवास्तु। तथा च ङ्काति प्रसंगः। उक्तं श्रयो
गस्तु पुंयोगलक्षणो ङीषि भविष्यति। यथान्यासेपि तस्य ङ्वीरत्वात्। अथ वा नृ न रपो रित्यत्रात
इत्यनुवर्तते ऽजाद्यतष्टाबिति सूत्रात्। तच्चावृत्तिसामर्थ्यात्स्वस्याविपरिणतं नृशब्देन सह वे

पधिकरणेपेनसंबध्यते। ननु न्यासे नासंभवात्। तस्मात्किदं नीरीति। अत्रेदं वक्तव्यं। प्रत्याख्यायत्तां ना
मनरशब्दः। नृनरयोरितिपठतः सूत्रकृतो मते नृकथमक्तिसंभवः। नचनरीत्येवेष्टमितिवाच्यं।
वृद्धिविधायकसूत्रमध्ये नरशब्दपाठस्य वैफल्यापत्तेः। अतनरत्यनुवृत्त्यासमर्थनमपिक्लिष्टं। एकदे
शानुवृत्तिविभक्तिविपरिणामाद्याश्रयणात्। किंच। नृनरयोरितिगणपाठे पठ्यते नत्वष्टाध्या
य्यां। गणे चानरइतिनप्रकृतं। तथाच शार्ङ्गरवाद्यञित्यादिशब्दे नगणसूत्रमपिहृदयमागमप्यत
त्रानरइत्यस्यान्वयोवाच्यः। सचाक्लिष्टनरइतिस्पष्टमेव। तस्मादित्थंसमाधेयं। नरइतिरांतेत्सुप्साका
रानुकरणंतस्यस्तुः नरः नृश्चनरश्चेति द्वंद्वः। शार्ङ्गरवाद्यञोङीन्। यद्वा। स्यानेनरतमरइत्यत्रतं
त्रेणाद्धेयापिच्छेदस्तत्रकृतःसंमतः। भाष्याकरीत्यालौकिकन्यायाश्रयणेनसूत्रप्रत्याख्यान ११

पत्तेपिहि प्रकृतितश्चादेशतश्चेत्युभयथाप्यान्तरतमनिर्हृतिरस्त्येवा सूत्रकृत्तोवाचानेकीसा भाष्यकृ
तस्तु त्यायप्रसिद्धेयं न्यदेतत्। तथाचवांतोयिनरपोरित्यादिसर्वंसष्टमेवा। अतएवचतर्पस्थानेंतोऽ
नरतमनिर्हृत्तिमाश्रित्यनारीति तूपसाधयन्नहरदत्तोपिनविरुध्यते। इकोयणचीत्यादावतिप्रसंगः
परमवर्णयिष्यते। सचत्वादिभ्यः खादीनांफस्वरत्यादित्वापकेनवावनिवत्यन्यायमलायाश्वस्यानि
तोंतरतमनिर्हृत्तेरतित्यन्तामाश्रित्यपरिहर्तव्य इति दिक्। सूत्रप्रत्याख्यानप्रकारस्तूच्यते। समाया
मास्यनामित्युक्तेहिपंडिताःपंडितैःसहसमासंते। शूराःशूरैःकवयःकविभिर्नत्वसंकरेण। किं
बहुना। गवांसंघप्रतिगोर्धावति। अश्वोऽश्वानामित्यादिस्थवस्यातिर्यग्स्वपिदृश्यते। तस्मात्स्थ
मेवाक्यार्थस्यलोकतरावलाभात्तदर्थंसूत्रमारंभणीयं। एवं स्थानेन्तरतमं बलीयस्त्वापिलोक

ग्रा·कौ· तएवसिद्धं। तथाहि। मूर्धन्यः सहचरितयोरनयोर्गौर्वोर्वामजातीयांतरसंबलनेसत्यपि कृष्णत्वपांडुत्वादि
१२ गुणासदृशानपिहित्वास्थानसाम्यपुरस्कारेणैवपरस्परापेक्षाटष्यते। तदेवं लोकतः सिद्धेकिंवचने
12 नेति ॥ उरण्रपरः॥ अवर्णस्यस्थानेयोऽण्समप्रसंगादस्यायामेवरप्रत्याहाररपरः स्यात्॥ अटका
रेणसावर्ण्यात्रिंशतउपस्थानेसतिस्थानेसतिस्थानैंनरतमपरिभाषयारश्रुतिमतःस्थानेरपरः
लस्थानेत्तुलपरइतिविवेक्तव्यं। कृष्णर्द्धिः। तवल्कारः। अलस्थानीयोऽण्इतिग्रन्थस्तुयथासंख्यभ्र
मापादकः। असंगतश्च। शाह्नतः साम्येनाभिमतानिर्वाहात्। नहिसहेशवृद्धयमास्ति। अर्थतस्तु
नतरांसाम्यं। अथाज्ञनयथासंख्यमभिमतंनर्हिकिंवृत्तिमध्येदद्योरेवविशिष्यालेखिन। आच १२
आचरलो। अलोःस्थानमितिविग्रहेउश्चउलचअलोरितिविग्रहेवाद्वंद्वस्यउर्लभत्वात्। सहि

विद्रूपाणामपिसमानार्थानामित्येकशेषेणाबाध्यते।चित्रगुशब्दस्यचित्रागवीपरतायामिवसा
धुत्वनिर्वाहार्थंलक्षणामाश्रित्यलक्षितलक्षणयाशाकपार्थिवंपर्यवसानमितिकथंचित्रिवीहस्त
तत्त्वेषुश्रद्धालुभिराश्रेयमितिदिक्।अत्रपक्षचतुष्टयंसंभाव्यते।उःस्थानेरपरोऽणस्यादितिरप
रत्वविशिष्टोऽणविधीयतइति।प्रथमःपक्षः।उःस्थानेऽणमनणांचप्रसंगेऽणेवेतिनियमः
सचरपरइतिवाक्यभेदेनरपरत्वंविधीयतइतिद्वितीयःपक्षः।उःस्थानेयोऽणुत्पन्नःस्यात्तस्य
रपरत्वमात्रंविधीयतइतितृतीयःपक्षः॥प्रसंगावस्थायामेवरपरत्वंविधीयतइतिचतुर्थः
पक्षः।तत्राद्येपक्षेनाप्राप्तेषूदात्तादिषुविधीयमानोऽणस्तेषांबाधकःस्यात्।तैरनवरुद्धस्य
विषयस्यालाभात्।एवंहितदावचनव्यक्तिः।षष्ठीनिर्दिष्टमात्रस्यसवर्णादेशान्तरतमःस्यात्

ऋवर्णास्यत्वणरपरइति। ननूदात्तानुदात्तस्वरितानुनासिकेषु दोषः। तथाहि। कृतिरित्यत्रत्रित्वादि
र्तित्यमितिप्राप्तमस्कारं बाधित्वाणरपरः स्यात्। तथा प्रकृतं प्रशृतमित्यत्र गतिरनंतर इति एवं परप्रकृ
तिस्वरे कृते शेषं निघातमुदात्तादनुदात्तस्येति स्वरितं च बाधेत। तथान्दःपाहीत्यत्र न्येरइति ताप
कात्सर्वसवर्णदीर्घसंभवेप्यनुनासिकं बाधित्वाणरपरः स्यात्। किंचाकर्त्ताकारकइत्यत्र गुणवृद्धी
बाधित्वाणभवत्वकारएवेति नियमाभावात्कदाचिदिकारउकारश्चस्यात्। अपिच। येमीप्रतिपदो
क्ताइत्योत्त्वादयः। ऋतइद्धातोरुदोष्ठ्यपूर्वस्येत्येते पुरपरत्वं न स्यात्। द्वितीयेतु गुणवृद्ध्योर्न दोषः।
अणतणोः प्रसक्तयोरणेवेति नियमेन कर्त्ताकारकइत्यादिसिद्धेः। ननु ऋस्येस्यातितिसर्वोवृद्धि
रंतरतमा। तारकइत्यादौ दीर्घत्वमर्वापि प्रमाणतोऽतरतमेत्यविशेषादुभयत्रापिसकलह

द्धिप्रसंगे नियमोऽस्तु। गुणास्तु कर्णेत्यादौ मात्रिक पदप्राप्तः। तरित्तेत्यादौ द्विमात्रस्य तद्विमात्रपदेऽ
वप्राप्तः। तथा चाणन्गणेः प्रसंगाभावेन नियमाप्रवृत्तौ दीर्घे षडेऽवस्थात्। कृत्स्ने घुत्वकारो भव
त्वपि रपरो न स्यात्। यो हि प्रथमवाक्येनाणेवेति नियम्यते। तस्यैव द्वितीयेन रपरत्वं विधीयते।
तथा च गुणे दोषोऽस्त्वेवेति चेन्न। च जोः कु घिण्ण्यतोरित्यादौ सावकाशायाः स्थानेऽन्तरतमपरि
भाषाया हि विधेश्चरितार्थमादात्तादिषु दोषस्तदवस्थ एव। तथा शतिपदोक्तेषित्वादिषु अपि।
तृतीयेन द्रात्तादिषु न दोषः तत्र हि विधिभिरन्तरतमपरिभाषासंस्कृतैरर्वर्णस्यैव विधानात्।
किरतीत्यादावपि न दोषः। गुणवृद्ध्योस्तु दोष एव। तथा हि। ओतर्पेतो मात्रिकस्य मात्रिके गुणे
रपरत्वे च हूतेकर्णेत्यादिषु यथापि सिध्यति तथापि तरितेत्यादावेऽवस्थात्। तथाऽविशेषाद्

श॰ कौ॰
१५
15

द्वित्वेपिप्रवृत्तेआकारस्याणत्वादुपरत्वेकृतेकारकस्तारकइत्यादिप्रयोपिसिद्ध्यति। तथापिका
यकस्तावकइत्यादावनिष्टमप्यापद्येत। यत्तुएवंसूत्रेभाष्यकारैरिमंपक्षमाश्रित्यसमाहितं। अनंतात्त
र्यमेवैतयोरानंतर्यमिति। यच्चतत्रैववार्तिककारैरुक्तं। संप्रयोगोवानष्टाश्वदग्धरथवदिति। तदु
भयमपिप्रायिकं। तथाहि। यदाअश्वत्वजात्यवच्छिन्नस्यैकोंशोनष्टइतिपरीक्ष्यते। अश्वत्वजात्यवच्छि
न्नस्यैकस्येतितदाअनुरूपप्रतिसंबंधिवाहित्येनैवधर्मेणतयोरानंतर्यम्। नत्वानंतर्यंचतद्देतिम
तित्रयोक्तिरस्ति। प्रस्तुतसोक्ष्णःसोक्ष्णइतिभाष्याद्युक्तेश्वानियमएवलभ्यते। एवंनष्टाश्वद
ग्धरथन्यायोपिजात्यवच्छेदेनपरीक्षायामेव। व्यक्तिपुरस्कारेणपरीक्षायांतूक्तरीत्याद्वैधेयं १५
पत्तेः। तथाचात्रसूत्रेवार्तिकं। यङःस्थानेणःसरपरइतिचेद्गुणवृद्ध्योरवर्णाप्रतिपत्तिरिति। किंच।

अस्मिन्नेवैकरेफपरत्वं ककवालकारपरत्वमिति व्यवस्थापि जहपप्रादास्यात्। स्वतंत्रः कर्तेति निर्देशा
न्नविति य मोऽग्रोपडि। अचि विभाषेत्यारंभाच्च न विकल्प इति समर्थ्यनेऽपि प्रतिपत्तिगौरवं स्यादेव।
रेफस्य पूर्वोत्तरांतीसाध्य यित्वमावें नोटाकि नाविति सवात्समासैकदेशभूतमंतग्रहणमनुवर्त्य
तस्य रपरत्वस्य पदार्थविशेषणीभूतेन तेन रेफेणात्वयस्त्ववाच्य इति महान्क्लेशः। चतुर्थपक्षेऽतनैत
दुपपद्यत इति वक्ष्यामः। तस्माच्च तृतीयपक्ष एव निर्दोषत्वादाश्रितः। स चेत्थमुपपादनीयः। स्था
नेऽशाद्व्दयमिह नवर्तते। तत्रैकस्य स्थाने योऽण् स रपरो वा स्यादिति स्थानसंबंधलाभाय। द्वितीयं तु
प्रसंगावस्थायामेव रपरो भवतीति कालविधानार्थं। स्थानेंऽतरतम इत्यत्र स्थानग्रहणस्य तात्वादि
परत्वेऽपि शाब्दाधिकारस्थस्य णादिहस्थसंबंधपरत्वं बोध्यं। एवं च ग्रहणद्वयोः प्रासंगावस्थायामे

ग्रा॰कौ॰
१५
15

बाणोऽपरः संप्रत्ययः इति प्रमाणेनोऽन्तरतमावैडैचौ बाधित्वा स्थानेऽन्तरतमो णेदमवतीति न कश्चि
द्दोषः एवमुदात्तादिविशिष्टेष्वन्तरतमत्वादकारो नत्वरर्ऽउरस्त्वबधेयं। न चैवं कर्तृत्वादावनेका
ल्त्वात्सर्वादेशप्रसंगः आनुपूर्व्येणासिद्धत्वात्। तथाहि। अस्थानित्वमुपजीव्य प्रवृत्तेरपरत्वं सर्वा
देशतां नापादयति। उपजीव्यविरोधात्। तथा च पूर्वसूत्रे वार्त्तिकं। सर्वादेशप्रसंगस्त्वनेकाल्
त्वात्। न वानेकालत्वस्य तदाश्रयत्वादवर्णादेशस्याविद्यानत्वात् इति। अणुग्रहणं किं। दीङ्विङादी।
नोरपरत्वं माभूत्। माञ्चीयति। क्रियते। तथा च कलोपो विरपरः स्यात्। एवं च सूत्रे वैपर्य्याय
र्ण्यापन्नौ सामर्थ्यादलोऽन्त्यविधिं बाधित्वा सर्वादेशः स्यात्। तथा होतापोता वा विन्यत्रानङोऽपिर
परत्वे संयोगान्तलोपे च कृते तस्यासिद्धत्वान्न लोपो न स्यादिति दिक्। अप्ययोदीङादिष्वेणसर १५

परःकृतोनेतिचेन्न। अनादेशत्वात्। आदेशत्वंहि समुदाये विश्रान्तं। नचैवं कृस्मर्हिरित्यादौ रपरत्वं
नस्यात्। पूर्वपरसमुदायस्य स्थानित्वादिति वाच्यं। पूर्वपरयोरिति द्विवचननिर्देशेन संहितयो
रवयवयोरेव स्थानित्वावगमात्। अतएव द्वयोः स्थानिनोर्भिन्नत्वादिषु नत्त्ववद्द्वावादेशौ माभूता
मिति तन्नैकग्रहणं कृतं। तस्मादकारस्यापि स्थानित्वमस्त्येव। तदुक्तं योरुभयोः स्थाने भवतिल
भते सावयवस्तरतो व्यपदेशमिति। तस्मादेकादेशोपि रपरत्वं भवतीति स्थितं। स्यादेतत्। उत्करी
त्यादौ तदुदित्येकादेशस्यापि रपरत्वं स्यात्। तथा च विभक्तिसकारस्य हृते कृते पूर्वस्य रोरीति
लोपे ढ्रलोपे पूर्वस्य दीर्घेणामातः पिरु इति प्राप्नोतीति चेत्। मैवं। रुत्वस्यासिद्धत्वेन रात्सस्येति स
कारलोपे रेफस्य विसर्गेणानुपस्थितेः। न त्वेवं मातुः कार्यमित्यत्रापि रपरत्वं स्यात्। इदुपधस्य चाप्रत्यय

स्येति सत्त्वात्। न चायं प्रत्ययाविसर्जनीयएवेति वाच्यं। अकारस्य प्रत्ययावयवत्वेप्यप्रत्ययतया न दा
देशस्य स्वतरामनत्यानादिति चेन्न। उच्यते। अत तउदित्येकादेशस्य परादिग्रहणे न ग्रहणादस्ति
तावत्तांतस्य प्रत्ययसंज्ञा। सकारेल्लमेत्त्ववारीष्टस्यैव प्रत्ययसंज्ञा। एकदेशविकृतस्योपसंख्यानात्
स्थानिवदादेशाइत्यात्राटेशग्रहणाद्वा।। अत एव यडो एकारे लमेः कारस्य प्रत्ययसंज्ञेत्युक्तं। तथा
चाप्रत्ययस्येति षत्वप्रतिषेधः सिद्धः। न चैवं प्रत्ययावयवस्यानिकत्वाभावात्षत्वं स्यादेवेति वाच्यं।
अप्रत्ययस्येत्यनुवादे परिभाषाद्वयस्याते न स्यानेयोगस्यत्रुर्लभत्वात्। अवयवावयविभाव
स्य षष्ठ्यर्थस्य संभवात्। नन्वप्रत्ययस्येति पर्युदासः। तथा च पूर्वीतत्वेनैकादेशग्रहणात्षत्वं
स्यादेव। किंच। प्रसज्यप्रतिषेधपक्षेपि संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्य

त्वात्। अप्रत्ययो यो विसर्गस्तस्य षत्वं स्यादिति वाक्यार्थः। तथा चाग्निः करोतीत्यादौ स्यान्निवज्ञावेनावि
सर्गस्य प्रत्ययत्वान्माभूत् षत्वं। मातुः कायमित्यादौ त्वस्यादेवेति चेत्। इहेदं तत्त्वं। कस्कादिषु भ्रातुष्पु
त्र इत्यस्य पाठो ज्ञापकः। एकादेशशास्त्रेण निर्वृत्तात्यस्य षत्वं न स्यादिति। यद्वा। प्रसज्यप्रतिषेधपवै
यधिकरण्यान्वयावबत्ताप्येने। यत्तु भाष्ये लुप्यते त्र प्रत्ययो रात्नसेति। यत्त्वकैपटकृत्तं तद्व्याख्यानं
उक्तेकृते वशिष्ठः सकार एव प्रत्ययसंज्ञकः मन्वलमरतितङ्भयं चिंत्यं। इहत्सिद्धं तप्रसंगोरपरत्वा
दिति पदेय यण्यरायदित्रूपेणाविधानादमक्तृत्वादिशंकैव नास्ति। तथापि संप्रयोगो वेति पूर्व सू
त्रोक्तरीत्या तृतीयपक्षमाश्रित्य भाष्ये पदत्रयं चिंतितं। तत्राभक्तत्वपरादित्वपदे च वज्रे इत्यादौ
उहृदत्वे रपरत्वे च कृते हलादिः शेषेण रेफो न निवर्तेत। अभ्यासावयवस्थानादेर्हलू एव तेन निव

प्रा·कौ·
८
17

र्त्तितत्वात्। तस्मादेत्यग्रहणमनुवर्त्त्यपूर्वोत्तपक्षरादेहस्यापित इति संक्षेपः॥ अलोन्त्यस्य॥
स्थानषष्ठीनिर्दिष्टस्य यदुच्यते तदंत्यस्यालः स्थाने बोध्यं। त्यदादीनामः। सः। यः। स्थानषष्ठीतिकिं। आर्द्ध
धातुकस्येट् तत्वकारणसर्वैमाभूत्। इदंच षष्ठीस्थानेयोगेतिसूत्रस्यानुवृत्तेर्लभ्यते। अलइतिकिं। प
दस्येत्यधिकृत्यविधीयमानं वसस्रुस्विरितिदत्वं परमानडुह्यामित्यादावंत्यस्यपदस्यमाभूत्। एतेना
लइतिजसंतमाश्रित्यालात्मकाआदेशा अंत्यस्यस्यरिति व्याचक्षाणाः परास्ताः। अंत्यस्यपदस्यापि
प्रसंगात्। किंचैवंलाचवार्यमलेंत्यस्येत्येवसूत्रयेत्। अपिच अहर्मनश्चक्षुश्चेतोरहोरजसांलो
पः पादश तस्यसंख्यादेरितिलोपोप्यंकिलोपश्च सर्वादेशः स्यात्। न तन्नश्चविरजीकरोतीत्यादि
नसिद्ध्येत्। यच्चलइतिजसंतमितिपदे ऽनेकालशित्सर्वस्येतिसूत्रे ऽनेकालग्रहणं न कर्त्तव्य ८

मितिलाघवोपवर्णनेन तदपिना षष्ठीपदेऽपि ङिच्चेत्यत्र ङिदेवानेकालं त्यस्य स्यात्तत्र त्वङिदपीति त्रि
यमाश्रयणेनानेकाल्ग्रहणप्रत्याख्यानसंभवात्। वस्तुतस्तु पदद्वयेऽप्यनेकाल्ग्रहणाकर्त्त
व्यमेव। अन्यथाऽतो भिस ऐस इत्यादिषु पंचमीनिर्देशेऽनेकालप्यादेशः परस्यादेः स्यात्। सत्य
नेकाल्ग्रहणे परत्वात्सर्वादेशः। अत एव तस्मादित्युत्तरस्यादेरिति नासूत्रि। तथाहि। अलोन्त्यस्येत्य
स्य द्वावपवादौ। आदेः परस्यानेकाल्शित्सर्वस्येति। तत्र प्रथमस्यावकाशः ईदासः बहोर्लोपः इति। अ
सीनः। भूयात्। द्वितीयस्यावकाशः। अस्तेर्भूरित्यादि। अतो भिस ऐसित्यादौ परत्वात्सर्वादेशत्वे सिद्धे
एमैरित्यादि। न चादेः परस्येत्यत्रालः इति जसंततमनुवर्त्य एमैरित्यादि साधनीयमिति वाच्यं। तथा
सति भूयानभूमेत्यादावसिद्ध्यापत्तेः। तदेवं कार्यसंपातेऽल्पनसंहारो व्याख्यातः। ङिच्चेत्यादिमसंद

प्र·कौ·
१८
18

र्भीनुगुणत्वात्। यद्वा। षष्ठ्या एवायमनुसंहारः। यास्थाने योगा षष्ठी सा तस्यालो वोध्येति। अत्र पदे
ङि·च्चेत्यस्यायमर्थः। यत्र ङि·दादेशो विधीयते तत्र या षष्ठी सा तस्यालः इति। एवमग्रेपि ॥ ङिच्च ॥ ङि·
दनेकाल्प्यन्त्यस्य स्यात्। दभ्रादभे। अनन्त्यार्थं ङि·त्त्वेष्वनङादिषु चरितार्थमिदं तातङि· परेणानेकाल्
त्वात्सर्वस्येत्यनेन बाध्यते। ननूत्सर्गापवादयोरयुक्तो विप्रतिषेध इति चेत्सत्यं। सर्वादेशोपि ता
तङि· गुणवृद्धिप्रतिषेधरूपं प्रयोजनं संभाव्यते· तावता च किंचिद्विलंबितप्रवृत्तिकोयमपवादो
प्यस्मिन्विषये उत्सर्गेण समकक्षतामापन्न इति युक्तो विप्रतिषेधः। यद्वा एरुरित्यस्यानंतरं
तित्योस्तातादिति वक्तव्ये ङि·त्करणं गुणवृद्धिप्रतिषेधार्थमेवेति विप्रतिषेधोपपत्तिः। अ
स्तु वा विनापि विप्रतिषेधं सर्वादेशः ॥ प्रदर्शितस्य गुणवृद्धिप्रतिषेधार्थत्वस्य सर्वादेश १८

तामेत्तरेणानुपपत्तेः ॥ ॥ आदेः परस्य ॥ परस्य यद्विधीयते तत्तदादेरलो बोध्यं । ईदासः । अत्र त
स्मादित्युत्तरस्यासुपतिष्ठते तेनादेरीकारः । आसीनः ॥ ॥ अनेकाल्शित्सर्वस्य ॥ अनेकाला
देशः शिच्च सर्वस्य स्यात् । अस्तेर्भूः । भविता । इदमः इश् । इतः । ङिच्चेति नियमार्थत्वे अनेकाल्ग्रहण
मपवादविप्रतिषेधार्थमित्युक्तम् । यत्तु वृत्तिकारैर्जश्शसोः शिरिति शित उदाहरणं दत्तं । तच्चिंत्यं
सर्वादेशतां विनापि तस्यैवालामात् । सर्वादेशतायाश्चानुपूर्व्यादनेकाल्त्वेनैव णल्डादेशो
विधिर्वा सिद्धत्वात् । तथाहि । णलडाशिप्रभृतयो यदा सर्वादेशास्तदा प्रत्ययसंज्ञा ततः प्रत्ययादि
त्वप्रयुक्तास्य स्थाने नतो लोपः । न त्वप्रकालत्वे सत्यपि न सर्वादेशत्वक्षतिः । उपजीव्यविरोधापत्तेः
अतएव वार्तिककर्त्तैस्यादौ न सर्वादेशतेत्युक्तं । एकारेणानुबन्धेन शप्रभृतीनामनेकाल्त्वाद

पा॰कौ॰ ११ 19 वसिद्धे श्तिपुग्रहणं नानुबंधकृतमनेकाल्त्वमिति ज्ञापनार्थं। तेन दिव उत् अर्वणस्तृ इत्यादेर्न सर्वादेश
त्वमिति बोध्यं। ननु कथं ज्ञापकता। घुसोरेद्धावभ्यासलोपश्चेत्येन दर्थतया श्तिपुग्रहणस्य चरितार्थत्वात्।
न च हि लोपः शितीति क्रियते। तं ज्ञापयांचकृतं श्तित्वेन ज्ञानपयुक्तं सत्त्वं तिनि फलानि। इमुद इष्टित्वव
दिति सिद्धांतस्तिचेत्। सत्यं। अनेकान्ताअनुबंधा इति पक्षे नानुबंधकृतमनेकाल्त्वमित्यस्य प्रयो
जनाभावात्तदभिप्रायको लोपः शितीति च्छेद इति सिद्धांतः। एकान्तत्वपक्षे तूक्तरीत्या ज्ञापकता
प्रयोजनाभावश्च एकं। घ्वसोरित्यत्र तु लोपः इत्येव च्छेदः। लोपोपीति प्रकृते पुनर्लोपग्रहणसाम
र्थ्यात्सर्वादेशः। वार्त्तिकमते तु नानर्थके लोऽन्त्यविधिरित्येव सिद्धम्। न चानभ्यासविकारे
ष्विति पर्युदासः स्यादयं विषयः लोपस्य विकारत्वाभावात्। रूपांतरापत्तिर्हि विकारः। यथा ११

भ्रूनामित्। अर्तिपिपर्त्योश्चेत्यादि। अत एव यस्य शायां लोपो विकारात्पृथगुपात्तः। लोपागम
वर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति। उक्तं च। पृषोदरादीनीति सूत्रे कैयटेन।
द्वौ चापरौ वर्णविकारनाशाविति। वस्तुतस्तु पृषोदरेष्वावस्थायामेवांतरंगतयेत्संज्ञा। अत एवो
च्चरितप्रध्वंसिनोऽनुबंधाः स्मर्यमाणाः संत एव कार्यं निर्वाहयंतीति सिद्धांतः। इदं चोत्तरसूत्रे एव
कैयटे स्फुटम्। तथा च दिव औत्। अर्वणस्तृ इत्यादौ रेकालत्वादेकांतत्वेऽपि न सर्वादेशता प्रसज्य
ते। एवं च नानुबंधकृतमनेकाल्त्वमिति ज्ञापनं व्यर्थम्। शिद्ग्रहणं च सुतराम्। इदम इश्। इदं
किमोरीश्की इति शीशोस्तु प्राकारोच्चारणसामर्थ्यात्सर्वादेशतायाः प्राप्तलोपः। यत्तु क
तैर्षित्वादेशप्रयोजनाभावाच्छकारस्येत्संज्ञा न स्यादिति हरदत्तेनोक्तम्। तत्र लोपस्यैव

श० कौ० २०

प्रयोजनत्वात्। नचैवमच्चारणावैयर्थ्यं। सर्वादेशत्वसंपादनेन कृतार्थत्वादितिदिक्। तस्मादिह
सूत्रभाष्यकृत्तोरभिप्रायपर्श्चित्याः इहनानेकाल्शिदितिपठित्वा त्यस्यादेरितिचानुवर्त्यानुसंहार
द्वयनिषेधे सर्वस्येतिशाकटमकर्त्तव्यम्॥ ॥ इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्र
थमे पादे सप्तममाह्निकम् ॥ ॥ संवत् १९२८ ॥ ॐ ॥

शब्दकौस्तुभ श्लो १०० पत्रं १५०

२०

पा·कौ·
१

श्रीगणेशाय नमः ॥ इग्यणः संप्रसारणं ॥ यणः स्थाने इग्भवतीत्येवंरूपो वाक्यार्थः यण इस्थानि
क इग्रूपो वर्णश्चेत्युभयमपि संप्रसारणसंज्ञं स्यात्। तत्र ष्यङः संप्रसारणमित्यादिषु विधिप्रदेशेषु वा
क्यार्थस्य ग्रहणं संप्रसारणाच्चेत्याद्यनुवादप्रदेशेषु वर्णस्येति विवेकः। पूर्वसूत्रादितिशब्दानुवृत्तेर्वाक्या
र्थस्य संज्ञित्वं लभ्यते। तत्प्रत्याख्यानपक्षे तु वाक्यमेव संज्ञि। न चैवं तदेव विधेयं स्यादिति वाच्यं॥ वाह
ऊठ् संप्रसारणमिति सामानाधिकरण्यबलेन तदुपस्थापितार्थस्यैव विधेयत्वनिर्णयात्। न चैव
मपि ष्यङः संप्रसारणमित्यादौ दोषस्तादवस्थ्यम्। सामान्यापेक्षज्ञापकाश्रयणात्॥ ननु तथापि विवा
क्यतदर्थयोरन्यतरस्य संज्ञित्वमस्तु वर्णस्य तु कथमिति चेत्। तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणे
नार्थद्वयाभ्युपगमादित्यवेहि॥ अत्र च विधेयानुवादसमर्पकविभक्त्यासहैवेति निर्देश एव लिंगं। अ

हच। विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्येति। उभयोः संज्ञेति षष्ठीतत्पुरुषः॥ भर्तृ
हरिस्त्वाह। संप्रसारणसंज्ञायां लिंगाभ्यां वर्णवाक्ययोः। प्रविभागस्तथाप्यत्रैकस्मिन्नेव जायतेऽत
एवाद्विर्वचनेचीति न ज्ञापादितल्लक्षणः॥ एकशेषेणनिर्देशो भाष्यएवसमर्थितः इति। तेत्रेचशब्द
तंत्रसमर्थितं चेति मतभेदेन व्यवस्था बोध्या। अर्थभेदाच्छब्दभेदे आद्यः पक्षः। शब्दैक्ये द्वितीयः। आ
येपि व्यंजकध्वनिमात्रभेदे व्यंग्यैक्ये आवृत्तिरेवेत्यादि बोध्यं। एवं च तंत्रत्वमेकत्वेनोच्चारणेन भवेत्तत्सो
पकारतः। उपकारान्यथात्वं तु भवेदावृत्तिलक्षणमिति मीमांसकमर्यादानुरोधो वैयाकरणै
र्नादर्त्तव्यः। तस्य भाष्यादिसकलवैयाकरणग्रन्थविरुद्धत्वात्। स्थूलयुक्तिशूत्यत्वतपाङ्रूपपा
दत्वाच्चेति दिक्। यद्वा। वाक्यार्थएवसंज्ञी अनुवादे तु नत्रिष्वेतोवर्णोलक्ष्यते। संप्रसारणाज्ज्ञातं

धा-कौ. संप्रसारणमिति । अथवा वर्णपदसंज्ञी विधिप्रदेशोऽनुस्मृत्यवशादेकवद्भाविनीसंज्ञाश्रयणी
येति । सर्वेऽप्येते पक्षाः भाष्येऽस्थिताः । स्यादेतत् । अडुहितराम् इत्यत्र लकारस्य यणः स्थानेऽत्त
२ मप्रकृष्यैकवचनम् इट् तस्य च संप्रसारणसंज्ञायां सत्यां हलः इति दीर्घः स्यात् ॥ न रपंप्रतिलङ्त
स्यागत्वादिति ॥ अत्राहुः । संख्यातानुदेशाद्यकारस्यानिकस्यैवेकारस्य संज्ञा न तु लकारस्या
निकस्येति ॥ अत्रेदमवधेयं । वाक्यार्थः संज्ञीति पदे तस्योद्देश्यविधेयसंसर्गरूपतयान्वय
यासंख्यपरिभाषया स्थितो यणः स्थाने इक् स्याद्यथासंख्यमित्यवांतरवाक्यार्थः । सोऽयं संप्रसा
रणसंज्ञः स्यादिति महावाक्यार्थः । न चावांतरवाक्यार्थं गृहीत्वा पातिवातिड्डानीत्यादाव
तिप्रसंगः । तस्य संज्ञासंबंधमात्रफलकत्वात् ॥ अन्यथा ष्यङः संप्रसारणमित्यादेर्वैय्य २

वैयर्थ्यापत्तेः। अतो नोक्तदोषः। अदुहीत्यादेस्तल्लक्षणाभावाच्च। उभयसंज्ञात्वपक्षेप्युपस्थिता
न्वाद्यथासंख्यमप्रवृत्तेः एव वर्णाः संज्ञीति। अतो ऽदुहितरामित्यत्र नातिप्रसंगः। इदं च कर्मकर्त
रि रूपमिति हरदत्तः। उपलक्षणं चैतत्। केवलेकर्तर्यपि संभवात्। वर्णा एव संज्ञीति पक्षे
ऽयथासंख्यं दुहलि भ। अनुवादे परिभाषणामनुपस्थानस्योपपादितत्वात्। न चैवं स्थानेयो
गोपाख्यित्वेन लभ्येतेति वाच्यं। षष्ठीस्थानेयोगेत्यत्रानुवर्त्यत इत्युक्तस्य व्याख्येयत्वात्। उ
क्तं हि इको गुणवृद्धीरिति सूत्रे सिद्धं तु षष्ठ्यधिकारे वचनादिति इहैव वा सिंहावलोकनन्याये
न स्थानग्रहणापकर्षो ऽस्तु। यथासंख्यं तु ऽदुहलमसिद्धं। कथं तर्ह्यदुहितरामित्यत्र नातिप्रसं
गः इति चेत्। तेनावृत्त्या वाग्रपणेन संप्रसारणस्येत्यत्र तज्ज्ञापितग्रहणात्। यत्र। कार्यकाल

श·को
२
3

पक्षे यणः स्थाने संप्रसारणमिति भवतीति वाक्यार्थादनुवादत्वेन नास्ति। तत्र च परिभाषोपस्थि
तौ सत्यां यथासंख्यप्रवृत्त एव संज्ञी। स एव संप्रसारणस्येत्यादावुपतिष्ठते। अथवा व्याख्यानक्रमेण
संबंधो लौकिकन्यायसिद्धत्वादनुवादेपि सुलभः। यथासंख्यसूत्रं परं न प्रवर्त्तयितव्यमिति दि
क्। इग्यणामित्यत्र तु हलः इति दीर्घो नादिवदिति तपरकरणात्। अत एव पुलोक इत्यत्र संप्रसार
णस्येति दीर्घो नानन्वेवं भाव्यमानोप्युकारादेशः सवर्णान् गृह्णातीत्यर्थे ज्ञापकं तथा कथम
स्योपत्यासः इति चेन्न। तस्य वाक्यार्थः संज्ञीति पक्षे णोक्तत्वात्। संप्रसारणस्येत्यत्र तद्भावित
ग्रहणाद्वा। पक्षांतरे तु ऋत उदिति ज्ञापकं बोध्यं। नन्वेवमप्यत्तपुवावदत्तपुवध्यादावूठः
संप्रसारणसंज्ञायां संप्रसारणाच्चेति पूर्वरूपं स्यादिति चेन्न। संप्रसारणपूर्वत्वे समानांग २

ग्रहणस्य वार्त्तिके कृताकृतत्वात्। तत्र व्याख्यानपक्षे तु वार्णादाङ्गं बलीय इत्युवङ् भविष्यति। वाक्या
र्थः संस्कीत्यादिपक्षांतरे तु पूर्वरूपप्राप्तिरेव नास्ति। हृतो जीन इत्यादौ तु हल इति सूत्रारंभसामर्थ्या
त्संप्रसारणानिवृत्तस्यापि दीर्घप्रवृत्तिः। वर्णसंज्ञापक्षे त्वाल्विधौ स्थानिवद्भावासंभवेन हल इति सू
त्रारंभसामर्थ्यात्संप्रसारण(निर्दिष्टस्यापि दीर्घप्रवृत्तिः। वर्णसंज्ञापक्षे त्वाल्विधौ स्थानिवद्भावासं
भवेन हल इति सूत्रारंभसामर्थ्या)त्स्यादेशो कार्यप्रवृत्तेर्वाच्यत्वादिति दिक्॥ आद्यंतौ टकितौ॥
टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः। भविता। पापयति। पुरस्तादपवादा इति न्याये
नस्थानेयोगा इत्यस्यापवादः। प्रत्ययः परश्चेत्यनेन तत्परत्वाद्बाध्यते। तेन च रेफः गापोष्टक् ब्रीहि
पाल्यार्धं गीत्यादयः परेऽपवादं भवंति। परेणपरिभाषाप्रकरणेन साहचर्यात्परिभाषेयं। भाष्ये तु

पा॰कौ
५

संज्ञापदेनोपस्थापितः। तथा हि। टकितावितिकर्मधारयः। उत्संज्ञकौ टकारककारावाद्यन्तयोः
संज्ञेस्तः। तथा इट् इति बहुव्रीहिः इट् आदिर्यस्येति विग्रहः तथा चस्यानैतरतमपरिभाषयान्त्यस्ये
त्वादेशोसिद्धमिष्टं। एवं पापयतीत्यत्र पातेर्णौ पापादेशः। पुक् अन्तो यस्येति व्याख्यानात्। तच्चैव
माद्यन्तौ टकावित्येवास्त्विति वाच्यं। आलजाटचो ठस्येक इत्यादावपि टकयोराद्यन्तसंज्ञात्वप्रसं
गात्। इत्संज्ञकत्वेन तद्देशविशेषो लक्ष्य। तेनेत्संज्ञकस्य योदेशस्तत्राद्यवास्थितौ टकौ संज्ञे। न
चाटचष्टकार इकादेशस्य ककारश्च नणेतिनोक्तदोषः। ननु अस्मिन्पक्षे लङ् लुङ् लृङ् स्वित्या
दिनाम् इत्यस्याम् इत्यादेशः स्यात्तचोदात्त इत्यनोदात्तः प्रसज्येत। नैष दोषः। अः टउदात्तश्च
यस्येति त्रिपदबहुव्रीह्याश्रयणात्। विशेषणस्याप्युदात्तस्य सौत्रः परनिपातः। तेनोदात्ता ५

कारादिरादेश इति सिद्धे। नचैवमप्याउञ्जादीनामित्यत्र दोषतादवस्थ्यं। अनुहत्तेनोदात्तशाह्वेन सहत्रु
यमाणस्य बहुव्रीह्यसंभवादिति वाच्यं। आउञ्जादीनामित्यत्र दोषतादवस्थ्यं। अनुहत्तेनोदात्तशाह्वेन
स्य प्रत्याख्यास्यमानत्वात्।। वक्ष्यति ह्यञ्जादीनामटासिद्धमित्यादि ।। मिदचोऽन्त्यात्परः ।। सन्निवि
ष्टानामचां मध्ये योऽन्त्योऽच् तस्मात्परो मित्स्यात्स च पूर्वान्तः। स्थानेयोगस्य परश्चेति परत्वस्य चाप
वादः। वनाति। पयांसि कुण्डानि। ननु षष्ठीयोगवदयमपि पुरस्तादपवादन्यायेन स्थानेयोगमात्र
स्यापवादोस्तु न तु प्रत्ययः परश्चेत्यस्यापीति चेन्न। बाध्यसामान्यचिंतामाश्रित्य स्वविषये प्राप्तं
सर्वं बाध्यत इतीहाश्रयणात्। अन्यथाऽऽगमो मित्करणं व्यर्थं स्यात्। न च श्रवणार्थ एवागमोऽम
कार इति वाच्यं। तृणह इति निर्देशात्। अच इति जात्यभिप्रायेणैकवचनं। निर्धारणे षष्ठी। न चे।

प्र·कौ· त्यादित्यनेनसामानाधिकरण्यपादचरइति पंचंमेवास्यामिति वाच्यं। शेमुचादीनामित्यादावेतस्याचो
५ संभवेनैतत्परिभाषायाअप्रवृत्तावलोंत्यपरिभाषायाः प्रसंगात्। तथा च तत्रमित्करणावैयर्थ्याप
5 त्तेः। पूर्वसूत्रेआद्यंतावितिसमासनिर्देशोपीहांतग्रहणमात्रमनुवर्तते। एकदेशेस्वरितत्वप्र
तिज्ञानात्। तेनमिस्त्वेतम्। यदित्वभक्तः स्यात्तदातातानापिंडानामित्यादौषोशब्दंदसिवझल
मितिषोलोपेकृतेनलोपोनस्यात्। प्रातिपदिकांतत्वाभावात्। तथावहंलिहइत्यत्रवहाभ्रेलि
हइतिखशिअरुर्द्विषदजंतस्येतिमुमिमोनुस्वारोनस्यात्। अपदांतत्वात्। यदित्वादिग्रहणमनव
र्थ्यपरादिः क्रियेततदावारिणेइत्यादौचेर्ङितीतिगुणः स्यात्॥ वहंलिहइत्यनुस्वारोनस्यात्। ५
अतिशायितः खायायेषांतान्यतिसखीनिआलूनकुलानीत्यत्रमाखुरसंबुद्धावितिणित्वप्र

क्ताहद्धिः प्राप्नोति। सा हि गौणत्वेपीष्यते। अस्याप्यनड्डुत्। एतच्च रुहः स्त्वे येनाविधिरिति सूत्रे च भाष्य
कैयटयोः स्फुटम्। तस्मात्पूर्वोक्तपक्ष एवास्थितः। अत्र वार्तिकम्। अत्वात्सर्वोमहेरनुषंगसंयोगादि
लोपार्थं। मघः। मघवान्। ओदित्त्वेतिति ष्ठानत्वं। तस्यासिद्धत्वात्कत्वं। मस्जिनशोर्झलीति नुम्। स च
पदांतादचः परः स्यात्तदाऽनिदितामित्यनुषंगलोपो न स्यात्। उपधाभूतस्य नकारस्यानुषंग इ
ति प्राचां संज्ञा। अथ स्कोरिति सलोपे कृते नकार उपधात्वाल्लुप्यतामिति चेन्न। न लोपं प्रति स्कोरिति
लोपस्यासिद्धत्वात्। बहूनां समवाये समुदायस्यैव संयोगसंज्ञेति पक्षे सलोपस्याप्राप्तेश्च। तथा
च मंक्ता मंक्तव्यमित्याद्यपि प्रयोजनं बोध्यं। भर्जिमर्ज्योश्च। अत्वात्सर्वोमिदित्यनुवर्तते। मृजी
मर्जने॥ अस्मादौणादिके चि कृते ऊमागमः। मरूजामर्च शब्दार्थे। चुरादिकः॥ अस्मादच

प्र॰ कौ
६
6

इरित्यौणादिक इ प्रत्यय इमागमः। निपातनात्सिद्धं। अमूजाभ्राद्रोलं गुल्मादिषु यथ्याने मरीचिशब्दो
वाक्यादिषु। उणादिषु इमक्काणिभ्यामीचिरिति ईचिप्रत्ययं कृत्वा मरीचिशब्दो व्युत्पादितः। तदुपायांत
रं बोध्यं ॥ यच इग्रुक्तादेशो ॥ आदिश्यमानेषु क्त्सेषु मध्ये पंचरशोवसानं। हेमाद्रमतिक्रांतं कुल
मतिहि। चित्रगुप्रतिरि। अतिन्। यदत्र वक्तव्यं तदेवाग्रे उद्गस्त्रे एव वोक्तं ॥ षष्ठीस्थानेयोगा ॥ अनेकसं
बंधपरत्तयासंभाव्यमानाषष्ठीस्थानप्रयुक्तसंबंधपरेति बोध्यं। अस्तेर्भूः। अस्तेः समीपोऽनंतरो वे
त्तिसंबंधे तस्यानेऽनुच्चारणीय इत्यर्थः। स्थानं च प्रसंगः। दर्भाणांस्थाने शरैः प्रस्तरितव्यमिति वत्। तथा चेषु
च्चारणे प्रसक्ते परुएद्रुच्चारणीय इत्याद्यर्थपर्यवसाने सामीप्यादयः संबंधा अर्थाद्वाहृताः। योगः संबंधः ६
स च बहुविधोऽस्य स्या इति योगा अर्शआदित्वान्मत्वर्थी। योऽद्यु सच भ्रान्तिम्रन्यथा विशेषणावैया-

र्थ्यापत्तेः। तेनानेकसंबंधपरतयासंभाव्यमानेत्यर्थो लभ्यते। अयोगेत्तेवाछेदः। अतिच्छितयोगविशे
षेस्यर्थः। योगेत्ययोगेतिवाकिं। उडुपश्यायागोहः। श्वासष्टुदड्. हलोरित्यादौगोहः श्वासरत्यत्रमास्तु
सतिहितत्रापिस्थानेयोगत्वेगोहिगोहिशासेः स्थानेधातुमात्रस्योपधायाश्चऊदितोस्थानामितिदि
क्। यद्वा। स्थानेयोगोयस्याइतिवहुव्रीहिः। अतएवनिपातनात्तसम्याअलुक् यद्वा। स्थानेतयोगो
स्याइतिविग्रहः। निपातनादेत्वं। नचानयोः प्रत्ययोर्गोहः श्वासरत्यादावतिप्रसंगः। परिभाषाणाम
नियमेनियंतृप्रवृत्तेः॥ प्रकृतंचैतत्॥ आकांक्षापूर्वकत्वात्संबंधस्येहचोपधायापदसंनिधानेनावय
वषष्ठीवेतिर्गीतेआकांक्षाविच्छेद्यात्। लोकेपिहिपथानष्टकं तप्रत्ययमुमित्रवकाशोदादिणिग्र
हितव्यप्रमाणमित्रत्नररत्यादाउपविष्टेसतियत्रमार्गादेधात्संशयस्तत्रैवतदुपपत्तिष्टेनेनत्वसंदि।

प्र·कौ·

येति पर्यायेपीति दिक्। आद्यकारास्त्वाद्यः। अस्तेर्भूरित्यादावनेकसंबंधप्रसंगेपि तद्व्यानुरोधा
दंतरंगत्वात्स्थानिवदादेश इति ज्ञापकाच्च स्थाने योगेनैव व्याख्यास्यते। तस्मान्नायमेतस्य सूत्रस्यार्थः।
किंच षष्ठ्यंतमुच्चार्यमाणमेव स्थानेन युज्यते न तु प्रतीयमानमिति सूत्रार्थः। तदेतदुच्यते। निर्दिश्य
मानस्यादेशा भवंतीति। तेन पादः पदित्यस्यायमर्थः। पाच्छब्दांतं यदंगं तदवयवस्य पाच्छब्दस्य
सर्वस्य पदादेश इति। अलोन्त्यस्यादेः परस्येति योगौ त्वारंभसामर्थ्यादस्य बाधकौ। अनेकाल्शित्स
र्वस्येत्यनेन तु सहाविरोधादस्य समुच्चयेन प्रवृत्तिरिति। एवं स्थिते नं बाधाश्रयणेन प्रागुक्तोपि सू
त्रार्थः सुवचः। फलेन स्फुटप्रतिपत्तिरिति दिक्॥ स्थानेंतरतमः॥ प्राप्यमाणानां मध्ये सदृश
तम आदेशः स्यात्। सादृश्यं च चतुर्धा। स्थानतोऽर्थतो गुणतः प्रमाणतश्चेति। स्थानतो यथा। स्व

ब्धुपास्यः। मध्वरिः। धात्रंशः। लाकृतिः। यत्तु यथासंख्यसूत्रेणैवेष्टान्यथासिद्धिरित्युक्तम्भाष्यादौ
तदभ्युच्चयमात्रं। अर्थतः साम्यविवक्षायां यथासंख्यालाभात्। एकोहि यद्द्दृष्टिर्यणस्तत्समेति वै
षम्यात्। अथेकस्थाहृत्याधयणःशाहूत्वात्त्वप्रथमं चतुर्णां चतुर्णां मपाष्टिते स्वैव साम्यमिति चेत्तर्हि सब्धु
पास्यइति दीर्घस्यकथं यणादेशः। इकारेण ग्रहणादिति चेत्तर्हि नत्तीयेनञ्चकारेण चतुर्थेन लकारे
ण च परस्परग्रहणाल्लाकृसैरेकप्रसंगः। धात्रंशेचलकारप्रसंगः। पवौ च सानुनासिकानिरनुना
सिकौ न व्यवतिष्ठेयातामिति दिक्। दैत्यारिः। श्रीशः। हत्याद्यपीहोदाहरणं। अर्थतो यथा। वातंडयुव
तिः वतंडश्चाहा वतंडाच्चेत्यपत्येयञ्। तस्य लुक् स्त्रियामिति लुक्। एणाई रथादित्वान्डीन्। वतंडी
चासौ युवतिश्चेति विग्रहे पोटायुवतीत्यादिनासमासः। पुंवत्कर्मधारयेत्यनेनिदिश्यमानः पुंप

श॰कौ॰ ह्रोवर्तं उ आपत्यं वाचिनो वर्तं डीप्ह्रस्य तदपत्यं वा। चीवार्तं उ अघो ह्रो भवति। गुणान्तो यथा। पाकस्यागः। चजोः

८ कुघिण्यतोरिति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारः। जकारस्य तद्योषस्याल्पप्राणस्य

नादवतः स्थाने तादृग् एव गकारः। प्रमाणतो यथा। अमुं। अमून्। अदसो सेर्दिन्तेन दः स्वस्य ऊ स्वो दीर्घ

स्य दीर्घ ऊकारः। ह्रस्वस्थाने इत्यनुवर्तमाने पुनः स्थानग्रहणादन्यापि वाक्यार्थः संमतः। नात्वादिरूपे

स्थाने योऽन्तरतमस्तत्प्रयुक्तान्तर्यं वानितिया वत्। सप्रमाणानां मध्ये स्यादिति। तदुक्तं। यत्रानेक

विधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः इति। तेन चेतासोनेत्यादौ प्रमाणत आन्तर्यवान णकारोन भव

ति। वाक्यभेदे च तमपूग्रहणमेव लिंगं। एकस्मिन्नेव वाक्यार्थे संमते हि स्थानेन्तरः इत्येव ब्रूयात्। सि

द्धान्तेन वाग्घरिरित्यादौ सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ताः नादवतो नादवंत इति तृतीयाः ८

नलुमतांगस्य। त्रुमताशब्देन प्रत्ययलोपे सति प्रत्ययलक्षणमंगस्य कार्यं न स्यात् वार्त्तिकमते
एवं सत्र प्राप्तस्यायं निषेधः भाष्यमते तस्यानिकत्वत्र शाप्तस्य नियमविधीनां तात्पर्यसंकोच
कत्वमात्रं न तु निषेधकतेति प्रागुक्तरीत्या तु भाष्यमतेपि एवं सत्र प्राप्तस्यायं निषेध इत्यवधेय
प्रदमप्रेपि। गर्गाः। एष्टुः। जुहुतः। इहयज्ञत्वशयोर्लुमता लुमयोरंगस्य गुणवृद्धी न भवतः। ल
मजेतिकिं। कार्यते। हार्यते। णेरनिटीति णिलोपिकृते णिजपेक्षा वृद्धिर्भवत्येव। अमार्ट्। ह
लु·यादिलोपे नित्यत्वात्कृतेपि वृद्धिः। अंगस्येति किं। पंच। सप्त। अंगस्येति। स्यर्यते। नेनांगा
धिकारोयं सत्यन्ते स्वरितेनाधिकार इति वचनादिति वार्त्तिककाराः भाष्ये तु इदं दूषितं।
तथाहि। एवं सति उक्तामेत्यत्राधोहेरिति हल्लुकि कृते कमः परस्मैपदेष्विति दीर्घो न

प्र॰ कौ॰ ५७

स्यात्। तथाजिगानिषेत्यत्रगमेरिट्परस्मैपदेष्वितीटनस्यात्। तथाविवृत्सेत्यत्रनवृद्भ्यश्चतुर्भ्य
इतीण्निषेधोनस्यात्। तस्मान्नलमनेत्यत्रतांगाधिकारःप्रतिनिर्दिश्यते। किंतुलमनाल्लमेप्रत्य
येपदेंगेतस्यशास्त्रमनांगंचसर्वंप्रतिषिध्यतइति। नचैवमुक्तदोषतादवस्थ्यमितिवाच्यं। उक्रामे
त्यत्रलमेपरस्मैपदं। तदपेक्षयापदंगंशावंतेनतस्यदीर्घोविधीयते। किंतुक्रमेःसततपांप्रत्य
गंतत्वल्लमेप्रतीतिनिषेधाप्रवृत्तोप्रत्ययलक्षणेनदीर्घप्रवृत्तेः। एवंजिगामिषविवृत्सेत्यत्रापि
इटोविधिप्रतिषेधोनभवतएवतानोदिलमतालमेपरस्मैपदेपदंगंसत्रेतेनतस्यनाक्रियेतेकिं
तुसकारादेःप्रत्ययस्य। सचांगांतरइतिस्पष्टमेवस्यादेतत्। पक्षद्वयेपिज्ञित्यादितित्यकितः।
पाणिमण्योःसर्वत्रासमस्थानेइतिसत्त्वाविधीयमानाः। स्वराःलौकिकतेप्राप्नुवंति। तथाहि। ५

गर्गाः। विदाः। यत्तत्रोर्लक्। उष्ट्रग्रीवाः इवे प्रतिकृताविति कनो देवपथादिभ्यश्चेति लप्ततोग्नि
त्यादिरित्याद्युदात्ततां प्राप्नोति। तथाऽत्रेरपत्यानि अत्रयः। इतश्चानिञ इति ढकोऽत्रिभृगुकुत्से
त्यादिना लुक्। ततः किंतस्तद्धितस्यान्तउदात्तो भवति दत्तं तोदात्ततां प्राप्नोति सा हि प्रत्ययग्रहणे
तदन्तग्रहणात्। तद्धितान्तस्य विधीयते। न च सिद्धान्तेऽपि फिट्स्वरेणान्तोदात्ततया भाव्यमेवेति
वाच्यं शाश्वादिभ्योऽत्रिपत्रदेशाविति निष्ठेत्युणादिसूत्रेण हि प्रदेशकारान्त कृष्टे त्रिप्रत्ययं चेतस्य पित्वे
नानुदात्तत्वादाद्युदात्तो त्रिशब्दः। तथा च प्रयुज्यते। अत्रेर्विशृण्वतं पूर्व्यं स्तुतिं। यथा शृणोरत्रेः
कर्माणि कृण्वतां वदति। तथा टकोऽलुक्पक्षेण्याद्युदात्त एव प्रयुज्यते। अत्रेयाणां स्तोममद्रिवः इति। अत्रे
र्णां शृण्वतं दवमिति च। त्रितिप्रत्ययान्तस्तु स्तुतोदात्तो नकारान्तश्चेत्यत्यदेतन्त। सोऽपि प्रयुज्यते। २

प्र·कौ·
९
10

रेवायेस्त्रीति वा केचिदविणा इति तथा पंथाः प्रियोपस्यपाथ्यि प्रियः स्वपोधातिति सालुकि पथिमथोः
सर्वनामस्थाने इत्यानुदात्तताप्नोति । नत्वेषा त्रिसूत्र्यंगाधिकारस्था । येन नलोप इति निषेधः प्र
वर्तेत । नाणेत हस्वेनांगस्य कार्यं । स्वामिडंतमिति पदसंज्ञावदुक्तस्वराणां प्रत्ययांतकार्यत्वात् ।
ननु स्वाकित इति तथा इत उत्तरं यस्मिन्निति सर्वनामस्थाने इति सप्तमीनिर्देशात् हस्वत्वेनांगस्य कार्यं भव
त्येवेति चेन्न । अन्तिदंतस्यादेरित्यादिक्रमेण प्रत्ययान्तस्यैव तद्विधानात् । सौवर्यः समन्यस्वंदंतसम
स्य इति सिद्धांत । पतत्रभी — मध्ङः मदनज्ञनयनदरिद्राजागरां प्रत्ययात् ऐ वा प्रनीति पूर्वग्रहणेन त्वा
प्यंतं इति नवैव भाष्ये स्पष्टं । अनत्वा पोत्तमं रितीत्युदात्तत्वं श्राह वनीय इत्यादौ रिदंतसोपोत्तमेतीश
हस्वे कारे प्रवर्तते । चड्व्रन्यतरस्यामिति च वडं तस्यानवैवं च नवरः शासीत्युदात्तत्वं शासंतस्य स्यात् ९

याचषड्भिः शांशश्च चत्वारः कल्प्यं तत्र स्यादौ च तत्र रश्नितिपदं मध्योदात्तमिष्यमाणं न सिध्येदिति वाच्यं तत्र श
स्वग्रहणसामर्थ्यात्तदंतस्य समीत्वबाधात् । इतरथा हि ऊडिदंपदाद्याप्पुमैरैभ्युच्चत्तर्भ्य इत्येव ब्रूयात् ।
तत्रा हि असर्वनामस्थानग्रहणानर्हत्वेः शासपव भविष्यति । षट्त्रिचतुर्भ्यो हलादिरिति हलादेः सिद्धा
नेपुदात्तविधीनात् । नचैवं स्वरविधिपुषष्ठेश वा निर्दिश्यतामिति वाच्यं रितस्य उः इत्याद्यपेक्षपारिति
चङ्गत्युक्तावर्धमात्रालाघवसंभवेनसममीअप्रयोगादिति । अत्रोच्यते । अंशाधिकारनिर्देशापक्षेत
वदुक्तदोषपरिहारायवार्त्तिकमारभ्यते । लुमति प्रतिषेधेएकपदस्वरस्योपसंख्यानं सर्वामं
त्रितसिग्लुकस्वरवर्जं प्रयोजनं जितिकित्याश्चसंधो ॥ सर्वनामस्थावेलुकीति । अस्यार्थः लुमति ॥
लुमत्संज्ञयाप्रतिपादितेऽदर्शने यः प्रतिषेधस्तस्मिन् । एकपदाश्रयो यः स्वरस्तस्योपसंख्यानं ।

श·कौ· प्रत्ययलक्षणेन प्राप्तोप्येकपदस्वरो न भवतीत्यर्थः। पदद्वयाश्रयस्तु स्यादेव। यथा दधि तिष्ठती
॥ त्यत्र पदस्य पदादित्यधिकृत्य विहितात्तिङ्ङतिङः इति निघातः। अत्र हि दधीत्यस्य पदसंज्ञार्थं प्रत्ययलक्ष
॥ णमपेक्ष्यते। तथा इह तिष्ठत्यादौ तिङः तत्वलाभायापि। नन्वेवं सर्वस्तोमोतिरात्र इत्यत्र सर्वस्य सु
पीत्याद्युदात्तत्वं न स्यात्। तथा। सर्पिरागच्छ समागच्छेतेत्यत्रामंत्रितस्य चेति षाष्ठमाद्युदात्तत्वं न
स्यात्। तथा। माहि दातं। माहि धातामित्यत्र आदिः सिचोन्यतरस्यामित्याद्युदात्तत्वं न स्यादित्यत आ
ह सर्वैत्यादि। इदं स्वरत्रयं विहाय स्वरांतरे प्रतिषेध इत्यर्थः। न च सर्वस्तोम इत्यत्र बहुव्रीहौ प्रकृ
त्या एवं पदमिति पदद्वयस्वरोयमिति वाच्यं। सर्वस्य सुपीति पदाद्युदात्तत्वं न स्यैवापनेन प्रकृ ॥
ति भावमात्रे कर्तव्यं। तथा च तत्राभिरवषेणापपादयितव्यमिति भावात्। न च सर्पिः प्राह स्या

मेत्रित्तस्वरं विनाप्याद्युदात्ततालंभ्राक्या। अर्विंशुविदुस्तपिच्छादिक्वर्दिभ्य इस्तिस्त्रियोणादिके इति
प्रत्यये कृते तोदात्तत्वात्। अव्युत्पत्तिपक्षेपि किद्दस्वरेणान्तणत्वात्। नच नाविषयस्येत्याद्युदात्तः॥
अतिसंतस्येतिपर्युदासात्। कैयटेन तु सर्पिः शब्दस्य हृतादित्वं किमर्थं कल्पितमिति विंत्यं। नव
समशाब्दः सप्यश्रुभंत हेतिकातिनं तोव्युत्पादितः। तथा च नित्वादाद्युदात्तः। अव्युत्पत्तिपक्षेपि
नथैवा त्रः संख्याया इति वचनादिति चेन्न। उभयथापि हृतादित्वेनांतोदात्तत्वात्। तथा च प्रयुज्यते
समयुंजंतिरथमेकचक्रमिति। रहस्तित्सुग्रहणंमास्तु। गातिस्थेत्यत्र इति न्वग्रहणसामर्थ्याल्लौकि
स्वरः सिद्धः। अस्तुप्या। लाचवार्पिन्सैरेवलकं विदध्यात्। एवं ह्यमूदयादित्यादिसिद्धये। इस्तिस्तिव
इत्यत्र सकारांतरप्रश्लेषक्लेशोपि नाश्रयणीयः इति न चैवं स्त्रीहिल्लौकिकान्तर इति सूत्रं विध्यर्थमे

ग्र·कौ· १२ 12

वस्यान्न तु नियमार्थं। तथा च तत्र लङः निहतत्वयेऽह्निलकीति वक्तव्यं स्यादिति विपरीतगौरवापत्ति
रिति वाच्यं। ङिज्ज्रहत्यन्तहत्स्वैवलदोऽब्युदस्तत्वात्॥ तस्मात्सर्वामंत्रितस्वरवर्जमित्येवावश्यकं। वा
त्तिकारं भस्य प्रयोजनमाह। प्रयोजनमिति। जि निघ्नाहत्योरिकारङ्कारणार्थः। ह्रहित्योरिति
वत्। एते स्वयं निवर्त्स्यमानत्वात्प्रयोजनमित्यर्थः प्रयोजनांतरमाह। धात्विमथ्योरिति नितरेवं वचन
ले त्रिसूत्र्याप्रतिव्याप्तिरुद्धंतेष्वतीहसूत्रेऽस्थितं। वस्तुतस्तु नैतदर्थं वचनं क्रियते। ज्ञापकबलेनैव
वि दागर्गा इत्यादिः सिद्धत्वात्। तथा च संज्ञायामुपमानमिति सूत्रे वार्त्तिकं। उपमानस्याद्युदात्त
न वचनं ज्ञापकमनुबंधलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्येति। अग्निश्चिपदे धात्विमण्योः सर्वना
मस्थाने लुमता लुप्ते प्रत्ययलक्षणेन भवति। इति वचनमेवकर्तव्यं नातुयमनुबंधलक्षणः स्वरः १२

येनोक्तव्यापकत्वेन वीर्यं तन्न च स्वरमात्रविषयकं व्यापकमस्तीति वाच्यं। आमंत्रितस्वरसिद्ध्य
कस्वरयोरसिद्धिप्रसंगात्। न चैवमपि सप्तमीनिर्दिष्टस्वरे प्रत्ययलक्षणं न भवतीति व्याप्यता
मिति वाच्यं। सर्वस्तोमरत्र आयुदात्तासिद्धिप्रसंगात्। यद्वा। अस्तु सप्तमीनिर्दिष्टस्वरविष
यकमेव व्यापकं। सर्वः स्वस्वपीत्यत्र तत्स्वपीति सप्तमीमपनीय स्वपरतिषष्ठीपाठश्च। तथाच
पाणिसूत्रार्थं वचनेनारंभणीयं। ज्ञिप्राविकिस्वरार्थं तु भवद्भ्यामपि नारंभणीयमिति सर्वं सुस्थं यत्तु
यदीदं सूत्रव्याख्यानमुपमानमिति सूत्रे भाष्यकारैः सिद्धमुक्तं। तदयं तिर्यग्गतिनोर्थः। त्रिसूत्र्यां शंकि
तस्यातिव्याप्तिदोषस्य वचनेनोद्धारसमाधानं तत्र स्वाव्यापकेनैवेष्टसिद्धिरिति निष्कर्षो ग्रे कृतर
ति। एतच्च समाधानेऽङ्गाधिकारो निर्दिष्टव्यत इति पदार्थव वस्तुतो गास्य यत्कार्यमिति निष्कृष्टप

श० कौ०
१३
13

द्वेपितत्वं। अत एव संज्ञायामुपमानमिति सूत्रे भाष्यकारैः पक्षद्वयसाधारण्येनैवोक्तत्वा
पत्तवार्त्तिकयोर्जितत्वा प्रकृतसूत्रस्थभाष्यकैयटयोस्तु तिङ्कृष्टपक्ष उक्तदोषप्रसंग एव नास्ती
ति लभ्यते। तत्रेत्स्य भाष्यमभियुक्ता वर्णयन्ति। लोपकं द्विविधं। सामान्यापेक्षं विशेषापेक्षं च॥
तत्र यदाभीक्ष्णीत्यत्र पूर्वग्रहणेन यत्र सत्यसम्पर्क्षपदेत्तदंतग्रहणपक्षे च फलभेदस्तत्रैव सो
वर्यः सत्यसम्पस्त्वदंतस्य सम्यश इति स्त्राप्यते। यथाभीक्ष्णीत्यत्रैव पूर्वग्रहणाभावे तदंतस्य कार्यि
त्वे प्रत्ययीतानां भ्यादीनामुदात्त इत्यलोन्त्यपरिभाषया प्रत्ययान्त एवोदात्तः स्यात्। सत्यसम्पर्क्षो
त्रयणे त्वपि तमपहाय भ्यादीनामेवोदात्तः स्यादिति स्पष्टः फलभेदः। तयोर्योपो नं सरिति। च
ङ्यन्यतरस्याम्। सेत्यत्रापि चित्त्वात् विनियत्यपि एियमयोः सर्वनामस्थानइत्यादौ तु नास्ति फलभे॰ १३

दः। तदंतस्यहि कार्यित्वे प्रकृत्यादेरेवोदात्तत्वं त्रिदादि सर्वस्यापि कार्यित्वे तथैवेति। तथा
चतत्रसौवर्यइत्यस्याप्रवृत्त्यातदंताकार्यित्वाज्जक्तदोषस्याप्रसंगएवेति। संज्ञायामुपमा
नमित्यत्र भाष्यकैयटादिग्रंथास्तु सामान्यापेक्षं ज्ञापकमाश्रित्य योजयितव्या इति। अ
त्रजइत्यत्रतुस्वरेणनभवति लुकिकृते कार्यिणोभावात्।। प्रत्ययलक्षणं हि पदत्वस्य का
र्यं तत्प्रत्ययलोपेपि भवति। नतु पदत्वप्रत्ययस्यैव कार्यं तदाषि। नच प्रत्ययग्रहणपरिभाषया
तदंतग्रहणं स्यादिति वाच्यं। येन विधिरिति सूत्रेणैव तल्लाभस्य वक्ष्यमाणत्वात्। द्विप्रोष
ण विशेष्यभावे च कामचारात्। नचेवमपि स्यातिवत्सूत्रेण स्यादेवोदात्तत्वेनेति चेन्न लोपस्या
भावरूपतया तदीयांतस्यतनुदात्तताया अबाधात्। अतएव हि अम्भादित्यादौ लुमस्येति चोत

श॰ कौ॰ १४
14

ट। नन्वभावस्याभावो भाव एवः संभवति। आद्यमते ऽनाविधाविति निषेधाच्च। किं च द्विजादीनां त
वेदमधीतीत्यनिषेधाप्रसक्तिरिति दिक्। न चैवं नाविमित्रे पैतृप्रसंगः। नस्यापि लकापहारादिति दिक्।
वस्त्रेतोयदं गामिति व्याख्यानाद्राजपुरुष इत्यादावपीति वाच्यं। असंज्ञायामिति निषेधेनाल्लोपाभावात्
स्ववं तत्त्वम्प्रयुक्तपदसंज्ञयानलोपाच्च। तथा अहर्ददातीत्यत्र रेफोपि सिद्धः। अस्त्वपीतीति निषे
धो हि वस्त्रेतौ तस्य कार्यमिति नेह प्रवर्त्तते। अणाधिकारनिर्देशोऽत्र प्रवर्तनात्सौ। अत एवाङ्कार
विधाविति वचनमारभ्यते। न चाह्नपीति वचनसामर्थ्यात्तत्पलक्षणो नास्त्वपीतीति निषेधो नेति वा
च्यं। दीर्घाह्नानिदाघ इत्यादौ हल्ङ्यादिलोपे रेफापत्तेः। एतेनास्त्वपीति पर्युदासमाश्रित्याहर्ददा
तीत्यत्र दाधातोः स्वधिरूपस्य सत्वाद्रेफ इत्यपि कल्पनमपास्तं दीर्घाह्नानिदाघ इत्यत्रापि प्रसंगात् १४

यद्यपिहत्वरत्वयोरसिद्धतयापूर्वंनलोपेकृतेकारस्यैवहत्वरत्वेप्राप्नुतस्तथापिहत्वरत्वयोर्विषयेन
लोपोनेष्यते। हत्वरत्वोभयारंभसामर्थ्यात्‌। नचसंबुद्धौनलोपनिषेधाद्धेअहर्गच्छहेदीर्घाहोनि
दाघेत्यत्रचरितार्थता। एवमपिरूपरत्नीतिहत्वस्यैवपर्य्यापत्तेः। नह्युकारस्यरोरेफोवाविशेषोस्ति
नन्वेतदपिसंबोधनेचरितार्थमितिचेत्‌ सत्यंअहन्नित्यावर्त्यपकेननलोपाभावनिपातनात्सिद्ध
मितिदिक्‌। कुस्यादेतत्‌। परमवाचापरमगोदुहापरमलिहापरमदण्डिनापरमदिवापरमकुमार्येत्य
त्रांतवर्तिनींविभक्तिमाश्रित्योत्तरखंडस्यपदसंज्ञास्यात्‌। ततश्चचोःकुः। दादेर्धातोर्घः। होढः। नलोपः
प्रातिपदिकांतस्य। दिवउत्‌। इकोसवर्णेशाकल्यस्यह्रस्वश्चेत्येतेविषयाःप्रसज्येरन्‌। नचभसंज्ञया
पदसंज्ञाबाधः। सिद्धावपिकृतत्वात्‌। भसंज्ञाहिसमस्तस्यप्राप्ता। पदसंज्ञातूत्तरखंडस्य। अत्रभा

यभसंज्ञासूत्रे सुप्तिङन्तं पदमिति सूत्रात्स्वन्तमित्यनुवर्तनीयं । तदयं सूत्रार्थः । यजादावसर्वा-
नामस्थाने परे यस्मात्स्वप्रत्ययविधिस्तथाभूतः पूर्वः समुदायो भसंज्ञो भवति । तदवयवभूतं
स्वन्तं यद्यस्ति तर्हि तदपि भसंज्ञं स्याद्यजादावनन्तरे इति । इह च समुदायस्य भसंज्ञा प्रधान
शिष्टा । अवयवस्य त्वन्वाचयशिष्टा । कर्त्तुः क्यङ् सलोपश्चेतिवत् । तेन राजत्व इत्यादौ स्वन्तावयवा-
भावेपि भवति स्वन्तावयवसत्वे तु तस्य समुदायस्य चेत्युभयोरपि भवतीति विवेकः । नन्वेवमपि परम-
वाचौ परमवाच इत्यादौ भत्वाभावात्पदकार्यं स्यादेवेति चेन्न । नत्वभत्वाभावेपि असर्वनामस्थाने ।
इति पदसंज्ञानिषेधात् । स्वादिष्वसर्वनामस्थाने इत्यत्रापि हि स्वन्तमित्यनुवर्तते । प्रसज्य १५
प्रतिषेधश्चायं । तत्सामर्थ्यादनन्तरस्य विधिर्वेतिन्यायो नाश्रीयते । तदयमर्थः । सर्वनामस्था

नेपरतः सर्वः समुदायः पदं न स्यात्। नत्वेवम्भूतं च पदं न स्यादिति। तत्र समुदायस्यस्वादिष्वि
ति प्राप्नाद्यवयवस्य तु स्वं तामिति प्राप्ता पदसंज्ञा नेन निषिद्धेति परमवाचा वित्यादि सिद्धं ॥
नत्वेवं त्वद्वाक्स्रराजेत्यादौ कृत्वादि न स्यात्। सावपि समुदायस्यावयवस्य च प्राप्तयोरपि पा
दसंज्ञयोर्निषेधान्निदिचेन्न। असर्वनामस्थान इत्यत्रोत्तरसूत्रायचोत्पयकृष्यपजादौ॥
सर्वनामस्थाने उभयविधपदसंज्ञानिषेधात्॥ सोऽत्र द्विविधापि पदसंज्ञा भवत्येव ॥ न
न्वेवं श्रूयमाणे सोऽपूर्वस्य पदसंज्ञा स्यादिति चेत् । इष्टापत्तेः । नन्वेवमेचोऽप्रगृह्यस्याहूरा
द्धते पूर्वस्यार्द्धस्याऽदुत्तरस्येदुतावितिसूत्रे भद्रकरोऽसि वीरो इत्यत्रापि प्रसंगं वारयितुं पूदां
तग्रहणं कर्त्तव्यमिति वार्त्तिककृता वक्ष्यमाणं विरुध्येत क्रियमाणेऽपि यं दोतग्रहणे दोषता

वदस्यादिति चेन्न। तत्रानुग्रहणमात्रं कृत्वा वाक्यस्य टेरित्यतो वाक्यग्रहणमनुवर्त्य वाक्यान्त
स्येति व्याख्यानसंभवात्। तदेवं समासचरमभागस्य पदसंज्ञापनादौ क्वापि नास्तीति स्थि
तं। क्वचिन्निषेधात्क्वचित्तु भत्वेन बाधादिति विशेषः। नन्वेवं हरान्वक्तमित्यादावलङ् नु स्या
त्। होतापोतारावित्यत्रानङ् न स्यात्। उत्तरपदे तद्विधानादिति चेन्न। उत्तरपदशब्दस्य समासो
त्तरावयवे रूढतया पदसंज्ञाविरहेऽपि तत्प्रवृत्तेः। सर्वत्रैव चेयं रूढिः। तेन होतृपोतृ
नेष्टोद्गातार इत्यत्र मध्यमानामुत्तरपदत्वाभावान्न तत्पूर्वस्यानङ् इति दिक्। नन्वेवं दधिसे
चो दधिसेच इत्यत्र सात्पदाद्योरिति षत्वनिषेधो न स्यादिति चेन्न। पदादादिः पदादिः तस्य
षत्वं नेति व्याख्यानात्। न चैवं रामेषु हरिषु इत्यत्रापि निषेधः स्यादिति वाच्यं। स्वादावितिपाप

दसंज्ञानामुपजीव्यपदादेर्नैतिनिषेधाप्रवृत्तेः। एतच्चसमासप्रतिषेधेनज्ञाप्यते। युक्तंचपदा
दादेर्नेत्येवव्याख्यानंनत्तपदस्यादेरिति। तथासतिगतिकारकोपपदानामितिप्रवृत्तेः
प्रागेवसमासात्सुपिसमीत्यादौषत्वस्यदुर्वारतापत्तेः। नन्वेवमपिवक्रसेचौवक्रसेचर् त्यत्र
षत्वंस्यादेव। वक्रचोऽपदत्वेनषत्वप्रतिषेधाप्राप्तेरितिचेत्। सत्यं। वचनमेवेहकर्त्तव्यं
वक्रस्यदर्वस्यनेति। अत्र। पंस्त्रत्वात्सःसातेःसःषत्वंनस्यात्। ततःवक्रच्यदाभ्यामुत्तरस्यस
स्यषत्वंनस्यात्। आदिग्रहणंनकर्त्तव्यं। तस्मादित्युत्तरस्पैत्येवसिद्धेः। तदिदंवक्रन्यग्रहणमादि
ग्रहणेनतिमातव्यमिति। वार्त्तिकेत्तउत्तरपदत्वेचापदादिविधाविति वचनेनैवपरमवाचेत्या
दिसाधितंउत्तरस्यसमासोत्तरभागस्यपदत्वेकर्त्तव्येलुमताल्लोपेप्रत्ययलक्षणंनस्यात्। अतोन

श·कौ· कृत्वावि। पदादिविध्योस्तु प्रत्ययलक्षणं स्यादेव तेन षत्वनिषेधाद्दधिसेचेत्यादिसिद्धिः। अस्मिंश्च
१७ पक्षे प्राक्सुबुत्पत्तेः समासोऽत्र नाभ्युपगन्तव्यः पतञ्जीतेत्यादिसिद्धये तस्यानित्यताया वा
17 च्यमाणत्वात्। कैयटस्त्वाह। दध्नः सेचाविति विग्रहे षष्ठीति समासः। न त्वयमुपपदसमा
सः। सोपपदात्तु विच्नास्ति। अनभिधानात्। अतो दधिषेचावित्यादि न भवत्येवेति। अस्मि
न्नपि पक्षे वक्ष्यत्पूर्वस्य चेति वचनं कर्त्तव्यमेवाकृते हि वक्त्रि विशिष्टस्यार्थवत्त्वेन प्राति
पदिकत्वे सुपो लुकि च कृते पुनर्विशिष्टात्सुवंतरमुत्पद्यत इत्यर्थवत्सूत्रे वक्ष्यते। तत्रानव
र्त्तिनौ विभक्तिमाश्रित्य प्राप्तं पदत्वं नाकृत्वादौ कर्तव्ये मा भूत् षत्वनिषेधप्रवर्त्तयथास्यादिति।
अत्रायं निष्कर्षः। पूर्वसूत्रपदवास्थितत्वादुत्तरपदत्वे च पदादिविधौ। वक्ष्यत्पूर्वस्य चेति पाठ्यं। पद १७

दिविधावेवप्रत्ययलक्षणंभवतीतिनन्तुपदांतावितिनियमार्थंचेदंवचनद्वयमितिव्याख्येयं। एवंचनन्ननकर्त्तव्यइतिलाघवं। अस्मिन्पक्षेसोपदत्वंनास्ति। प्रायुक्तककस्त्वष्टेरभा वात्। तदेतत्पक्षद्वयमभिप्रेत्यहल्ङ्याब्भ्य इतिसूत्रेभाष्यकारेणोक्तं अप्रत्ययेऽपिपदंभवति। एवम प्युभयतःपाशावज्जरिति। ननुअङ्गाधिकारग्रहणपक्षेवक्ष्यतेअङ्गस्येतिपक्षेचश्रमृवान्नित्यत्र त्वस्यप्राप्नोतीतिचेत्। सत्यं। आनइतिनियमात्त्रभवति। ननुदेवदत्तंयाजयांचकारेत्यत्रलुकं बाधित्वापरत्वात्तिवादिषुकृतेषुआमइतितेषांलुकिप्रत्ययलक्षणेनतिङ्. नत्वादामेतस्यनित्या तःस्यात्ततःपरस्यचनस्यादितिचेत्। लावस्थायामेवयपेनप्राप्तिन्यायेनत्तिवादीन्बाधित्वालुकु प्रवृत्तेः तदुक्तं। आमिलिलोपान्नस्यचालिङ्त्यात्तस्माच्चतिचानइति। ननुदेवदत्तोयुष्मत्पुत्रइत्यादौव

श. कौ.
१८
18

ष्टांतस्य विधीयमानापुगागमस्य दोषादेशाः प्राप्नुवंतीति चेत् । सत्यं । स्यग्रहणात्तु भवंति । नच ।
विभक्तौ परतः पूर्वमागमात्र समाप्तः किंतु विभक्तिविशिष्टस्यैतेत्यतदर्थं स्यग्रहणं स्यादिति
वाच्यं । षष्ठीचतुर्थीद्वितीयानामिति निर्देशेनापि गतार्थत्वात् । सर्वस्य पदस्यैतत्त्व हृते तेषु ।
तस्माद्विभक्तिलोपे कृते मा भूदित्येतदर्थमेव स्यग्रहणं । अवस्थाने हि श्रूयमाणे त्वेव संभव
ति पुनातिष्ठतिरहानौ वर्तते । यथा । समयेष्ठितिष्ठहरीवेति । समयं माहासीदित्यर्थः । तथा चाप्रति
क्तविभक्तिकयोरित्युक्तौ श्रूयमाणविभक्तिकत्वमस्पष्टमेव लभ्यते । इदं तत्र वर्षिष्यते । वस्तुतो गास्येति
ति सिद्धांते चित्तेलगिति नलोपे कृते हनिणीडादेशानस्तु । अत्रापि भवतादस्तु । अत्रापि भवता
यामस्तुः । अथापि भवतान्वाक इति । लुङि परतोद्ये ते विधीयंते इति चेत् । मैवं । लुङि पदाद्वैधा १८

नकं नत्र हनिणिङादेशानां विधानात्। तस्माद्वस्तुतो गस्येति पक्षो निर्दोष इति स्थितं। अवेर्त्यादि
ठि। अत्रार इति निर्धारणे षष्ठी। जातौ चैकवचनं अचां मध्ये योन्त्यस्तदादिशब्दरूपं टिसंज्ञः स्या
त्। टिप्रदेशाष्टित आत्मनेपदानां टेरेत्यादयः पचते पचेते इत्यादि। अन्ते भवोन्त्यः। दिगा
दित्वाद्यत्। अन्त्यआदिर्यस्येति बहुव्रीहिः। नित्यसापेक्षत्वात्समासः। अलोन्त्यात्पूर्व उपधा।
अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्। उपधागुणः चेतति। च्योतति। वर्द्धते इत्यादि। ननु पूर्वस्या
विशेषितत्वाच्छासिधानोः शास इति समुदायस्य उपधासंज्ञा स्यादिति चेन्न। अस्तु। न चैवं शास इदङ्ह
लोरितीत्वे शास इति समुदायस्य स्यादिति वाच्यं। अलोन्त्यपरिभाषया इष्टसिद्धेः। स्यादेतत्। नानर्थ
केलोन्त्यविधिरनभ्यासविकारेष्विति निषेधः प्राप्नोति। इह च विभक्तौ त्यत्रभज्जामित्यत्र अन्त्यस्य यथा।

शा॰को॰ १९

19

स्यादित्येतदर्थमनभ्यासविकारेष्वित्युक्तं। विकारो नाम वर्णात्मक आदेशः। अत एव देहीत्यत्र
लोपः सर्वादेशाय च भवतीति। अत्रोच्यते। न तावदेषा परिभाषा सूत्रकृतः संमता। तस्य लो
प इति सूत्रे जिघृङ्नां सर्वलोपार्थं तस्य ग्रहणात्। नापि भाष्यकारस्य संमता एतत्प्रयोजना
नामयोपपत्तेर्भाष्य उक्तत्वात्। तथा हि। अव्यक्तानुकरणस्येति तावदत्यादेशो न भव
ति। नाम्रेडितस्यान्त्यस्य तु वेति ज्ञापकात्। इतरथा ह्याम्रेडितस्य वेत्येव ब्रूयात्॥ घ्वसोरेद्धा
वित्यत्रापि लोपो या इति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशः। तथा चेत्थं सूत्रन्यासः
घ्वोरभ्यासस्य लोपः। लोपश्चाह्वानरस्यानुवृत्त्या सर्वलोपः स्यात्। अस्त्वेवं तु। अस्त्वे चौश्वयह्व
तिहाविति। अथवा लोपश्चारित्विच्छेदः। संज्ञायां कृतो नन्वयः संज्ञिनि फलति। यथाऽऽम्रेडिते। १९

भाष्ये त्वद्विशाकारको निर्दिश्यते इत्युक्तं। तत्र लोप इति भिन्नं पदं। शरत्वस्यस्य उपदेशापवेत्संचा।त
त्फलं तु प्रयोगसर्वत्रानवंधानाकाकादिवदनवपवीभूपेवव्यावर्त्तकत्वादितिभावः। अस्मि ४.
न्नपिपदेत्पलिपरेयः संयोगस्नादादित्वात्सोर्लोपेपववपादःसवचः। स्पष्टार्थं आनउपधापिवर
त्वादावकारस्येवेहापि सकारस्य लोपो माभूदिति भाष्याशयः। अभ्यामित्यादौ हलि लोप इति सू
त्रेण अककारस्य इदम इदो विधीयमानो लोपोपि नर्थ्यस्यस्यादिति चेन्न। अनाप्यक इति सूत्राद
नित्यनुवर्त्य तस्य हलीति सप्तम्या षष्ठीप्रकल्प्य अनएव लोपविधानात्। तथाच तत्रालोंत्यपरि
भाषया नकारलोपे अतो गुणे इति पररूपे च कृते आभ्यामेषामित्यादि सिद्धं। अत्र लोपोभ्यास
स्येति सूत्रेपि अत्र अभ्यासत्वाश्रये। नन्वतदेकदेश इति व्याख्यानादत्र ग्रहणसामर्थ्यात्सर्वलोपः॥

शृ·कौ· यद्यपि सनीत्यपेक्षितं दद्वोदधावित्यादिवारणाय। सादाविति च जिज्ञापयिषतीत्येतद्वारणाय।
२० प्रकृतयोपि पिपक्षतीत्यादिवारणाय। विषयोप्यपेक्षितः सचाकर्मकस्य गुणो वेति। स्मुद्व
20 ति गामित्यादिवारणाय तथापीदं सर्वमनुवृत्त्यैव सुलभमिति सर्वलोपार्थमेवात्र ग्रहणं बोध्यं।
नन्वेवमपि विभाषा भवद्भगवदघवतामोश्चावस्येति वार्त्तिके न विधीयमानश्चोकारोऽन्त्यस्य स्यादिति
चेन्नावस्येति निर्देशावस्येति गुरुकरणसामर्थ्यात्सर्वादेशसिद्धेः। तस्मान्नानर्थक इति परिभाषा निष्फ
ला सूत्रभाष्यासंमता चेति स्थितं। एवं च घासेः घ्राघाहृस्वोपधात्वेपि शिष्ट इत्यादि सिध्यति। संयोगो य
थ ग्रहणं कृञर्थमित्यादिव्यवहारास्त्वस्मिन्नपक्षे संगच्छंते इति दिक्। यद्वा। अवयवेपिम २०
हावः सजातीयानामेवेत्युत्सर्गः। लोके ह्येमोघा ब्राह्मणानामंत्याः सर्वमानेयस्तु केपकपंत्वासाहव्यवाहेनस

वीप्सानीयते न तु समुदायः। एवं चेहाप्यलः अव्यवहितपूर्वो लेव संज्ञो न तु समुदायः। न वाव्यवहि
तोल्। संयोगोपचव्यवहारस्तु भाक्तः। अवयवधर्मस्य समुदाये उपचारात्। एवं स्थिते ल इति जसं त
मपि सवर्णं। जात्याख्यायामिति वक्तव्यवचनं। पूर्ववस्तपि जसंतं। अतोप्यलेव सोज्ञात्यालभ्यते। यद्वा। अल
इति निर्द्धारणे षष्ठी। जातौ चैकवचनं। अलामध्यंत्वात् पूर्व इत्यर्थः। तिथ्यविहाल इति जस ङः। सि
ङे स्वेति पदत्रयमपि स्थितं। तस्मिन्निति निर्दिष्टे पूर्वस्य। सप्तमी निर्देशे पूर्वस्यैव कार्यं स्यात्तत्र
तिर्दिष्टे अव्यवहितोच्चारिते सतीत्यर्थः। निः शब्दो नैरंतर्ये दर्शितस्तूच्चारणक्रियः। निरंतरं दिष्टेति
दिष्टः। नियमार्थमिदं सूत्रं। तथा हि। इकोयणचीति यस्य च भावेन भावलक्षणमिति सप्तमी। अ
श्रूयमाणक्रियत्वाद्व्यंतरंगस्यात्यर्थस्य लाभः। तेनाचि सति यण् भवतीत्यर्थः। यद्वा। गंगायां

श-कौ.
२१
५१

घोषइतिवदौपश्लेषिकेऽधिकरणेमीतिनत्रसत्त्वपरस्यैवएर्वस्यापिसंभवति। एवमुपश्लेषेपि। नत्रयु
गपदेकस्यकार्यित्वनिमित्तत्वयोरसंभवाद्वाप्युदकंमधिदमित्यादौइकारोकारयोः पर्यायेणया
णप्राप्तः। एवंस्यैवेतिनियम्यते। तथाग्निचिदत्रेतिव्यवहितस्यापिप्राप्तः। अनंतरस्यैवेतिनि
यम्यते। ननुगावित्ययमाहेत्यादौस्वरूपपदार्थकतामितिशङ्कां करोति। तथेहापि। एवं
चतस्मिन्नणीत्यत्रैवेयंपरिभाषाप्रवर्तेत। आस्तिहितत्रव्यवच्छेद्यं। हेपोष्माकीणअस्मभ्यं
देहिहेआस्माकीनपुष्पम्भ्यंददामीत्यादौस्वजणम्भ्यंपरस्यादेशप्रसंगासत्वात्। सत्यं। इ
तिकरणः पदार्थविपर्यासकृत्। लोकेअर्थपरतायाऔत्सर्गिकत्वात्तत्रशाब्दपरताका
प्नोति। शास्त्रेतुविपरीतं। किंच। यदितस्मिन्नणीत्यत्रैवेयंप्रवर्तेतर्हितत्रैवपूर्वग्रहणंकुर्यात्। २१

तस्यापत्यंतत्रभवइत्यादिवत्। तस्मादित्युत्तरस्य। पंचमीनिर्दिष्टेउत्तरस्यैवकार्यंस्यान्नत्वव्यवा
हितोत्त्वादिति। तिङ्ङतिङः अग्निमी + स्यात्रेदेतस्मिन्नित्यनुकरणंकिंतुअचिहलोत्यादिसकला
विशेषसंग्रहार्थंस्वतंत्रस्यसर्वनाम्नोयंनिर्देशः। त + लेरहनभवति। ईलेअग्निः। इहकारकवि
भक्तेरसंवादिगणोलक्षणापंचमी। तत्रदिक्शब्दोध्याक्रियमाणः उत्तरशब्दवत्सर्वशब्दोप्यविशे
षादध्याक्रियेत। व्यवहितोपिचगृह्येत। तथाचउत्तंस्थानेन्यतराप्युदःस्थास्तंभोरित्यस्यप्रसंगः
तदेवंपूर्वसूत्रमेतत्सूत्रंचेतिद्वयमप्यपरिभाषितमितिस्थितं। तथाचवार्तिकं। तस्मिन्नस्मा
दितिपूर्वोत्तरयोर्योगाविशेषाद्विप्रतिषेधार्थंवचनंदध्युदकंपचत्योदनमिति। इहापितस्मा
दितिस्वतंत्रस्यसर्वनाम्नोनिर्देशः। प्राग्वत्तत्त्वनुकरणं तथादिसति यद्यपितस्मात्ड्-ढिहलर

शा॰कौ॰
२२
22

त्वज्ञातश्चादेविति दीर्घात्सूर्वस्यागस्यासंभवात्प्रयोजनाभावाच्चैतत्परिभाषोपस्थितिस्तथापिता-
स्माच्छसो नः पुंसि तस्माच्छुङ् वीति योगद्वये स्यात्। उच्चरन्तश्चान्तमुपलभते गौरवनश्वरत्वा-
देर्थावर्त्यस्य तत्र संभवा इति दिक्। स्यादेतत्। एतत्सूत्रेति प्रमाणिमस्तु। पूर्वसूत्रमपि स्त्रौपश्लेषि-
क सप्तमीपक्षे नियामकमस्तु। सत्सप्तमीपक्षे तु नियामकत्वमयुक्तं षाष्ठभाष्यके पदविशे-
षात्। तथाहि। आन्त्रलोपरत्र भाष्ये। नैषा परसप्तमी कालमीका नहि सत्सप्तमी। किंतर्हि-
ती। तथा तत्रैव वैकेपदः। कथं पुनः संभवेत्वापरसप्तम्यां सत्सप्तम्याश्रयितं षा क्यायपेक्ष्य
वाक्याध्याहारादोषः। किंतिसतीत्येव हि विज्ञायमाने पौर्वापर्यानाश्रयणात्रास्ति
न्नस्मिन्नित्यस्याः परिभाषायाः उपपत्त्यानं। यदा त्वौपश्लेषिके अधिकरणे सप्तमी न तदा किं २२

पूर्वस्यकार्यमयपरस्येत्यनियमे नियमाय परिभाषेयमस्यानामिति । अत्रोच्यते षाष्ठग्रंप
स्य प्रकृतमात्रपरत्वाद विरोधः । तथाहि । अत्र लोप इति सूत्रे पाकारवतो ग्रहणं मास्तु
नादित्येवास्तु अतिप्रसंगे नंदनादावतिप्रसंगस्तु नरितं । अनिदितामित्यस्यानुकर्षणेन हि
नस्तीति न स्यात् । अतः क्ङितीत्यनुवर्त्य अमसे वा क्ङितमाश्रित्य हि नस्तीत्यत्र लोपोस्तु इति शंक
ते । यदि चास्यामवस्थायां तास्यविति परिभाषेयं प्रतिष्ठेत तदा नंदनादौ चानशोङिः त्वाल्लोपः
प्रवर्त्तेत । अमः श्लीकरणं चानर्थकं स्यात् । नहि शित्वात्सार्वधातुकत्वमङिः तमिममेवाश्रि
त्य हि नस्तीत्यत्र न लोपे क्रियमाणे सार्थकं न तु व्यत्थानं चार्धधातुकसंज्ञानिवृत्त्यापीत्वसार्थ
के । तस्यां हि सत्यां अनक्तिभनक्तीत्यलोपः स्यात् । रुणाद्धि भिनत्तीत्यत्र गुणः स्यात् तत्र णोर्दी

प्रा·कौ·
२३
23

नीडागमः स्यात् ॥ नेड्वशीति तु न प्रवर्तते । अकृतत्वादिति चेन्न । आगमः पूर्वभागस्यानंगत्वेपा
त्कविधीनामप्राप्तेः । कथमनेनागतेति चेत् । इत्थं । प्रत्ययविधौ यतःपंचमीति दिष्टधातोः प्रातिप
दिकादित्यादिना दादित आत्सिन्प्रत्यये परतो गामिति हि सूत्रार्थः । इह तु यतःपंचमी निर्दिष्टं हृधादि
भ्यः इति नास्मात्प्रत्ययः परः । यस्माच्च परः पूर्वभागान्नासौ तस्मिन्विधौ यमानेपंचमीतिदि
ष्टः । अत एव न क्रीत्यादावतोदीर्घो यञीति न प्रवर्तते । न च प्रसाव लोप इत्यत्र विशेषणा
र्थं पीत्कर्तणं स्यादिति वाच्यं । न सोर लोप इत्युक्तेपि दोषाभावात् । नन्वेवं वां ताल्लोपो ग्रहणं स्यात् ।
तथा कतेर्यङ्लुकि चेकीत इत्यत्रापि स्यादिति चेन्न । सिद्धान्तेपि श्नम्प्रत्ययमात्रयोर्ग्रहणा
पत्तौ वस्तत्र इत्यादावेवति प्रसंगसाम्यात् । साहचर्यात्प्रत्ययधात्वोर्ग्रहणमिति तु ल्पनम् ॥ २३

ननुऽनसोरल्लोपः इत्युच्यमानेपत्र न प्रत्ययङ्कित्वात्तन्नर्थं तत्रैवमविप्यातियत्तिः इत्वाचततपत्नत
यानर्न्तत इतिमैव अनुवर्तमानेन सार्वधातुकग्रहणेन ऋत्यणो विशेष्यतेतन्याववि ध्यं संस्पर्शा
त्त्रिदिष्टपरिभाषानुपास्थितौ ॥ ति मितसमममी। सार्वधातुकनिमित्तस्य न प्रत्ययस्या स्ते श्रीलो
पः क्लित्यनेनतर इति। ननु चातउत्सविधानकार इतिसूत्रे सार्वधातुकग्रहणं प्रत्याख्यातमि
ति चेन्न। सतिशिष्टे प्रत्याख्यानात्। तदेवं श्नमः श्वित्व सामर्थ्यात्क्ङितीति सप्तम्यामपिप
रिभाषानोपतिष्ठत इति स्थितं। पूर्वपक्षवादनास्यपात्तूर्योक्तमिति वा वर्णनीया इह सू
त्रद्वये षष्ठी प्रकल्पिपलोपि भाष्यास्थितं ः। तथाहि। षष्ठी स्थाने योगेति सूत्रात्त्वष्टीत्यनुव
र्तते। सप्तम्यर्थनिर्देशो पूर्वस्याव्यवहितस्य षष्ठीस्यात्। पंचमीर्थनिर्देशे तु परस्याव्यव

वा॰कौ॰
२४
24

हितषष्ठीस्यादिति। तत्र इकोयणचीत्यादौ सूत्र एव षष्ठीश्रवणात्तावषष्ठी मन्तव्य एवं स्था
मेतरस्यैषा ननु तत्र स्थानबाहुल्ये तस्या अपि व्यवहितत्वे स्यात्तावन्मात्रमुच्यते। स्थानेन्तगित्यादौ
नषष्ठ्याश्रवणात्तापि प्रकल्प्यत इति विशेषः। सा चातिपतयोगात्स्थानषष्ठी। यस्य स्था
नषष्ठी तस्यैव कार्यं तियम इति सोऽप्यर्थात्सिध्यति। यत्र तूभयनिर्देशः स्तत्रेमिषात्स्थानष
ष्ठी। यस्य स्थानषष्ठी यं तावत्र प्रकल्पकं। कार्यित्वनिमित्तत्वयोरेकत्र युगपदसंभवात्। स्थाप
काच। तथा चैकः पूर्वपरयोरितिसूत्रे कैयटः। सूत्रद्वयप्रमाणत्वाद्धि भवेतां प्रकाल्पिके।
षष्ठ्यौ विभक्ते तेनात्र स्थापनार्थत्वमाश्रितमिति। न च पर्यायेणोभयकल्पनं अत्र तत्त्ववत्ता
त्। तथा हि स्थानेन्तगित्यत्र सप्तमीतिरेवकाया सा पूर्वत्र चरितार्थायामानोपेय इति पंचम्याः २४

षष्ठीं कल्पयति। एवमीदाम इति पंचमीङ्घ्रान इति सप्तम्याः तथा ॥ नाम्नदातन्मस्ते चेष्ट
भ्यस्त्व सिजर्थेस्तावेधान के इति सप्तमीति निर्दे शं बध्नाति। साच सप्तम्युत्तरस्य च रितार्थे ति त
स्या एव षष्ठीकल्पते न तथा वहो लौपरस्य त्र वहो रिति पंचमी श्रुकृतार्था इष्टे मेयः श्विति
सप्तम्याः षष्ठीकल्पयति अत एवमत्त्र च वहो रिति पृथक् षष्ठी निर्देशः तथा गो नेणादि
ति पंचमी सर्वनाम्नः स्यान इति सप्तम्याः षष्ठीं कल्पयति। गोषाद्ग्रहणे त्वप्रयोजना भा
वात्स्थानच तिष्ठति गौ रित्यादौ एवं वस्त्र हृद्धिः फलमिति वाच्यं। गोशद्ग्रहं प्रति तिष्ठते र नेगत्वा
त् एवं श्रायेणपंचम्याः कृतार्थे तेति भाष्येस्पष्टं। आमि सर्वनाम्नः सुडित्य त्रापि पंचम्यन वकाशा
आमी व स्त्वत त्त्वने हृ सामानाधिकरण्यं पर्वणा म्रामेनत्राणामित्यादि सिद्धये सर्वनाम्न इति सप्तमी

श्रा॰ कौ॰ २५ 25 त्तनरार्थतयासावकाशा। यदितु ह्रस्वादित्यनुवृत्तत्तयापंचम्या सामानाधिकरण्यं संपाद्य।
सर्वनाम्नः इति पंचम्यपि कृतार्थेति ब्रूयात्तर्हि यथोद्देशपक्षाश्रयणेन परत्वात्तस्मादि स्वत
रस्येति भविष्यति। तदुक्तं। उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्देशः इति वक्तव्यन्तत्तु नेह
सामानाधिकरण्यं वर्णाश्रमेत्तणामित्यस्यासिद्धे सर्वनाम्नो विहितस्येति व्याख्यानात्
येषांतेषामित्यादावर्थमकारात्परस्येति व्याख्यानाद्दीर्घाक्षेत्तरमवतीत्यत एवाष्टाः स्या
नेपंचमीतेन दीर्घस्यैव तत्र भवति वत्तळकारस्यस्त्राच्छायेति निर्देशश्चेल्लिंगं। अन्यथाहि
त्वं विचेतिचत्वेन स्त्रायेतिचकारद्वयं निर्दिष्टेत प्रत्ययविधौ तत्पंचम्योनप्रकाल्पिकाः ष
ष्ठाश्रुतवादविभक्तिवातानाश्रप्रसिद्धस्यचाव वादासंभवात् नचाति॥ यमाप्रसंगेतनियमकं का २५

रिणः परिभाषायाम्प्रवृत्तेश्चेति दिक्। स्वरूपं शब्दस्याशब्दसंज्ञा। शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे
या संज्ञा तां विना। अग्नेर्ढक्। आग्नेयं। आग्नेयमहतः। आपकेऽग्नहते इह अग्निग्रहणे आड. यमा
हनूपधामेतन्स्तत्रोपात्तानां प्रयोगसमवायिनस्तएव संज्ञिनः। अथाह संतेति किं। उपे
सर्गो घोः किः। दाधाम्वोपशाभ्यात् पुधानौ शब्दार्थान्नामभूत्। पाठः शब्दशास्त्रे। तत्र संज्ञेति सम
मीसमासः न नश्शब्दस्य संज्ञेति कर्मकरणमित्यादि दृष्टं संज्ञासु स्वरूपग्रहणापत्तेः स्यादेतत्।
रूपग्रहणं विनापि च शब्देन तदेव गृह्यते प्रतीतावुपदेशानपेक्षत्वात् असाधारणत्वात् द
तरं गतत्वाच्च पतोपस्थितिकत्वाच्च यथाहि प्रतीतौ संबंधग्रहणमपेक्षते साधारणत्वात् पर्य
येरपि प्रत्यायनात्। बहिरंगमस्य पदस्यानन्यबोधविचयत्वात्। अनियतोपस्थितिकस्त्वन्तरंगकर

श-कौ. २९

णादृष्टायामप्रतीतेः नाकिं रूपग्रहणेनेति चेन्न। अत्राहुः इह शास्त्रेऽर्थोपि विवक्षितो रूपवदिति
ज्ञापनार्थं स्वं रूपग्रहणं तेन काथाकथे इत्यत्र शेरिति प्रत्ययस्य संज्ञा न भवति। एतत्सूत्रं भाष्ये प्रत्याख्या
तं। तथाहि। आरभ्यमाणेऽपि सूत्रे पश्चिमपदे देवताशब्दे च उदेवो भरता इत्यादयस्तावल्लोकवदर्थाय
तेनार्थवद्ग्रहणे नानर्थकस्येत्युपपन्नं भवति नचोक्तज्ञापकादर्थो ग्राह्यः स्वं रूपमिति वचनाद्रूपं
चेत्सामर्थ्यादर्थश्चा ततो रूपस्य ग्रहणं [illegible] वृश्च्यते अग्रेऽर्क इत्यादौ तु शब्दाप्रवग्रहीष्यते अर्थस्य प्रत्यये
नेपौर्वापर्यासंभवात्। उपाशातिपदिकादित्यधिकाराच्च। उपसर्गयोः किरित्यादौ तु पृथगेव नेग्रहीष्यते
दाधाघ्वित्यारंभात्। उक्तं हि। व्यवहाराय नियमः संज्ञायाः संज्ञिनि प्रति विदिति। अर्थवद्ग्रहणपरिभाषापि
अस्वारिसूत्रे राजिंपटिताप्रनर्थानि पाठान्तिस्तायापाति दाचा अग्रेऽर्क इत्यादौ हि शब्दाविशिष्टस्यार्थस्यात्र २९

गतउपस्थितौ विशेष्ये कार्यबाधाद्विशेषणीभूते शब्दे प्रवर्त्तमाने कार्यं उपस्थितार्थोपहित

एव न तत्तन्नर्थे केपि। अर्थस्य विशेषणविशेष्यभावव्यत्यासमात्रेणोपपत्तौ सर्वात्मना त्यागा

योगात्। गौणमुख्यन्यायोप्येतन्मूलः। गौणस्य प्रथमतोऽनुपस्थितेः एतेनाभिव्यक्तपदा

र्थायेत्यपि व्याख्यातं। तस्मात्प्रायत एव सकलनिर्वाहे सत्वेनाव रमणीयमिति। ननु तत्र च

न्तुः स्वरूपमनुकृत्य शब्दस्वरूपमित्यवश्यं वाच्यमेवेति चेत्। न अनुकृतेरनावश्यकत्वात्। तथा

हि। अग्निदित्यत्रैतावतस्यापि सावर्ण्यादेव सिद्धेः। कथन्तर्ह्यवात्तामित्यत्र झसोर्झरिति लोपः।

तत्र व्यक्तिभेदात्सावर्ण्यमिति चेत्। इहापि बोध्यबोधकयोर्भेदात्। तथा तपरस्तत्कालस्येत्य

त्रापि। आदिग्रहणाद्धत्वासिद्धेः। आहृत्तौ लिंगं तन्नादि चेत्यादि। येन विधिरित्यत्र तु वर्त्तिकयाऽ

श.कौ. २२

स्तस्येतिवक्ष्यमाणेनवस्तुतस्तुतदपिनवाच्यं। व्यपदेशिवद्भावेनैवसिद्धेः अप्रातिपदिकेनेतितत्
त्रैवप्रत्याख्यास्यामः अतएवयेनविधिस्तदायंतस्यप्रयोजनमित्याद्यंतत्रत्रस्थंवर्त्तिकंसंग
च्छतइतिदिक्। स्त्रिनाद्विशेषणानांवृत्त्याद्यर्थं। अत्रमिदिस्तुपलक्षणं। किंचिल्लिंगमासज्यश्रुत्येलि
गाविशेषणानांसंज्ञेतिवक्तव्यं। तच्चलिंगंवृत्त्यादावासंजनीयमित्यर्थः एवमग्रेपि। तेनविभावाद्दे
सगोतिसूत्रेविशेषणानामेवग्रहणात्स्वतन्त्यग्रोधंसत्तन्यग्रोधारतिसिध्यति। पितृपर्यायवचनस्यैव
स्वाद्यर्थंचकाराद्विशेषाणांस्वरूपस्यग्रहणं। श्वेपुषः। रैपोषंपुष्टः। अश्वपोषं। स्वयोषं। जितृप
र्यायवचनस्यैवराजाद्यर्थं। सभाराजामनुष्यपूर्वा। इनसभं। ईश्वरसभं नेह। राजसभा। हरिश्चंद्रस २२
भापर्यायेणयोवाक्तिसहिपर्यायवचनः नचस्वस्यसेनसहविकल्पः नापिविशेषेणसामान्यविशेषयोर्भिन्न

प्रकारकबोधजनकतयातुल्यार्थत्वाभावात्। तुल्यार्थास्तद्विकल्पेननिनित्यायात्। इनश
ब्दो राजशब्दस्य पर्याय इत्यादिव्यवहारास्तु भीमो भीमसेन इतिवत्। पिन्तस्य तद्विशेषणं च मत्स्या
र्थः। पादिमत्स्यत्वगात् हन्ति। मात्सिकः। शाफरिकः। पर्यायवचनानां न। अतिमिषान् हन्ति। मीनस्येच्छ
न इति भाष्ये मैनिकः। स्वरूपादिग्रहणं तु पिन्निर्देशः कर्तव्यः तेन स्वरूपस्य पर्यायाणां विशेषाणां
च ग्रहणमिति व्याख्यातारः। इह वृत्तादौ राजादौ च भाष्ये नैवाभिमतं सिध्यतीति तत्रैव वक्ष्यते। इ
त्तरत्र सर्वं वाचनिकमेवेत्यवधेयं। अणुदित्सवर्णस्य चाप्रत्ययः। अत्राण् परेणैकारेणेण्युक्ते
अण् उदित् सवर्णस्य संज्ञास्याद्विधीयमानो विना। चकारात्स्वरूपस्य। अस्यचौ अज्झीसात्तमालो
स्यात्। परस्तेकाचोऽसंयोगपूर्वस्य। चिच्युतः। लिल्युतुः। अंरदोरघपवः। पवः। उरणरपरः। कर्त्ता।

ग्रा॰को॰ २८

28

किवति। नचैवं ऋ्रदोरित्यप्कृत्वं तेभ्यः ऋकारादिभ्योपि स्यादिति वाच्यं। दीर्घोच्चारणवैयर्थ्या
पत्तेः। नन्वेवमप्यष्टनआविभक्तावित्यत्र सवर्णग्रहोऽपि दुर्वारः। नहि तत्रापि सामर्थ्यं। कृत्वो
च्चारणेऽर्धमात्रिकस्य मात्रिकस्य मात्रिक एव स्यादिति दीर्घग्रहणस्यानुभयार्थ्येनोपपन्नेरिति चे
न्ना। अप्रत्यय इति निषेधात्। दीर्घाणामनण्त्वेन सवर्णग्राहकता नास्तीति आरोवा कृत्वाच्च। नन
दीर्घाश्चेदनणस्तर्हि काक्रोहारकरत्यादौ यपरत्वं न लभ्येतेति चेन्न। आन्तोसिन हि दीर्घाः क्वाप्यणग्र
हणे न तेषामस्यापन्त इति क्रमः। किं त्वग्रहणकशास्त्रे तदुपजीव्येषु वर्णोपदेशादिषु वा इतरत्र तु वा
क्यापरिसमाप्तिन्यायाद्यावत्तानादस्येवाणग्रहणे न दीर्घग्रहणमिति तत्त्वं। उदितू। कुहोश्चुः। च
कारजगादावप्रत्यय इति निषेधस्तूदित्सु न प्रवर्त्तते। उदित्करणसामर्थ्यात्। अत एवाङ्कः। २८

भाव्यमानोऽण्सवर्णान्नगृह्णातीति। तत्कृतत्वादयस्तनोदितः। प्रतिज्ञानुनासिक्याः पाणिनीया
इत्यभ्युपगमात्। अप्रत्यय इति किं। विधीयमानानां प्रत्ययादेशागमानां सवर्णग्राहकत्वमाभू
त्। अत इञ्। इदम इश्। आधपातकस्येट्। पुवोत्तकु। अम्मसतुद्धौ। इही ह्रस्वं च उपदेश इति वि
चनात्तत्त्वेन गीतेष्वेव इ आदिषा हेतु इत्संज्ञाप्रवर्त्तते। लोपस्तु तत्राननुपूर्व्या हाथिनोऽपि पदस्य ह
पपर्यालोचनायां प्रवृत्तः। ततः स्वरूपमितिसंज्ञावलाज्ज्ञायमानापदार्थापरस्येतिरनुवंधपवि
निर्मुक्तस्यैव भवति तथा च उपस्थापकस्याणन्तात्स्य वर्णग्रहणे प्राप्ते निषिध्यत इत्युचितं अत
एव चतुर्दशसूत्र्यामनुस्वारणार्थस्याकारस्येवेत्संज्ञाघकारामपि णकारादीनां लण्मध्याकारस्य च
पदपर्यालोचनायामेव लोपश्च वलवत्तर इति न्यायेनापहारादित्वं तत्भावेणैव संज्ञाप्रवर्त्तनर

श०कौ०
२५
25

तिसिद्धांतः। इदं चालौकिकत्वात्सर्वत्र उपधेतिसूत्रेणाक्षिप्तमिति। नोद्देश इत्यत्र च कैयटग्रंथे स्पष्टं। इदमत्र
कः। इकोचीत्यादौ सानुबंधाद्विभक्तिस्तु प्राथमिकबोधे विशिष्टस्य विषयतयान्तरसैकार्थ्यावत्त्व
मादाय प्रत्याहारप्रसङ्गानुपपत्तिष्टतेनत्वप्रयुज्यत इति कथं ततो विभक्तिः क्रियतां। इत्संज्ञाकार्यं त
त्रानर्थक्यात्तदंशोद्धत्तित्यायेन प्रत्याख्येप्रवर्तते विभक्त्यर्थानन्वयोप्येवं। हलंष्टहिउल्लुण्डादावुपस्था
पकेक्ष्वकृतस्यालिंगस्यतद्बोध्ये फलप्रवर्तकत्वमित्तिरिक्त। स्यादेतत्। उकारीत्याद्यदोष एवं सेति
सौत्रे उच्छेदे प्रहृतानाहत्ते तत्र लद्देशत्वमेवं प्रवर्तयेदिति चेत्। सत्यं। अत एवैतत्समाधानाय एवं वा
चार्यैः परास्कांतमिति गृहाण। कथं तर्हि एओङ्सूत्रे नहर्घणाय प्रवृत्तमिति चेत्। तत्कालाव
धारणेन कृतार्थस्य तत्कारस्यानवबंधानर्वैषम्यादिति गृहाण। अत एव वैयाकरणा इत्यत्र ए २५

चश्चित्स्वरो न भवति पचमेति गापो पेवे। नयाभ्यामिति सूत्रे अचः परस्मिन्हे इत्यत्र चपे चोस्मा
कारस्य प्रत्याहारे उपन्तयात्। यृद्धा। इतिशादिष्वपि मात्रस्त्रू ज्ञातर्गमे षित्स्तत्वाकिं न फस
प्रत्यायत्तेः पदार्थे शोचमाम्। नैते उपदिष्टा इति चेन्न। न ते फलभाज इति तल्लोसामर्थ्यात्प
रपरा संवद्धे फलमिति चेत्सं ज्ञापित इव वा त्तसामर्थ्यादिति बल्पे। उपदेशेन त्वं बहिः प्रयोगि
के प्यस्ते भवाननत्प्रत्यापक तिष्ठमानपूर्वा साजा त्यादाश्रीयते। नचैतत्र परे घत्ति। प्रत्याप्यत
करा भावादिति दिक्। प्रकृतमनुसरामः। भाव्यमानोप्युकारादेशः सवर्णान गृह्णाति। अथ
उ इति तिन परकरणाल्लिंगात्। तेनात्र तो। ग्रहण्यामित्यत्र ऋकारस्य ऋकारादीर्घस्य दीर्घः सिध्यति। त
चैवं मनाग्रंमितत्र प्रत्ययोपि सवर्णा गृह्णातीति वाच्यं। आदेशाविषयकं ज्ञापकमित्युक्तत्वात्। यद्वा अ

प्र·कौ·
३०

दसोसेरितिसूत्रएवउश्चऊश्चेतिसमाहारद्वंद्वोत्रअतएवसौर्लिंकानिर्देशःकृतः।अतएवचउड्
पधायाइतिसूत्रेगोहइतिविकृतनिर्देशंप्रत्याख्यानभाष्यकारैर्हकारांतरप्रश्लेषउक्तः।न
त्वेवमपिअकःसवर्णेइत्यत्रअकारोष्टादशानांग्राहकोस्त्वणत्वात्।अस्तुचमएवइकारादीनामपि
ग्राहकःआदिरंत्येनेत्युक्तेः।ईकारादयस्तुकथंग्राह्याः।नहितद्वाचकःशब्दस्तस्मिन्सूत्रेउपात्ते।
त्ति।ननुअकशब्देनइकारादयोप्युपस्थाप्यंताइतिचेत्तर्हिवाक्यार्थेतेनान्वयंनतुपदार्थसंसर्गस्यवाक्या
र्थत्वात्।नचतेपिस्वार्थोपस्थापकाःअनुच्चारितत्वादित्युक्तं।अतएवऋचंवेत्तीत्यादौशब्दविशे
षेवेत्तीत्यस्येवार्थोनतुतदर्थंवेत्तीति।नत्रुक्तंवार्त्तिककृता।तत्रप्रत्याहारग्रहणेसवर्णग्रहणमन
पदेशात्।ह्रस्वसंप्रत्ययावितिचेदुच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचनमिति।प्राद्वा। ३०

स्यप्रतीयमानस्या अवचनं। अणग्रितिज्ञापादकत्वमित्यर्थः। अत्रोच्यते। प्रत्याहारग्रहणे
सर्वत्रस्ववाच्ये लक्षणातिरूक्का। दीर्घाज्जसि चेति ज्ञापकात्। प्रथमयोः पूर्वसवर्णः इत्यत्राहि
अक इत्यनुवर्तते। न चाकशब्दवाच्योदीर्घोस्ति। योस्यातिषेधस्यविषयः स्यात्। नन्वाकारोस्ति
इति चेन्न। नादिचीत्यनेनैव तन्निषेधसिद्धेः ख्यादीनामित्यादिनिर्देशाच्च यो हलिंगे। नन्वेवमि
केऽयणचेतिसूत्रेईदातोग्रहणं न स्यात्। युगपद्वृत्तिद्वयविरोधात्। तथा च सुधुपास्यः दध्या
नयेत्यादिनासिध्येदिति चेन्न। मतिनात्पर्ये युगपद्वृत्तिद्वयस्य क्कोकारे बाधकाभावात्। इह चा
ण नद्याः इत्यादिनिर्देशानां नात्पर्यग्राहकत्वात्। यदि तु प्राचामनेत्रद्वावशाद्युगपद्वृत्तिद्वयं
नाभ्युपेयते हि ईहरईदातेचापि इत्याद्धृपाेलक्षणेवाक्ता। ह्ववाच्यक्रस्ववाच्यत्वाविशेषात्। स्ववाच्य

प्रा·कौ·
३१
31

नापिपरमस्तीत्यनुपदेनत्तं। नन्वेवमपिशरीरमित्यादौशकारस्यस्थानसाम्यादिकारादेशः प्राप्नोति।
इकारवाच्योहिदीर्घः। तत्सवर्णश्चशकारइतितस्यापिइग्रहणेनग्रहणात्। तथाशीतलमित्यादाव
पियणःप्रसंगः। दीर्घात्परंनभवति। अकृत्स्नहवाच्यवाच्यतापादर्चिविश्रान्त्यानतत्सवर्णग्रहेमाना
भावादिति। अत्रोच्यते। सवेदवंशकारस्ययकारादेशरूपोदोषः। यदिस्ववाच्यसवर्णेलक्षणाव
देम। वयंतुस्ववाच्यवाच्येसेत्येवक्रमः। नचईकारःशकारस्यवाचकः। दीर्घाणामनणत्वेनस
वर्णाग्राहकतायाश्चसकृदावेदितत्वात्। भाष्यमतेतुअग्न्यालोःसावर्ण्यमेवनास्तीत्युक्तं।
नदयमिहनिर्गलितोर्थः। अकाराष्टादशानांसंज्ञा। एवमिडनौ। ऋलृइत्येतौतपर्यायपश्चाहे। त्रि
घातःसंज्ञे। ऋलृवर्णयोःसावर्ण्यविधायसंख्यानत्वात्। ऋलृकस्सूत्रेऋरत्यकरनिप्रकृतिभावर ३१

धीनेनत्वापिनत्वाद्दा। नचतुल्यव्यक्तिकसंज्ञाद्वयवैयर्थ्यं। तदर्थमिहस्त्रोतराप्रणायनान्न। एवंस्त
द्वादशानांसंज्ञः। एवंत्याहृयोः। इहैतवस्येवेति। यद्यपिहकारस्याकारस्यसंज्ञेतिप्राप्तंतथापित
त्परिहारायतानसलावित्यैवयत्नः कृतोनविस्मर्तव्यः। वार्त्तिककारास्तुइहाएग्रहणंप्रत्या
चख्युः। तन्मतेऽस्यज्ञाविन्यादौजातिनिर्देशात्सिद्धं। अनुप्रायविशेषणस्यचफलत्वतस्यग्रहेकत्वव
दविवक्षा। विधिप्रदेशेत्वपेक्षकत्ववद्विवक्षेतिसर्वेष्टसिद्धिः। यद्यप्यस्मिन्पक्षेऋकारेणलृका
रग्रहणंदुःसाधंतथापिऋलृक इत्युक्तरीत्यासमाधेयमितिदिक्। तपरस्तत्कालस्य। तपःरोय
स्मात्सतपरः। तादपरोऽपितपरः। द्विविधोप्ययंस्वसमकालस्यग्राहकःस्यात्। तेनअतइत्उऊद
इतिषण्णांसंज्ञा। ऋदितिद्वादशानां। अतएवोपसर्गादृतिधातावित्यत्रसावर्ण्यादृलृवर्णस्यग्रहणं

तपरत्वाद्दीर्घो नेति सिद्धांतः। पंचमीसमासो ह्रस्वग्रहणात्तु वृद्धिरादैजिति। इह हि संज्ञापांक्ततेता
त्पर त्वं संकीर्णो नोः पलातिः मुटष्टिव मित्येव कं। पंरपरासंबंधेन लाभ्यणीकस्यैव स्मारकतेति पा-
देतन कश्चिद्दोषः। अदेङ्गुणः इत्यत्रापि एवं सिद्धं। तत्र तत्कारस्योभयार्थत्वं पासामर्थ्याद्विरहात्। यदि
तु ऊकालस्तत्र वक्ष्यमाणरीत्याणुदित्सूत्रे ग्राह्यसंज्ञायामित्यनर्थाते यदि वा कार्यकालपक्षमा-
श्रित्य भाष्यमानत्वादेव सवर्णग्रहणं वार्यते न तदा वृद्धिसूत्रे तपरकरणस्य स्पष्टार्थं। इह तु पंचमीस-
मासो नाश्रयणीयः। अत एव भाष्ये तः अत्र दिति भाष्यं संगच्छते। गुणाभेदकाः इति पक्षे तु वृद्धिसू-
त्रे तपरकरणमुभयार्थं गुणानां भेदकत्वस्य ग्राह्यत्वात्। भेदकत्वे ज्ञापकं तु अणुदित्सूत्रस्थमण्-
ग्रहणमिति हलः इति सूत्र एवोपपादितं। तथा च तत्सूत्रस्थं तत्कालस्येति पदमपि ज्ञापकं। अन्यथा

हिंसत्वस्य तूपसंहृत्येन न हन्त्येव सिद्धे किं तेन। न च सामान्यादिलक्षणार्थं तत्। एवं हि तत्रैव लक्षणं कुर्या
त्। ऋति ऋ वेति विहिते ऽस्य फलं च यस्य व्यवच्छेदार्थेन ग्राह्यस्यैव सिद्धे अतो दीर्घोपजीवित्वं तत्रैव दीर्घग्र
हणमपीह लिंगमिति दिक्। अत एवैतत्सूत्रं भाष्यादौ न व्याख्यातं। विप्रतिषेधे नियमार्थं चेति।
तथा हि आणितिनान्वर्थमिति। तेनाकारादावनणि तत्कालानां सवर्णानां गुणभेदेनानेन ग्र
हणे। अतो निरपेक्षत्वादीत्वमयं प्रसंगे ऽपरत्वाद् इत्येव प्रवृत्तिः नन्वसंज्ञानां बाध्यबाधकभा
वो नेत्युक्तमिति चेन्न। तथा। अविरोधे फलभेदे च भवत्येव समावेशः। इह तु विरोधात् [illegible] नास्ति।
अष्टादशात्मकाः [illegible] इति विरुद्धं संज्ञाद्वयं व्यवहारस्य परस्परविरुद्धत्वात् [illegible]
नात्। अत एव वृद्ध्यादैच इति सूत्रे ऽस्मिन् [illegible] स्येति वक्तव्यमिति वार्त्तिकं संगच्छते। २ [illegible]

श॰ कौ॰
२२
33

स्वतन्त्वनिहसंज्ञासूत्रेइत्येसंख्योपात्ता। केनाविरोधः स्यात्। किं त्वश्वतोमिथइत्यादौ तप्रकरणसा
मर्थ्याद्दायवाधकमावेत्नमीयत इति तो वस्तुतस्तु तकाव विशिष्टेयं संज्ञानत्वात् भावेनाकालस्ये
तिनद्व्हस्त विशेष्यमात्रे पर्यवसानाति। नन्वविशिष्टं। नउ आवणा कालमदशेलत्तणान्वप्राचांमतेयत्वे
वा। सर्वनामस्थानेपि यत्स्यैव वारयंतीयं। तन्नमसीत्यादौ लत्तणायाः स्वैवानरत्वंत्रयोः स्थितत्वात्। न
याच टिघुभाघतर्गतारावदिह यदेकादेशावेतानर्थकादयाहकतासंगाएव नास्ति। विभक्त्युत्प
त्तिरप्येवं संगच्छते। हृष्टिस्त्वेत्र आकारः प्रयोगास्येरकारोवैर्थवानिति हवदत्तग्रंथस्तुप्राचें। रीत्यानेन
व्यवहतितिष्कर्षः। सोयं विध्यर्थतापत्तः। पदाः न्त्रश्रणिस्य व्यवर्तते। नदातियमाप्यमिदं। नपरेणत
त्कालस्यैवेति। गुणानामभेदकत्वादनणसवनकाष्ठिदोषः। असिंश्चपत्ते तत्कालग्रहणशक्यमकर्त्तुं २२

अपाग्रहणानुवृत्तिश्चानावश्यकी। तपरः स्वरूपस्यैवेति नियमेनापि ह्रस्वसिद्धेः। दिव औदित्य
त्रतपरकरणं स्वरार्थं। नन्वकालावधारणार्थं। मात्रमानन्तपाः सवर्णग्रहणप्रसक्तेः। तथा च स्व
रितः प्रयुज्यते। औरितष्टाथिविमातरमुमिति। पृथिवी उत द्यौ। तिसृदात्तप्रयोगस्त्वयोगवाहस्य वा
यः। औदस्त्वचेरिति च तस्य सवर्णभावार्थं तपरकरणं व्याख्यानात्। तेन सन्निधाने अग्राविन्याद्यैति
त्वयेमे ति वृत्तिकारहरदत्तादयः। यत्तु न विभक्तौ तस्मात् इत्यत्र जयादित्यादिभिरुक्तं उकारादित्यत्राय
तिषेधो न भवति इदमस्यासुरिस्तुकारानुबंधकरणादानित्यत्वादसेति। तदभ्युपगमस्य वा रमीत्रं। ति
त्वरप्रसंगात्। न चेष्टापत्तिः। भद्रीपन्नवराध स्मृत्यादावेतो दान्तस्य श्रवणात्। तस्मात् हिदादित्यपि स
वर्णभावार्थस्तकारः। एतर्हि उक्तवचने उकारः। इत्यादिष्वप्येवमिति दिक्। वस्तुतस्तु दिव औदित्यत्राप्य

प्रा· को·
३५
35

वमेवाहलः संमनधर्मिणोव्दात्तेकृतेउदात्तस्वरितयोर्यणः इत्येवं स्वरितात्सिद्धेः । स्यादेतत् । द्रुतामध्याविलं
बिताचेतितिस्रोवृत्तयः । तत्र तेऽभ्यासार्थे द्रुतावृत्तिः प्रयोगार्थे तु मध्यमा शिष्याणामुपदेशार्थं वृत्तिर्वि
लंबितेति । तास्तु क्रमेण त्रिमात्रामात्रिकाः । तथाहि । द्रुतवृत्त्यापस्यामुच्चिपठ्यमानायां नवपानीय
पलानिस्त्रवंति तस्यामेव कुचिमध्यमवृत्त्यापठ्यमानायां द्वादश । विलंबितायां तु षोडश । एवं प
ठाकस्य स्वंध्येनकोधानिर्वृत्ति त्रयेऽपि मात्राकाल एव मध्यमविलंबितयोः प्रथमग्रहीता
धन्यस्य तिष्ठादिनाततोऽस्य न काले न धन्यत्ररेणाभिव्यक्तस्त्वरं जन्यते अभिव्यक्तस्य स्वन
स्थितेयदिस्तु कृद्विलंबितायां तपरकरणमकार्षीन्मध्यमायां द्रुतायां वा । नहि द्रुतं तरेणापा ३५
ठकालेऽग्रतोभिमरोस्तनस्यात् । कालावधारणेन दीर्घप्लुतयोरिव द्रुतं तरस्यापि वारणादिति । तथा

चवार्त्तिकं। द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसंख्यानं कालभेदादिति। अत एव निपातनान्म
ध्यमपाठे द्रुत इति संहितासंज्ञासूत्रे कैयटः। अत्र सिद्धांते वार्त्तिककारा एवाहुः सिद्धं त्ववस्थितान्व
र्णान्वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यंत इति। अस्यार्थः। व्यंजकीभूतो ध्वनिर्यद्यपि वक्तृकालानव
च्छीतथापि कच्छिन्मात्रापर्यंतमेवाभिव्यनक्ति। तदुत्तरकालोपदिजस्तु स्वयमेवानुवर्त्ततेन तु पर
मभिव्यनक्ति। विद्यत एव दीर्घव्यंजकोऽपि सर्वत्रायो ध्वनिर्द्विमात्र एवः अत्र निष्पादी वृत्ततोऽस्तु
इत्यास्तु स्तंभ्यमाणास्तु स्वत एव परस्परविलक्षणाः एतद्व सर्वं कैयटेन ध्वनितम्। तस्मादुच्चारणे
नैषां मात्राकाले प्रतीयते द्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयं इति षाष्ठ्यात्र राधिकरण
स्य परावरणकारोक्तिस्तु कण्ठ्ये तेयेत्ति स्तु रिभि एवं त्या वर्णास्तु निष्पाद्य एवा वर्णोत्पत्ति पदेतवत्त

प्रा॰ कौ॰ ३५ 35

दन्तनिष्पादी ह्रस्वादपि ग्राह्यः कश्चिद्ध्वनिरवश्यमभ्युपेयः। तस्यैव कालभेदाद्वृत्तित्रैविध्यं वर्णास्तु वृत्तिभे
देप्येकरूपा एवेति। केचित्तु व्यक्तय एव स्फोटध्वनिर्वैतन्न प्रकाल्पिता इति पक्षेऽत्र कालरूपोपाधिविशेषाद्वृत्तित्रैवि
वव्यक्तित्वमिति दिक्। उक्तं च भाष्ये ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषांचिदु
भयं तत्स्वभावत इति। अस्यार्थः। शब्दो द्विधा। व्यंजको व्यंग्यश्च। शब्दानां व्यंग्यानां व्यंजकत्वेन संबंधी यो
ध्वनिः स एव महानल्पश्च लक्ष्यते। तदुभयं व्यंग्यव्यंजकेरूपं केषांचिद्देवदत्तादिव्यापारजन्यानामेव
नतु भेर्यादिजन्यानामपि कुतः। स्वभावतः। कारणवैलक्षण्यात्। अत्र उभयमिति भाव
प्रधानो निर्देशः। उभयरूपत्वेत्यर्थः। आदिरंत्येन सहेता। अंत्येनेता सहोच्चार्यमाण आ
दिर्वर्णो वर्णसंघो वा मध्यगानां संज्ञा स्यादादेः स्वरूपस्य च। वर्णो यथा। अलसं चाल्कृत्वा। ३५

इहहिग्रहणमत्रतत्राविहत्वभ्रूर्ल्लस्यतः कृणोहितीयेत्तिनकारेणप्रत्याहारः। आद्यंतौनावयवौ। ताभ्या
मवयवीसमुदायस्त्राक्षिप्यते। तस्यचयुगपत्प्रयोगाभावात्तदवयवेषुसंक्रावत्तरंतीमध्यमे
षुविश्राम्यति। तत्राद्यंतयोः। संख्यासुरूपांतर्भावेणतयोः प्राधान्यनिर्णयात्। अतः स्वरू
पमित्यत्रवर्ण्यते। नांत्यस्य। अप्राधान्यात्। अंत्येनेतिच्यप्रधानेत्वृत्तीयावेनदध्येत्यादौके
वलएवयकारः प्रवर्त्ततेनणकारसहितः इतिकैयटादयः। अत्रेदंवक्तव्यं। प्रत्याहारेषा
यावाचकाल्लतयग्रहणाकयांस्मसावकाशमितिग्रहणकस्तत्रस्यभाष्यादिपर्यालोचनया
वाचकत्वंतावदायवर्णेविश्रांतेअंत्यस्तुतात्पर्यग्राहकः। सहग्रहणात्तुविशिष्टाहिमत्यु
त्पत्तिरितिवोनकांतरवैषम्यामितिनिस्थितं। तत्रांत्यस्येत्संज्ञयाः पहृतस्यकथंसंज्ञित्वप्रसक्तिः। अनया

प्र.कौ. ३६ 36

अज्ञादिसंज्ञानामपि णकाराद्यावृत्तिप्रसक्तेः कउद्भावः किंच। अस्मिन्निर्दिष्टस्य यणः संज्ञा। तथापि दध्य
त्रेत्यत्र यणः स्थानापादनमसंज्ञात्वमेव। न्यायसाम्येन इकः प्राक् ह्रस्वस्यैव स्थानित्वप्रसक्त्या इकारस्य स्थानि
त्वासंभवादिति। अत्रैतेनात्किं। सुडिति त्वमीयैकवचनात्र व्यवेतमाभूदिति वृत्तिकाराः। टाङसि
ङसामित्यादिति दैर्घ्ये एकारेण पूर्वान्तरान्तिनिर्णयादिति भावः। ननु एवमपि टःकारांतस्य संघस्य
टाटकारांतस्येमवत्येवेति चेन्न। व्यवसितांत्यताविरहात्। इह हि अंत्यत्वस्य युक्तायसंस्पर्शत्वात्तेन प्रत्या
हार इति सुडनपुंसकस्येति सूत्रे हरदत्तः। न चैवं प्रत्याहारासिद्धिः लण्सूत्रेऽनुनासिकप्रति
ज्ञासामर्थ्यादनंत्यस्यापि प्रत्याहारात्। इदं तु वक्तव्यं। ओदितिहित्वस्यानर्थत्वात् अनेनैव सह प्रत्या ३६
हारः। प्रत्यासत्तेश्च। तथा चात्र ग्रहणं मास्त्विति। अत्रेदं समाधानं। मध्यमेनेत्यासहितं आदिस्त

उत्तरेषामपि ग्राहको मा भूत्। एवमन्येन सहितो मध्यमः। एवैषां संज्ञा मा भूदित्यादिग्रहणं॥
इतेशति किं। रघ्रात्या हारीयष्यास्यात्। मध्यमं तेनापि सुस्तनास्तिकप्रतिज्ञासामर्थ्याद्भवतीत्यु
क्तं न चैतत् दितेस्यस्य विरहे लभ्यते। नवीनास्तु। सहग्राम संतादेतीति सहेता। मध्यमो वर्णः। अ
न्येनादिः। आरादरत्यादिसंज्ञको भवतीत्यर्थः। अयं तु समभिव्याहारात् सहेता मध्यमो लभ्यते। तेन रूप
मिति चानुवर्त्तते। वृद्धिगुणादिसंज्ञा। स्वेनेहापि सामानाधिकरण्यात् संज्ञासंज्ञाभावगतिः। अस्मिंश्च व्या
ख्याने हलंत्यमित्यत्रेतरेतराश्रयशंकापि नास्तीत्याहुः। पिनविधिपित्तदंतस्य। विशेषणं तदंतं
तस्य संज्ञा स्यात् स च रूपस्य परश्च। चयः जयः अयः। ओणवपके। अवध्यपलाच्या। इहपेनेति कर
णे तृतीया न तु कर्तरि। कृयोगलक्षणषष्ठ्यापि नवात्। विधिरिति हि कर्मणि किप्रत्ययः। तेन

धा·कौ·
३०
37

कर्मणोभिहितत्वाज्ञमयप्राप्तावितिनियमस्याभावे विषयः। करणं च परतंत्रं। कर्त्रधिष्ठितस्यैव करण
त्वात्। एवं चेहत्तीयव्यापारतंत्र्यं लक्ष्यते। स्वविभक्तौ न लक्षणेति नैयायिकोक्तः पक्षो निर्मूलः। न च व्याप
यानुशासनवैयर्थ्यापत्तिस्तन्मूलांतिङ्‌त्वपि तस्य तुल्यत्वात्। रथो गच्छतीत्यादौ व्यापारलक्षणाया
स्त्वयापि स्वीकारात्। अत एव प्रयाजे शेषेण हवींष्यभिधारयतीत्यत्र प्रयाजशेषं हविष्षु क्षारयेदि
ति मीमांसकाः व्याचख्युरित्यादिक्। न च परजित्यादौ ह्रकारादीनां पारतंत्र्यं धात्वादीनां च स्वातं
त्र्यं वा षष्ठ्यादीनामेव तत्वादीनामिव च संभवति। किंतु वैवक्षिकं। तेन विशेषणमप्रधानं। तच्चश्रा
न्तात्स्य विशेष्यस्य संबंधेति फलितं। विशेष्यसंनिधौ च विशेषणत्वं भवति। संनिधिश्च लक्षवित्तावा ३०
त्रिर्देशेन। यथा शब्देद्विवचनं प्रशस्तमितिद्विवचनस्याक्वचिदधिकारात्। यथा। परजित्यत्र धातोः॥

क्वचिदाद्येपात्तं। यथा इकोऽल्यालेत्यत्र सन्नाधातोः। इकोयणचित्येषोपवादापवाद इत्यादौ तत्र कथं
चिदपि विशेष्यसंनिधिः। अनेनेदं प्रवर्त्तते। स्यादेतत्। उदेशस्य एवंदेस्येत्यत्र ओष्ठ्यापूर्वं कर्त्तव्याधातो
रेव विशेषणं स्यात् न तु उकारस्य। सहि विशेषणत्वात् देशस्य संज्ञा। संज्ञा च संनिधिं न प्रत्यापय
ति तत्स्वयं विशेषणादियोगमनुभवति। ततश्च संकीर्णमित्यादावतिव्याप्तिः। ऋतेमित्यादा
वव्याप्तिश्च। एवमेतत्स्वप्रत्ययादित्यत्रापि अस्संयोगपूर्वत्वमंगस्य प्रत्ययस्य वा विशेषणं स्यात्।
न तु कारस्य। ततश्चाश्रुहोत्यादावतिव्याप्तिः। विशेषणं च पर्यंगस्य तदा दृश्यण इत्यादावव्या
प्तिः। अथ प्रत्ययस्य न हि तत्वं हेत्यादि सिध्यतश्चाचाह। गुणप्रधानभावत्वापेक्षयं संज्ञा। तथा
च उतश्च प्रत्ययादित्यादौ विशेषणसंबंधवेलायां गुणमात्रा प्रकरणात्तमनुभूयपश्चाद्विशेष्यसंबंधे

विशिष्टासंज्ञा भवति। इह विशिष्टस्य वैशिष्ट्यं न तु विशेष्ये विशेषणमिति। व्याख्यानात्। अत एव न वि
शिष्टवैशिष्ट्यं नाप्येकं उद्देश्यमिति दिक्। तथा च वार्त्तिकं। येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदं
तोपाधित्वाप्रसंगः। सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वादिति। ग्रहणोपाधीनां गृह्यमाणविशेष
णत्वेन संमतानां सोऽग्रपूर्वत्वादीनामित्यर्थः। यथेष्टत्वादित्यनेनेदं दर्शयति। चतुर्विधेऽत्र विशि
ष्टवैशिष्ट्यबोधेऽत्र मध्ये विशिष्टस्य वैशिष्ट्यमेवेह संमतं। न त्वितरत्त्रिकं। व्याख्यानान्न लक्ष्यानुरोधाच्चे
ति। इह सिद्धान्ताभिमते विशेषणविशेष्यभावे स्फुटीकर्त्तुं बहूनि वार्त्तिकानि प्रवृत्तानि। तद्यथा। समास
प्रत्ययविधौ प्रतिषेधः। द्वितीयाश्रितेत्यादौ श्रितादयो विशेष्यास्तद्विशेषणं च सुप्। एवं नडादिभ्यः फ
गित्यादौ नडादिविशेष्यं प्रातिपदिकं विशेषणमिति फलितोऽर्थः। एतेन ग्रहणवता प्रातिपदिकेन ३८

तदंतविधिर्नास्तीत्यपि व्याख्यातं। तस्याप्युदाहरणं प्रतिषेधे समानविषयकत्वस्यादिवदत्र हैकेप
दादिभिरुक्तत्वात्। अतएव गोस्त्रियोरिति सूत्रे गोस्त्रीयतः आद्यिपदिक मिति व्याख्यानं संगच्छते
एतेन शेषो घ्यसखीत्यादौ अहरणाव तेति प्रतिषेधं संचारयंतो हरदत्तादयः प्रत्युक्ताः प्रकृतमनु
सरामः। श्रिताद्यो विशेष्यास्तु कं। तेन हि नीयाश्रितेति समासः कृत्सा श्रितस्य चैव भवति नत्
कृत्सापरमाश्रितस्त्यादावपि तथा नडादिभ्यः फक्। नाडायनः नेह स्त्रृव नडस्यापत्यं सौत्रनाडिः।
अनुशातिकादित्वादुभयपदवृद्धिः। ननु कृत्सापरमाश्रितस्तत्र समासप्राप्तमेवनास्ति। अथ हि
समासात्तद्धितः। तेन श्रितांतत्सर्वं तमेव न भवति। अत्र कैयटहरदत्तौ संवदतां तदुदाहरणं बध्रा। द्वासं
परश्रितेति। एतद्धि प्रत्ययलक्षणेन सर्वं तं भवति श्रितांतं च प्रत्यात्ययति। स्यादितत्। सिद्धांते श्रितादीनां वि

शा·कौ·
३५
34

शेष्यतेपितत्रसर्वंतत्त्वंबाधितं । नचातएवान्वयादुपपत्त्याश्रितादिशब्दानांतत्प्रकृतिकेलक्षणेतिवा
च्यंसंबुध्यंतएवसमस्योर्थउपस्कारेणावकाशलाभात् । तथाचकष्टंश्रितमित्यादिनासिध्येदिति । उच्यते ।
समासतद्धितप्रकरणेसर्वत्रश्रितादीनांतदादीनांचतत्तत्प्रकृतिकेलक्षणेवाविवक्षावेपेनदीभिश्चेत्यादौ
अभेदस्यबाधात् । नहितत्रसंबुद्धत्वंतत्रासंभवतिपूर्वकालैकेत्यादौसंबुद्ध्यसंभवेपिएकाविभक्तावि
त्यादिसौत्रनिर्देशोनसिध्येत् । तस्मात्सामान्यापेक्षलाघवकलेनैकरूप्यापसर्वत्रतत्तत्प्रकृतिकेल
क्षणेतिस्थिते । इत्यभाष्येह्रस्वोः केपटह्रस्वदन्तककृतंभक्ताव्याख्यानमत्तादेयमित्यवधेयं । अस्यापवा
दमाह । उगिद्वर्णग्रहणवर्जनमिति । उगितावर्णेनचप्रातिपदिकंविशेष्यतेइतिकालिनोर्थः । महा
न्तमतिक्रान्ताअतिमहती । उपसर्जनत्वात्तदेशादिलक्षणस्यङीषोऽभावेउगिदन्तत्वान्ङीषिह्रस्वहन्मह ३५

नोऽमैश्वरादित्वं नास्तीत्यपि केचित्। युक्तं चैतत्। महते सौभगायेत्यादौ विभक्तेरुदात्तत्वसिद्धये शतुरनु
म इति सूत्रेन च ज्ञापुदात्तत्वे बृहन्महतोरुपसंख्यानमिति वार्तिकस्यारभ्यमाणत्वान्ङीपोऽप्युदात्तत्व
सिद्धेः अन्तरङ्ग। दादिः। न चेह सामर्थ्याच्चदत्तविधिः। अस्यापतंरः कामरस्यत्र चरितार्थत्वात्। न चे
वमितोऽजित्वं व्यर्थं स्यादिति वाच्यं। वाक्यादिष्वस्यत्र पच्यायणं हव्याच्चुदात्ताभंगा चरितार्थत्वात्। न त्वे
वमपि स्त्रीपणादिरित्यादावेवस्यान्तनदात्तिरिति। अकारस्येहानर्थकत्वादिति चेन्न वर्णग्रहणेऽप्याव
त्तिरभाषायामप्रवृत्तेः। तथा चैतत्सूत्रशेषवार्तिकम्। अलेवानर्थके नेति। अत एव संख्यातेनार्थ
वतैव तेनाखिमारतीयडिहेवमवति विशेषपरमस्त्विया। नेह शास्त्रे। एतस्मः तथाइत्र हन्न्यथार्थ
मात्रैशौ मोचेत्यत्र हन्नइति संघग्रहणे स्त्रीहन्नग्रहणं न तेन स्त्रीहानाविव्यादौ सौमेचेति नियमा

शा· कौ·
४·
40

प्रवृत्ते दीर्घः ऽसिद्धं उदस्यात्तमो वित्यत्र वा पदांतस्येत्यतः पदग्रहणानुवृत्तिपक्षेऽपि उदेव विशेष्यः अनुवृ
त्तौ तन्न काचित् क्षतिः ऽअयमप्यनर्थकस्याग्रहणान्नेह गुर्वन्तस्यासति गर्भेत्त्व वर्णान्तरणयोः न बशा हेतो
स्तोऽनानावित्यत्र प्राप्तिरेव नास्ति। पदाङ्गाधिकारे तस्य च तदन्तस्य पदस्य चेति वचनात्। नहि हिरण्यत्राऽपि
तदुत्तरपदमिति चेत्। सत्यं। पदाङ्गाधिकार इति वचनं सत्वेतत्प्येव। किं त्वेतद्दूषितं भाष्ये। सौत्रेण तदन्त
विधिनैव गतार्थत्वात्। अतः एव परमस्त्रियामावति महास्त्विति विग्रहे परमास्ति महानिति सिध्यति। एव
नाश्रयणेऽवनैतन्नसिध्येत्। अतिमहत्स्वं हस्यमहदुत्तरपदत्वेऽप्यनंगत्वात्। परमविशिष्टसंगा
त्विपि महदुत्तरपदत्वाभावात्। सौत्रेण तदन्तविधिनानत्वसान्तमहतरत्नि दीर्घत्वोदृढ
परमाचित्तमागिलंत्तणोन्नमणमस्त्रेहास्तिप्यानि ॥ ~ ॥ ~ ॥ ४·

नचग्रहणावनेतिनिषेधः प्राक्कडाः समासश्चान्यपदविधावित्येतेन सहसमानविषयः सहस्रकृत्वात्।
पतेनवीतजन्मजरसः परंज्योतीतिभारविप्रयोगोव्याख्यातः अस्यैवैतस्याः पवादः पठ्यतेभाष्ये
अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेनचतदंतविधिंप्रयोजयंतीति अनुत्पलेत्यर्थवतामात्वेत्यन
र्थकेनाहन्नादंडीत्यर्थवता। वाग्मीत्यनर्थकेना अश्मा। सुपयाइत्यर्थवता। स्रोता। इत्यनर्थकेनमनस्
शर्मेत्यर्थवता। सुप्रथमेत्यनर्थकेन एतच्चरणं चोद्यमिति सूत्रे ग्रहणेनार्थवद्ग्रहणपरिभाषाया
अनित्यत्वज्ञापनात्सिद्धं। परिवेविषीध्वमित्यत्र हि षीध्वंपरत्वस्यानर्थकत्वादेनाग्रहणात्सिद्धे किं तत्रि
ह्यत्वर्थेनाग्रहणेनेतिदिक् सूत्रस्योदाहरणांतराण्याह वार्तिककारः प्रयोजनं सर्वनामव्यय
संज्ञायां। अन्वर्थसंज्ञयादिभिः संज्ञो सर्वादिभिर्विशेष्यते इति फलितोर्थः उपपदविधौ भयाढ

याद्विग्रहणं। अर्थं च आढ्यादयश्चेति द्वंद्वः। तेन चाव्येप्रकरणमेवर्त्ति अर्थे भुकृञ इति सूत्रे वाक्यं भि
न्नाउपपदेन मेयती विशेष्यते। अर्थेन तूपपदं यदि तु अभूताद्य याढ्ययोः द्वंद्वं कृत्वाभ्यादिषा द्वितेन बहु
व्रीहिः क्रियेत तदा द्वेमपि यमुद्देश्यमुपपदं विशेष्यत सिद्धांते तु द्वे मादिभिरुपपदेन विशेष्य
ते। अर्थंकरः अनर्थंकरः आढ्यंकरणं स्वाढ्यंकरणं ऽ। प्रतिषेधे स्वस्तादिग्रहणं। स्वस्तापरम
स्वस्ता। अपरिमाणविस्तादिग्रहणं च। प्रतिषेधप्रयोजनमित्यनुवर्तते। द्विगुनामसंनिधापि
तमनुत्तरपदं विस्तादिभिर्विशेष्यत इति भावः। द्विविस्ता द्विपरमविस्ता। द्व्याचिता। द्विपरमाचि
ताद्विति। दैत्यः आदित्यः दित्य दित्यादि त्ये दित्यैति सूत्रेष्व दिति ग्रहणं न कर्त्तव्यं परमदित्यादि
भ्यस्तस्त्वनभिधानात्यैनारोहणा आरौहणः। आजकरोणः। सैंहकरोणः। तस्यचाउक्ता। ५१

नोवक्ष्यमाणेनोचससर्वेषामयंयोघः तथा। चेह स्वे रूपमित्यनुवर्त्तत इति फलितोर्थः।
नन्वव्यपदेशिवद्भावेनयोण इति सिद्धं इति चेन्न व्यपदेशिवद्भावो प्रातिपदकेनेति निषेधादिति
भाष्यकारः। यद्यपि योणीषाह्योन प्रातिपदिकं तथाप्यप्रातिपदिकेनेत्यत्र वाक्यप्रातिपदिक
ग्रहणे लिंगविशिष्टस्यापि ग्रहणात्स्त्रीप्रत्ययान्तेष्वपि व्यपदेशिवद्भावो नास्तीति भावः। यथा
कथंचित्प्रातिपदिकग्रहणे लिंगविशि। ष्टग्रहणमिति हिङ्यापसूत्रे वक्ष्यते। ननु यदि तस्यैव
मुच्यते स्वरूपग्रहणं वाऽनुवर्त्तते तर्हि व्यपदेशिवद्भावो। प्रातिपदिकेनेत्यस्यानिर्विषयत्वं स्या
दिति चेन्न। स्त्रंतानुक्। दर्शनान्ताङ्इत्यादौ सावकाशत्वात्। न च तत्रान्तग्रहणसामर्थ्यादेव व्य
पदेशिवद्भावो न भविष्यतीति वाच्यं। समासप्रत्ययविधिप्रतिषेधस्त्वेतद्वाधेनान्तग्रहणस्य चरि

पा॰कौ॰ ५२ नार्थत्वात्। ज्ञापकसिद्धेयं परिभाषा। पूर्वात्सपूर्वादिनिरिति वक्तव्ये पूर्वादिनिः सपूर्वा
च्चेति योगविभागश्चेह ज्ञापकः। वस्तुतस्तु भपाद्धपादाविव सूत्रान्तां कृकुदर्शानान्तु श॰
त्यादावपि विशेषणविशेष्यभावव्यत्यासमात्रेण सिद्धेश्च तग्रहणसामर्थ्यमपि स्वरूप।
पादमिति परिभाषाश्रयणे व्यर्थं। नचैवं गोकुलामित्यत्र ह्रस्वः स्यादिति वाच्यं उप
सर्जनं यो गोशब्दस्तदंतस्य प्रातिपदिकस्य ह्रस्वविधानात् संनिधानाच्च प्रातिपदिक
प्रत्ययविशेषणताश्रयणात्। गोशब्दे ह्यत्र तदभावात्। अत एव पञ्चकुमारीप्रियस्या
त्र न ह्रस्वः। उपसर्जनं यत् स्त्रीप्रत्ययांतं तदंतस्य प्रातिपदिकस्येत्यत्रापि संनिधानाश्र
यणात्। एषैव वात्तवापि गतिः। नत्वुक्तपरिभाषेह संभवति व्यपदेशिवद्भावाप्राति। ५२

52

पदिकेनग्रहणं वर्त्तते निचपरिभाषा ह्ययपि प्रत्ययविधिविषयकमिति दिव ३ तत्सूत्रे कैयट

हरदत्ताभ्यामुक्तत्वात्। एवं पूर्वादिनि रिति योगविभागो व्यर्थः। किंच ऊनाः पूर्वादिति

रित्यत्र तदंतग्रहणसंभावनास्य पूर्वाद्यंतिस्तत्रे व्यपदेशिवद्भावेन सिद्धेत्तस्येति

प्रकृतत्वान्निकमपिन कर्त्तव्यं स्वरूपमिति तत्र प्रागेव प्रत्याख्यानमिति दिक्। रथसीताह

लेभ्यो यद्विधौ। तदंतानीति यत्। रथ्यः। परमरथ्यः सीत्यं परमसीत्यं द्वेसीते यस्यासंमितं संग

तमित्यर्थः। नौवयोधर्मेति यत्। हलस्य कर्षो हल्यः परमहल्यमनज्ञं नहलात्करणा

जल्यं कर्षच्छित्ति यत्। यद्विधावित्ति किं। हलसीराट्ठगिति ठक्विधौ न तदंतग्रहणमा

भूदिति कैयटः। अत्रेदं वक्तव्यं हलसीरादित्ति ठक्ः प्रवृत्ते तस्येदमित्यधिकारे तदंतानी

धा॰ कौं ५३ 43

सधिकारेच। तत्रोभयत्रापि तदंतविधिर्दिष्ट एव आयस्य प्राग्दीव्यतीयत्वाल्लक।
ठि हलः अपरस्य मवर्णाधे हलिकः स्पष्टं चेदं चतुर्थं हरदत्तग्रंथे प्रोक्तं चरणायत
तद्वहतीतिरथ पाहुस्यादिरुपादानमेतदर्थमिति भाष्ये युक्तत्वात्। वहत्यधि
कारस्य स्परथहलयोरुपादानसामर्थ्याल्लभ्यो हि तदंताविधिरविशेषादुभय
त्रापि स्यादेवन चैव मिहयद्विधावित्यसंगतमिति वाच्यं। तस्योपलक्षणतो
यद्वारथाचदिति सूत्रे रथाद्यथाङ्गे इति वक्तोठरात्वुक्तो न तु ॥ ॥
॥ ॥ २क धाहुवोधस्योपपादयितेषा ॥ ॥ ॥
॥ ॥ क्यत्वेपि हलस्यहणे ॥ ॥ ॥ ॥ ५३

तदुपपादनस्य वक्तव्यत्वेन हल्ग्रहणेन अदन्तविधिः अस्तु वा संख्याया एवं पदस्य एवेति के
पयपशायः तस्मै हितमिति प्रकरणे शरीरावयवाद्यदिति सूत्रे रथाच्चेति वार्त्तिकं। तत्राप्ययं तद
विधिर्बोध्यः यत्तु तत्र केचिद्दूषयन्ति हलसीराभ्यां साहचर्याच्च तदर्थाध्यायविहित एव
यति तदन्तविधिमाकृरिति। तत्राकृरित्यस्य रसोद्भावने। असमासे निष्कादिभ्य इत्यसमासग्रहणेन तस्मि
प्रकरणे विशिष्यापि तदन्तविधेर्ज्ञापितेन तया साहचर्याग्रहणेऽपि तदन्तविधेरुद्वारत्वादित्यवधेयं स
र्वार्धदिक्शब्देभ्यो जनपदस्य। सर्वपांचलकः सर्वमागधकः सर्वपांचालकः। अर्धपांचालकः अबह्वा
दपि बहुवचनविषयादिति वृत्तिः। समसर्वार्धाभ्यां जनपदस्योत्तरपदवृद्धिः। दिक्शब्दः पूर्वपांचालकः अ
परपांचालकः। एवं वृत्तिः। दिशोऽमद्राणामित्युत्तरपदवृद्धिः अरन्तोर्ध्वपदेष्वावपत्रानां। अस्त्ववाचिनः श

प्रा·कौ·
५५
55

वायोवृद्धिमात्। वृद्धिनिमित्ते प्रत्ययः तद्धिते अवयवानां पूर्वपदस्ते इति शेषः। तदन्तविधिरिह वा
चनिक एव। शरदः पूर्वो भागः पूर्वशरत्। पूर्वापराधरोत्तरमित्येकदेशिसमासः। तत्र भवं पूर्वशा
रदं संधिवेलाद्यृतुनक्षत्रेभ्योऽण्। अवयवादृतोरित्युत्तरपदवृद्धि। पूर्वमदिति किं। प्रावृषेण्यपरत्व
त्तरं तदन्तविधिर्माभूत्। तेन तत्र ऋत्वणो व भवति। पूर्वप्राष्टषमिति। अवयवानां किं। पूर्वसंशरदि
भवं पौर्वशारदिभवं पौर्वशारदिकमित्यत्राण्न भवति। किंतु कालाट्ठञेव भवति। तत्राहि यथा कथं
चित्कालवाचिनो गृह्यते तेन तद्रूढये वेत्याग्रहः। उत्तरत्र संधिवेलाद्यृतुनक्षत्रेण विशेषणात्।
अतएव सायंप्रातिकः पौनःपुनिक इत्यादि सिध्यति। ठञ्विधौ संख्यायाः। द्वे षष्टी परि
माणमस्येति विग्रहे तद्धितार्थेत्यनेन समासे कृते आर्हादिति ठक् न भवति। संख्यायास्त ५५

इतराविषयो भवति संख्यातादपि ठक्प्रतिषेधात्। तेन प्रागवतेरिति बञेव भवति। अध्यर्द्धपूर्व
ति लुक्तन भवति। सोऽस्यांशवस्नभृतय इत्यतः सोऽस्येत्यनुवर्त्तमाने तदस्य परिमाणमित्यत्र पुनः प्रत्य
यार्थस्य समर्थविभक्तेश्चानिर्देशात्। पुनर्निर्देशेन हि प्रकृतालुक्संबन्धो द्विलक्षणमिदमिति सूच्य
ते। यद्वा अनुवर्त्तमानेन सोऽस्येत्यनेन सहितं परिमाणं संख्याया इत्येतत्तावत्पर्यं विधत्ते। ततस्तस्य लु
कि कृते पुनस्तदस्य परिमाणमिति वचनेन सामर्थ्यान्मत्वर्थे तज्जातीयः प्रत्ययः तस्य विधानसाम
र्थ्याद्धि गुनिमित्तत्वाभावाद्यालुङ् भविष्यति। एतच्च वृत्तिकारमतमाश्रित्योक्तं। भाष्यकारमते
ततमधीष्ट इति सूत्रेण भृतार्थे प्रत्ययं कृत्वा द्विगोष्टिक इत्यादि साध्यं न त्वत्राध्यर्धेति लु
क्प्राप्नोति। अनार्हीयत्वात्। यद्यपि तमधीष्ट इत्यत्र कालादिति वर्त्तते तथापि कालसंख्येयवर्त्त

शा॰ कौ॰
४५
45

मानात्मष्टिशाद्याजुत्पत्तिर्न विरुध्यते । रमणीयादिभ्यस्त्वनभिधानान्न भवति नन्वपरिमाणार्थे तद्ध
लकुड्वार: । तथा हि भागवतेष्टजिति ठञ् तदर्हतीत्यत: प्राक् तेन क्रीतमित्येवमाद्यर्थेष्वस्ति प्रभ
ति । अर्हत्यर्थे चातत: परेष्वपि प्रवर्त्तप्रतीत्यादय: आकालिकडाद्येतत्र वचनेष्वेवमंतास्वष्टापि
भवति । एवं च ठञ् आर्हीयानार्हीयार्थसाधारणत्वेपि परिमाणस्य तदर्हतीत्यत: प्राग्वतेष्ठात्त
स्तोत्रत्र ष्टञ् आर्हीयेष्वेव न च तदस्य निवृत्तरूपादानमात्रेणार्हीयत्वमपगच्छति । नहि काको
वाश्यरत्याहीयत्वे निवर्त्तेत किंच । यद्यार्हीयत्वं निवर्तेत तर्हि जीवितपरिमाणादन्यत्रापि लङ्स्यात् ।
द्वैतनिष्को परिमाणमस्य हि तिष्ठक: । तच्च द्वित्रिपूर्वान्निष्कादिति वचनसामर्थ्यात्तथादिति वाच्यं । परिमा
णातिरिक्ते चार्हीयार्थेष्ववचनस्य सावकाशत्वात् । तस्मायस्मायदार्हीयेजीवितपरिमाणं चाष्टि ४५

मस्तोऽस्तोभवतीतितिन्नमधीष्टोऽस्तइत्येवंद्विधाष्टिकःसाधनीयःतदस्येतितन्नवक्तव्यं।सोस्य
त्यनङ्हत्त्येवेष्टसिद्धेरितिस्थितंधर्म्मात्रञःधर्म्मंचरतिधार्म्मिकःअधर्म्मंचरतिअधार्म्मिकःअध
र्म्मीच्छ्रेत्येतन्नवक्तव्यं।पदांगाधिकारेतस्यचतदुत्तरपदस्यचाग्रयोजनेनइष्टकेषीकामालानां
चितूलभारिषु।इष्टकचितंपक्वेष्टकचितं।इषीकतूलेनामुंजेषीकतूलेन।मालभारी।उत्पलमा
री।इहउत्तरपदाधिकारेप्रयोजनस्योदाहरणात्पदांगेतिपदशाहउत्तरपदपरइतिकेपदादयः
अनएवपरममहत्परिमाणमित्यत्रपरममहतोद्रव्यस्यपरिमाणमितिनिषष्ठीतत्पुरुषःसामा।
नाधिकरणेहिआन्महतःइत्यात्वस्यादित्युदयनाचार्याव्याचख्युः यच्चतत्रवर्धमानेनोक्तं।पदां
गाधिकारइत्यत्रकेवलपदाधिकारोगृह्यते।तदुत्तरपदाधिकारःअन्यथाइष्टकेषीकामालानामि

श्रा·कौ·
५८
40

त्वत्र पुनस्त्वदंतविभुपसंख्यानं व्यर्थं स्यात्। तथा च। परममहत्परिमाणमित्यत्र कर्मधारयपद्धेप्या
त्वप्रसक्तिर्नास्त्येवेति। तदेतदनवहिताविधानं। इष्टकेषीत्यस्य प्रयोजनत्वेनोदाहरणात्। उपसं
ख्यानं नानरसगरानकन्नसमायमानत्वात्। तस्मादाचार्योक्तमेव सम्यक्। एतेन सततं नैशतमोहृत
मन्यत इति भारविप्रयोगे ओजःसहोंभस्तमसस्तृतीयाया इत्यलुक्कृतो नेत्याशंक्य वर्धमानोक्तरीत्या
उत्तरपदाधिकारे तदुत्तरपदग्रहणं नास्तीदं चैदंहृत्तिकारोक्तिरपास्ता। यदपि ओजःसहइति सूत्रे
हरदत्तेनोक्तं। ओजःप्रभृतीनां उत्तरपदात्तिमं एवं पदं प्रति विशेषणत्वादिति। तदपि वार्त्तिकविरोधादु
पेक्ष्यं विशेषणविशेष्यभावनिर्णयायैव इह त्वार्त्तिकानां प्रवृत्तिरिति कैयटवदेव स्वयमपि व्याख्यात ५८
त्वात्। भारविप्रयोगस्त्विस्थं समाधेयः वृत्तिः नैशतमसो हृतेः इति षष्ठीतत्पुरुषः। नपुंसके भावे क्त

स्पयोगे षोढा विवक्षायां षष्ठी। ततः सततं नैशान्तमोहन्तं यस्मिन्निति बहुव्रीहिः। यद्वा हन्तव्यं तेनाघ
जं यैककविधानमिति भावे कः। सततं तं नमस्योहं तेनोह्यन्ति यस्मिन्निति प्रागवत्। अथाधिकारिप्रयोज
नान्याह। प्रयोजनं महदपुनर्भवस्मरणादीयविधो महान्तपरममहानन्दप्राप्तिरिष्टेति। स्वायः नञ
जनादिति समासान्तनिषेधः नन्वेवमपि द्वन्द्वान्तत्पुपसर्गेभ्य इतीकारः प्राप्नोति। नह्ययं समासान्तः पे
नञ्कृ। एरित्यप्रत्ययपदवति विधेनेति चेन्न स्मात्स्य। द्वन्द्वान्तत्पुपसर्गेभ्य इत्यत्र अपर इति क्तसमासान्ता
नस्यानुकरणं प्रणमन्ते। अक्षोदेवादितिवत्। व्यत्ययेन द्विवचनार्थे प्रथमा। इत्तन्त्वे स्वापर इति भाष्यवा
स्मिन्व्याख्यानेप्रमाणमित्यवधेयं। स्वमारोपरमस्वमारोनमाणौ पद्मपुष्पदस्त दृष्ट्याधनञ्जहोनुम
यद्वावः प्रयोजनं द्विपदः पशुएकेवलस्योदाहरणं तत्पादयन्तेत्र प्रत्ययः पान्तपदः पदेत्यादि। २६

पा॰कौ
५८
47

ष्ठो लभत्वाग्गिलोपो न स्थानिवत्तु उत्तरपदाधिकारे तु पादस्याह्नो। विशेषणमेव तेन पादस्य पदाज्याति
गोपहतेष्विति पद्भावः। पादेनोपहतं पदोपहतमित्यत्रैव भवति। इह तु न द्विपद्य यदि नोपहतं द्विपद्या
दोपहतमिति। उत्तरसूत्रेप्येवं। तेन पद्यत्यदर्थे हिमकाषिहतिषु चेति पद्भावः इहैव भवति। पादौ क
षतीति पत्काषी। इह तु न। परमपादकाषी। यस्तु परमपत्काषीति प्रयोगः स परमश्चासौ पत्काषी चे
ति विग्रहेण समाधेयः इति भाष्यकैयटयोः स्थितं। एवं यवयंश्रुतिसूयंश्रुतिवयंश्रुस्वा परमा।
स्याश्वनड्वान्। परमानड्वान्। सुपथिमथ्युगो साविचतुरनडुहोर्ग्रहणं द्योः। स्वद्योः। पंथाः स्व
पंथाः तदन्तस्यापीति समासान्तभावः। परमपंथाः परमपृमात्। स्यौः स्वसत्वं। पौ। परमचत्वारः पर
मानड्वाहः। परमवयाणां। भाष्ये तु परमपंथाः परमगौरित्युदाहृतं तत्र समासान्ताप्राप्तिः। तदन्तता ५८

दिति निषेधस्तु नास्ति। स्वस्ति स्यामेवेति वक्ष्यमाणत्वात्। अत एव क्वाचित्कोऽयमपपाठ इति। केचित्तस्य

मांसांत विधेरनित्यतया वा समाधेयं। पद्धा पदं। उदाहरणांतरमित्यर्थः। अयं पंथा। अगौरित्यत्र नञ्जस्तत्खण्डस्या

स्यथाविभाषेति साधुत्वमप्यत्र परमसमर्वापपाविति पादितं भाष्ये। तत्र वक्रू श्री हिर्वैयध्वः। गोणत्वेऽपि दिवनङ। णि

त्वेऽश्वेऽनेनैव। अस्यायतनद्भूता। एतच्च भिदचांत्यादित्यत्र द्वितीयाश्रितेत्यत्र च स्पष्टं। अत एवोक्तो वरुणेंद्रसखा

आग्नेय हिमहंसावित्यादि प्रयोगाश्चैवमेव गासंबद्धेन। एतेन घिसंज्ञासूत्रे शोभनः सखास्य सुसखा सखि

तिसुदाहरन् हरदत्तोऽन्यासक्तारस्तुपास्तः नेस्वपर इति त्रिंशाद्यार्थसमवेतसंख्याद्यभिधायित्वामि

परे इति व्याख्यातात्क्रोणेन भवति। प्रियत्रीणां। अतित्रीणां प्राधान्ये तु स्यादेव परमत्रयाणामित्यादिः

अत्र व्याख्याने प्रमाणामरणं। रहपदं नाधिकार इति न कर्त्तव्यं तदंतग्रहणेनैव सकलेष्टसिद्धेरिति सत्कंच

प्र·कौ· विसर्त्तव्यं। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणं। इह प्रत्ययाद्विमस्यथाप्राति
५८ पदिकाद्यवयवकसमुदायस्य प्रत्ययेन विशेषणात्तदंतविधिर्लभ्यते। अंगसंज्ञासूत्रे यस्मात्प्रत्ययविधि
48 स्तदादि प्रत्यये इत्ययोगं विभज्य परिभाषात्वेन व्याख्यानादंगान्तरलाभः। इदं च संज्ञाविधौ न प्रवर्त्तते
सुप्तिङंतं पदमिति ज्ञापकात्। उत्तरपदाधिकारेपि न प्रवर्त्तते। हृदयस्य हृल्लेखपदण्लासेष्विति
सूत्रे लेखग्रहणाज्ज्ञापकादिति वक्ष्यते अस्यापवादमाह। प्रत्ययग्रहणे चापंचम्याः इति पंचम्यं
तं प्रत्ययस्य विशेषणं तत्र तदंतग्रहणं नेत्यर्थः यथा रदाभ्यां निष्ठातो नः इत्यत्र। तेन दघशीर्णोत्यत्र रु
धातोस्तकारस्य निष्ठांतप्रत्ययावयवीभूतस्य नत्वं न भवति। इह प्रयदके संज्ञाविधौ उत्तरपदाधिकारे रदा
भ्यां स्यतासी लृलुटोरित्यादौ च प्रत्ययो विशेष्यतयाश्रीयते। इतरत्र तु विशेषणतयेति फलितोर्थः ५८

तदिदं सकलं सूत्रेणैव सिध्यतीति। स्थितं। सोऽत्र सूत्रं तद्विधेर्वाचनिकं अपवादमाह वार्त्तिककारः
यस्मिन्विधिस्तदादावल्ग्रहणे। अचिश्नुधातीयङुवङ्। यथेह भवति श्रियौ भ्रुवाविति। एवमि
हापि सिध्यति श्रियः भ्रुवः इति। तदन्तविध्यपवादस्तदादिविधिः अतो विशेषणेनैवाह। वृद्धिर्यस्याच
मादिस्तद्वृद्धं। यस्य समुदायस्यावयवानामचां मध्ये प्राथमिकोऽच् वृद्धिसंज्ञकः स वृद्धसंज्ञकः स्यात्
आत्रगुप्तीयः। वृद्धाच्छः। अचामिति जातौ बहुवचनं। तेन द्वयोरपि भवति। शालीयः। एकस्यापि भ
वति। व्यपदेशिवद्भावात्। त्ताबालिणां। तस्याप्रपेक्षेपः। वा नामधेयस्य। पोहषेयं नाम। तस्य वृद्धसं
ज्ञा वा स्यादित्यर्थः। उभयत्र विभाषेयं देवदत्तादीनामप्राप्ते वामनानादीनां च प्राप्ते आरम्भा
त्। देवदत्तीयाः। दैवदत्ताः। विधायकं वार्त्तिकपठेन चामनीमिति श्रीहर्षः। गोत्रोत्तरपदस्य च

त्तित्वं वृद्धसंज्ञा वक्तव्येति शेषः। कंवलचारायणीयाः ओदनपाणिनीयाः घृतरौढीयाः कंवलप्रियस्य
चारायणस्य शिष्या इत्यादिरर्थः। पणनं पणः। घञर्थे ककविधानमिति कः। सोस्यास्तीतीनिः। पणिनो
गोत्रापत्यं पाणिनः। अण्। गाथिविदथिकेशी ति प्रकृतिभावः। ततो यूनीञ् पाणिनिः। स्यादेतत्। ण्य
क्षत्रियार्षञित इति सूत्रेण इञो लुक प्राप्नोति। आर्षात् पुत्रोत्पत्त्यभावादिति चेन्न। आर्षग्रहणेन ऋष्य
न्धकेति सूत्रविहितस्य ऋष्यणः एव ग्रहणात्। अस्य च औत्सर्गिकत्वात्। यद्वा पाणिनशब्दो यौगिको
न तु ऋषेर्वाचकः। लुग्विधौ तु रूढस्यैव ग्रहणं। एतच्च शास्त्रान्ते एकशेषनिर्देशाद्वा भगवतः पा
णिनेः सिद्धमिति वार्त्तिकनिर्देशात् दाक्षीपुत्रस्य पाणिनेरिति भाष्यकारव्यवहाराच्च निर्णीयते। नन्वेव
मपि पाणिनेश्छात्राः पाणिनीया इति न सिध्यति। वृद्धाच्छं वाधित्वा इञश्चेत्यणः प्रसंगात्। न च छे विवक्षिते ५५

प्रतिलृशितीजोल्लुकि सति नायमिञन्त इति वाच्यं। प्रत्ययलक्षणेन इञंतत्वानपायात्। ग्रश्चाङ्गः। १३।
ज्ञश्चेत्यत्र कराचादिभ्यो गोत्र इत्यतो गोत्रग्रहणमनुवर्तते। न च एवं सूत्रपठ्यवस्थ्यते। तेनापत्या
धिकाराद्न्यत्रेन प्राप्ते लौकिकं गोत्रं विहाय गोत्राधिकारो गृह्यते। स्वरितेनाधिकार इति वचनात्
कराचादिष्वगर्गाद्यंतर्गणः। ततो गर्गादिभ्यो यञिति विधीयमानो यञ् पारिभाषिक एव गोत्रे भवतीति
ज्ञापत्याधिकारस्थत्वात्तेन ज्ञश्चेत्यत्रापि पारिभाषिके गोत्रे यञ् इञन्तं ताभ्यां शेषेणेत्यर्थः फलितः। यद्वा
लक्षणप्रतिपदोक्तपरिभाषया कापिवादिसूत्रेय यञेव गृह्यते। स च पारिभाषिके विहितत्वात्त
स्यैव प्रत्यायकः। एवं चार्थाधिकारादिञ्जश्चेत्यत्रापि तथा। पाणिनिरिति तु पाणीनस्तद्गोत्रेते नाणि
प्राप्तेर्निवाधक्कुप्रत्ययरहिस्यिता। तूलस्यापत्यगौधिः। अतइञ्। अनंतरो गोत्रे वा। न चैवमिञ्ञषेत्यपा-

पा॰ कौ॰ णप्रसंगः। न द्व्यचः प्राच्यभरतेष्विति निषेधात्। स्यादेतत्। यदि गोत्रोत्तरपदस्य वृद्धसंज्ञा विधीयते तर्हि
५॰ पिंगलकाण्वस्य छात्राः पैंगलकाण्वा इत्यत्र वृद्धाच्छः स्यात्। इष्यते तु काण्वादिभ्यो गोत्रे इत्यण्।
50 सत्यं। अत एवापरितोषादुक्तं। वार्त्तिककृता गोत्रांताद्वाऽसमस्तवदिति। शेषे काधिकारे प्राग्दी
व्यतोऽणि तत्र वा इत्यस्यातिदेशः कर्त्तव्य इत्यर्थः। अपत्याधिकारादन्यत्र लौकिकगोत्रग्रहणमप्येद
न पाणिनीया इत्यादि सिध्यतीति भावः। किमविशेषेणेत्याह। जिह्वाकात्यहरितकात्यवर्जं। कतशब्दो
गर्गादिः। जिह्वाचपलो हरितवर्णश्च कात्यः। तस्य छात्रा इत्यर्थेऽणेव भवति। जैह्वाकाताः हारितकाताः।
त्यदादीनि च। एतानि वृद्धसंज्ञानि स्युः। त्यदीयं। अदसीयं। किमीयं। त्वादायनिः। मादायनिः। उदीचां वृद्धादिति
फिञ्। प्रत्ययोत्तरपदयोश्चेति त्वमावादेशौ। एङ् प्राचां देशे। यस्याचामादिरिति संडकस्यानुवर्त्तनेनैङ् यस्या ५॰

चामादिस्तद्वृद्धसंज्ञं वा स्याद्दिशाभिधानोपपणोपचनीयः गोनर्दीयः भोजकटीयः। एङिति किं ग्राहि
कत्रः कात्रकञ्जः। विधेयसंज्ञासंबंधबलेन प्राग्ग्रहणमाचार्यनिर्देशार्थं। व्यवस्थितविभाषाविषय ए
ङि। तेन कौडदेवदत्त इत्यणेव भवति। प्राग्देशवाचितमस्तदेवदत्तश्चहृस्य भवत्येव वृद्धसंज्ञा। त
तः काशादित्वाद्वृद्धलक्षणो ठञ्ञिठौ भवतः। शैषिकोधिकारिति वक्तव्यं। सेपुरिकी सेपुरिका। स्कौ
नगरिकी। स्कौनगरिका। सेपुरस्कौनगरं च वाहीकग्रामौ। तत्र वृद्धत्वाद्वाहीकग्रामेभ्यश्चेति
ठञ्ञिठौ भवतः। शैषिके थिति वचनादपत्यवृद्धलक्षणः। पिञ्ना विकारे चनितस्य वृद्धेति मय
ण्न तदेवं कृत्वा मतं भाष्यमतं चानुसृत्य प्राग्ग्रहणमाचार्यनिर्देशार्थमिति व्याख्यातं। जयादि
त्यस्त्रप्राचिदेशे येसंतितेप्राचः पुरुषास्तेषां यो देशस्तदभिधाने इति व्याचख्यौ। प्राचा॥

सिन्नस्यश्रूयमाणादेशविशेषणत्वेसंभवतिअध्याहर्तव्येनमतेनेत्यनेनान्वयोनकल्प्यइतितस्या
शयः।अस्मिन्नस्तेवाहीकग्रामेदेवदत्तस्यशाकोऽत्रत्यत्रहृद्दन्नादेष्ठदान्निबोनभवतइतिस्पष्टं।किंतसे
प्ररिकीत्यादिभाष्यायाद्युक्तंवचनेनैवसाधनीयस्मादितिक।देशइतिकिं।गोमतीनामप्रादेशनदी।तत्रभ
वामत्स्याःगोमत्याःदेशग्रहणेननदीनगृह्यते।नदीदेशोग्रामाःएषुपादानालिंगात्।प्राग्दि
देशविभागोक्तिश्चंशरावतीनामनदीउत्तरपूर्वाभिमुखा स्याद्दक्षिणपूर्वंसंपादिमिथ्यवा
ऽस्थितोदेशःप्राग्देशः।उत्तरापरस्मान्नदाग्देशः।उक्तंचशास्त्रदंचोविभजतेहंसःक्षीरोदकंप
या।विदुषांशब्दसिद्ध्यर्थंमानःपातुशरावतीति।अमरसिंहोप्याहशरावत्यास्तुयोवधेः।देशः प्रा
ग्दक्षिणःप्राच्यउदीच्यःपश्चिमोत्तरइति।अमरव्याख्यातारस्तुपेशानीतोनेक्रंतोपश्चिमाधि। ५।

गामिनीशरावतीतिवदंति।उभयथापिप्रागुदक्कूलरूपेणविवादः।वाहीकदेशस्तुप्रागु
दग्बहिर्भूतः वहिषष्टिलोपोयञ्चेतिव्युत्पादनादितिविवरणे।तच्चिंत्यं।अव्ययात्त्यबितिसूत्रे
तेभ्यष्ट्याञ्ञिठावितिवार्त्तिकंव्याचक्षाणेनभगवताशाकलनाम्नोग्रामस्योदीच्यवाहीकोभयरूप
ताभ्युपगमात्।मद्रहरदत्तादिभिस्तथैवानुवादाच्च।तस्माद्वाहीकोदेशविशेषएवतत्त्वं।यथा
चकर्णपर्वणिपंचनासिंधुषष्ठानामंतरंयेसमाश्रिताः।वाहीकानामतेदेशानतत्राहंदिवसंवसे
दिति।पतेनधर्मवहिर्भूतत्वाद्वाहीकास्तुतंभवतिशतद्रूविपाशादरावाती।देवनस्ताचंद्रभा
गेतिपंचनद्यः सिंधुनदःषष्ठः।तन्मध्यदेशोवाहीकइतितद्व्याख्यातारः।श्रुत्यंतनत्रैवदर्शि
तं।वहिश्चनामहीकश्चविपाशायांपिशाचकौ।तयोरपत्यंवाहीकानैषासृष्टिःप्रजापतेरितिः

२८५

नं. ५५

पा·कौ·
५२
52

एतच्च विविचं तं वाहीकग्रामे मध्ये त्यात्तु पयो च्यन इति सर्वं समस्यं ॥ इति श्रीविद्वन्मुकुटरा
लस्य लक्ष्मीधरसूरेः सूनुना भट्टोत्तिमहेन कृते शाद्धकौस्तुभे प्रथमस्याध्यायप्रथमे पादे नवमा
ह्निकं ॥ ॥ पादश्चायं समाप्तः ॥ शुभमस्तु ॥ संवत् १९२८ ॥

कौस्तुभ नवाह्निक समग्र

५२